सुबोधिनी—ननु सदुत्तरेणैव भगवता सह युद्धमनुचितमिति चेद्वदेत्, तदा भगवान् युद्धं न कुर्यात्, स्वकार्यं च भवेत्, तत्परित्यज्य किमिति विषममुक्तवानित्याशङ्कायामाह मागध इति। देशदोषात्तथा बुद्धिः। तौ वीक्ष्याहेति। तेजः स्वानुभावेन ज्ञात्वेत्येतदर्थम् । आदौ भगवता सह युद्धं न मन्यते, तदाह, हे कृष्णेति। त्रिधा सम्बोधनं करोति, आनन्दचित्सद्रूपैः। कृष्ण आनन्दः, पुरुषश्चिद्रूपः। अधो मातीत्यधमः प्रपञ्चः सद्रूपः। न हि सदानन्दरूपेण पुरुषार्थरूपेणात्मना स्वोपकारिणा कश्चिद्युद्धमभिकाङ्क्षते। अत आह न त्वया योद्धुमिच्छामीति। किञ्च, बालकेनेति। बालानामपि कं सुखं यस्मात्। बाले बाले को वा। न हि ब्रह्माण्डकोटिविग्रहेण कार्यपक्षेपि योद्धुं शक्यते। किञ्च, विलज्जयेति। धाष्टर्येन यद्यपि युद्धं कर्तुं शक्यते, मरणेन मोक्षो भविष्यतीति, तथापि लोकलज्जयापि न युद्धमुचितम्. लोको हसिष्यति, स्वामिना सह युध्यतीति। अतो विशिष्टलज्जयापि न योत्स्ये। अन्यत्र स्वशक्ति स्थापयसि चेत्, तथापि युद्धं न करिष्यामीत्याह गुप्तेन हीति। त्वया गुप्तः केन वा हन्तुं शक्यते। पराजयपक्षे त्वत्त एव मरणमुचितम्; न त्वन्यस्मात्, अपकीर्तिरपि भवेदिति। अतो युक्तमेव त्वद्रक्षितेन सहायुद्धम्। किञ्च, अमन्देति। अमो मोक्षः। न विद्यते मा माया यत्रेति। अमं ददातीत्यमन्द इति। न हि मोक्षदात्रा आराध्येन सह कश्चिद्युमभिकाङ्क्षति। अतो याहि मोक्षं दातुम्। नन्वहं यादव एव, न तु मोक्षदातेत्याशंकयाह बन्धुहन्निति। यदि यादवः स्यात्, तर्हि बन्धून् कंसादीन् किं हन्यात् ? अतो यादवमारकत्वात् अस्मत्स्वाम्येव, नतु यादव इत्यर्थः। यदापाततः प्रतिभात्यन्यथा, तत्प्रकरणविरुद्धत्वात् निन्दापरवचनमुपेक्षणीयमेव। भ्रामकाणि परं वचनानि ॥ १८ ॥

व्याख्यार्थ—यदि सौम्य रीति से कहें, कि भगवान् के साथ युद्ध मेरे लिए उचित नहीं है, तो भगवान् युद्ध न करें और उसका अपना कार्य भी सिद्ध हो जाए, किन्तु उसने सत् नीति छोड़ विषम रीति से यों कहा ? यों विषम प्रकार से कहने का कारण यह है, कि इसका जन्म अधम देश में

हुआ है। इसलिए इसकी बुद्धि भी अधम ही है। उन दोनों को देख कर अपने मनोगत भाव के अनुसार तेज को समझ कर इस प्रकार इसलिए कहने लगा। पहले भगवान् से युद्ध करना स्वीकार नहीं करता है, क्योंकि इनसे युद्ध नहीं चाहता है। इसलिए भगवान् के लिए तीन सम्बोधन करता है। अर्थात् भगवान् के लिए तीन गुण बतलाता है। (१) आनन्दगुण (२) चेतन्यगुण (३) सतगुण, इन गुणों को बतलाने के लिए तीन नाम १–कृष्ण २–पुरुष और ३-अधम कहे हैं।— १–कृष्ण नाम से कहा है, कि आप आनन्दरूप हैं। २–पुरुष नाम से कहा है कि आप चेतन्यरूप भी हैं तथा ३ अधम नाम से कहा है कि आप सद्रूप से प्रपञ्चरूप भी हैं। सदानन्दरूप, अपने उपकार करने वाले पुरुषार्थरूप आत्मा से कोई भी युद्ध करना नहीं चाहता है। इसीलिए जरासन्ध कहता है, कि तुझ से लड़ना नहीं चाहता हूँ और फिर विशेषता यह है, कि आप बालकों को भी सुख देने वाले हैं, तथा आपके एक एक बाल में ब्रह्मा विराजमान हैं, अतः जिसके शरीर में कोटिश ब्रह्माण्ड हैं, उसके साथ कार्य के लिए भी कौन लड़ने की सामर्थ्य रखता है ? और वैसे से लड़ने में लज्जा भी आनी चाहिए, अतः आप से युद्ध करना उचित नहीं है। लोक हँसेगा कि यह स्वामी से लड़ता है, अतः विशिष्ट लज्जा से भी न लडूँगा। यदि आप कहो, कि ये मेरी शक्तियाँ मैं दूसरे मैं स्थापित कर देता हूँ, तब तो तू लड़ेगा ? तो क्या कहता है, कि तब भी नहीं लडूँगा, क्योंकि तू गुप्त अर्थात् अव्यक्त है, अव्यक्त से कौन लड़ सकता है ? उसको कौन मार सकता है ? पराजय पक्ष में तुझ से ही मरना योग्य है, न कि दूसरे से अपनी कीर्ति भी हो, अतः यह भी योग्य है कि तुझ से रक्षित जो मैं हूँ उससे आपको लड़ना ही नहीं चाहिए तथा अन्य भी विशेष कारण यह है कि आप "अमन्द" हैं अर्थात् जहाँ माया नहीं है, ऐसे मोक्ष को देने वाले हैं। मोक्ष देने वाला तो आराध्य है, उससे कोई भी लड़ना नहीं चाहता है, अतः आप इस लड़ाई के कार्य को त्याग कर, जाके भक्तों तथा ज्ञानियों को मोक्ष दान करो। यदि आप कहो, कि मैं तो यादव हूँ, मोक्षदाता नहीं हूँ, तो यह कहना मुझे भुलावे में डालने के लिए कहते हो, क्योंकि यदि आप यादव हो तो अपने सम्बन्धी कंस आदि को कैसे मारा ? अतः यादवों को मारने से आप यादव नहीं हैं, किन्तु हमारे स्वामी ही हैं, जो अब आप दूसरे देखने में आते हो। ये वे वचन प्रकरण से विरुद्ध होने से उपेक्षणीय है, क्योंकि ये निन्दापरायण हैं, तथा शेष भ्रमित करने वाले वाक्य हैं ॥१८॥

आभास—एवं भगवन्तमयुद्धार्थं प्रार्थयित्वा तेनैव बलभद्रोपि निवृत्तो भविष्यतीति तं युद्ध याह्वयति त्वं त्विति।

आभासार्थ—जरासन्ध ने भगवान् को इस प्रकार युद्ध से निवृत्त होने की जब प्रार्थना की, तब यह विचार उसके हृदय में उत्पन्न हुआ, कि इस प्रार्थना से कदाचित् बलरामजी भी निवृत्त हो जाए, अतः उनको "त्वं तु राम" इस श्लोक से लड़ने के लिए आह्वान करता है।

श्लोक—त्वं तु राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह ।
हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि ॥१६॥

श्लोकार्थ—हे राम ! यदि लड़ने की श्रद्धा हो तो लड़, धीरज धर, मेरे शरों से छिन्न देह को त्याग स्वर्ग को जाओ अथवा मुझे मार ।

सुबोधिनी— तुशब्दः पूर्वप्राप्तार्थव्यावृत्त्यर्थः । अन्यथावयोर्बन्धुमारणं च तुल्यमिति कथं रामं गृह्णीयात् । तेन यादवा एव तस्य मारणीया इति सत्त्वव्यवहितानां सुतरामावेशिनां देहोऽस्तीति यादवत्वं सिद्धमिति वसुदेववैरं तत्पुत्रे पातनीयमिति वसुदेवे युद्धप्रतिप्रमवः । तत्रापि यदि श्रद्धेत्याह । अयं हि वसुदेवानुकल्पत्वेन द्विष्टो भवति । तथा सति यदि पितरि श्रद्धा, क्षत्रियत्वेन युद्धे वा, तदा युध्यस्व । आवयोर्यद्यपि समानं बलम्, तथापि सेना महतीति तद् दृष्ट्वा कदाचिद्भीतो भवेत् अत आह धैर्यमुद्वहेति । भगवद्व्यतिरिक्तानामन्यधर्मः प्रवर्तते इति, अन्तर्बलमस्तीति धैर्यमस्त्येव, बहिरपि धैर्यं सम्पादयेत्याह उदिति । ततो युद्धविष्यति तदनिश्चयेनाह हित्वेति । एकतरनिश्चये युद्धार्थं प्रवृत्तिरेव न स्यात् । अतो मच्छरैः छिन्नं देहं हित्वा धैर्यमुत् धैर्येण जातां मुदं स्वर्गलक्षणां वह । अथवा मच्छरैः छिन्नं देहं पित्वेति । 'सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतः' इति न्यायेन शरच्छादनं दूरीकृत्य मां जहि । अनेन प्रथममहमेव प्रहारं करिष्यामीति सूचितम् ॥१६॥

व्याख्यार्थ—"तु" शब्द पहले कही हुई बात को निवारणार्थ है. नहीं तो, हम दोनों को अथवा एक बन्धु को मारना बराबर ही है. तो राम को लडने के लिए क्यों आह्वान करता है ? इसका समाधान यह है कि इसको यादवों का नाश करना है, सत्व से व्यवहित अतिशयकर आवेश वालों का यह देह है इससे सिद्ध है कि राम यादव है. इसलिए राम का आह्वान किया है । वसुदेव का वैर उसके पुत्र पर डालकर राम से लडना मानों वसुदेव से ही लडना है । इसलिए कहा है, कि यदि पिता में श्रद्धा अर्थात भक्ति है, तो तू लड अथवा क्षत्रियपन में श्रद्धा है, तो भी लड़ । अपने दोनों में शक्ति समान है, किन्तु मेरी सैना बहुत है । यदि वह देख कर डर गए हो तो डर मत धीरज और हिम्मत धारण कर. भगवान से जो भिन्न है, उनका धर्म अन्य होता है. बलरामजी में भीतर बल तो है ही जिससे धैर्य भी है, उसको बाहिर प्रकट कर, इसलिए वह धातु के आगे "उत" उपसर्ग लगा कर "उद्वह" पद दिया है । लडने से जो होगा उसका निश्चय तो है ही नहीं । यदि किसी एक की जय वा पराजय का पूर्व ही निश्चय हो तो लडाई हो ही नहीं । अतः मेरे शरों से छेदी हुई देह का त्याग कर धैर्य करने से स्वर्ग की प्राप्ति के आनन्द को धारण करो, अथवा मेरे शरों से कटी हुई देह को त्याग विधि निषेध विशेषण में ही प्रयुक्त होते हैं । इस न्यायानुसार शरों का परदा हटा कर मुझे नष्ट कर, यों कहने से मागध ने यह बता दिया कि पहले मैं ही प्रहार करूंगा ॥१६॥

आभास—एवं बलभद्रं प्रति यत्स्वपौरुषं ख्यापितम्, तदयुक्तं मत्वा भगवान् निषेधति न वै शूरा इति ।

आभासार्थ—जरासन्ध ने जो बलरामजी के आगे अपनी सामर्थ्य की डींग हाँकी, वह उचित नहीं है। यों समझ भगवान् उसका "न वै शूरा" श्लोक में प्रतिवाद करते हैं।

श्रीभगवानुवाच –

श्लोक—**न वै शूरा विकत्थन्ते दर्शयन्त्येव पौरुषम्।**
न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥२०॥

श्लोकार्थ—भगवान् कहने लगे कि हे राजन् शूरवीर बकवाद नहीं करते हैं, किन्तु अपना पराक्रम कार्य करने से ही दिखाते हैं। हम आतुर तथा जिसकी मौत निकट आ गई है, उसके वचनों पर ध्यान नहीं देते हैं ॥२०॥

सुबोधिनी—ये हि शूरास्ते स्वख्यातिं न वदन्ति, किन्तु पौरुषमेव दर्शयन्ति। यदप्युक्तं 'न त्वया योद्धुमिच्छामी'ति, तत् तव वाक्यं न गृह्णीमः। अनेन तद्वाक्यमप्रमाणमित्युक्तम्। न हीश्वरेणामतं प्रमाणं भवति। तेन हि शङ्काद्वयेन युद्धं त्यक्तम्, मरणं भविष्यति, मोक्षे प्रतिबन्धो वा भविष्यतीति, तदुभयं न कर्तव्यम्, इदानीं न मारणीयः, मोक्षश्च देय इति। अत एव भगवान् सर्वस्वदानं कारयित्वा मोक्षं दत्तवान्। अतो युक्तमुक्तं न गृह्णीमो वच इति। किञ्च, हे राजन्! राज्ञां शूरक्षत्रियाणां युद्ध एव मुक्तिः। 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ। परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः' इति ब्राह्मणक्षत्रिययोः मोक्षप्रकारस्य प्रतिपादितत्वात्। तयोरेव च मोक्षोपदेशः 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदन' इत्यत्र निरूपितः। अतो मद्रक्षितेनापि त्वया युद्धं कर्तव्यम्, अहं तु त्वया सह युद्धं न करिष्यामि, बलभद्र एव करिष्यति, बलं परं मारणीयमिति भावः। अयमुपदेशोऽग्रे कार्यार्थः। अन्यथा भीमेनापि न युध्येत्। किञ्च, आतुरस्य वचनं न ग्राह्यम्। स हि स्वापथ्यमेव याचते। अनेन याचितं देयमिति पक्षो निवारितः। किञ्च, मुमूर्षतः मुमूर्षां प्राप्नुवतः। कृदन्तात् षष्ठी। स हि मोक्षं दूरीकृत्य वृथा मरणं वाञ्छति। तादृशं नाङ्गीकर्तव्यम् ॥२०॥

व्याख्यार्थ—जो सचमुच निश्चित शूरवीर होते हैं, वे अपनी प्रशंसा अपने आप नहीं करते हैं, परन्तु अपनी शूरवीरता दिखाते हैं। जो भी आपने कहा, कि मैं तुम से युद्ध नहीं करूँगा, वह आपका वचन ग्रहण नहीं करते हैं; सो कहने से भगवान् ने बता दिया कि मागध का कहना प्रमाण रूप नहीं है। जिसको ईश्वर नहीं मानते हैं, वह प्रमाण नहीं हो सकता है। इस शंकाद्वय से युद्ध छोड़ा, युद्ध से मरण होगा वा मुक्ति मिलेगी, ये दोनों अब नहीं करने हैं। अब नहीं मरना है और न मोक्ष देना है, इस कारण से ही भगवान् ने पहले उससे सर्वस्व अर्पण कराने के अनन्तर ही मोक्ष दी। अतः भगवान् ने ये वचन उचित ही कहे हैं कि तेरा कहा हुआ वचन ग्रहण नहीं करूँगा।

किञ्च हे राजन् ! शूरवीर जो क्षत्रिय राजा हैं, उनकी युद्ध में मरने से ही मुक्ति होती है। जैसा कि शास्त्र में कहा है "द्वाविमौ पुरुषोलोके सूर्यमण्डल भेदिनौ परिव्राड् योगयुक्तश्च रणेचाभिमुखो-हतः" अर्थ—लोक में योग युक्त सन्यासी, युद्ध में मरा हुआ शूरवीर, ये दोनों मुक्त हो जाते हैं।

इस प्रकार शास्त्रों में ब्राह्मण तथा क्षत्रियों के मुक्ति का मार्ग निश्चित सिद्ध किया हुआ है। उन दोनों को ही मोक्ष का उपदेश है। "यस्य ब्रह्म च क्षत्रं" इस श्रुति में भी यही बात कही है। अतः तू मुझ से रक्षा किया हुआ है, तो तुझ से राम लड़ाई तो करेंगे ही। मैं तो तेरे साथ युद्ध न करूँगा, कारण कि तेरी इस बडी सेना को तो नष्ट करना ही है। यह उपदेश आगे के कार्य के लिए है: जो यों उपदेश न दें तो भीम से भी न लड़े। बीमार का वचन कभी नहीं मानना चाहिए, क्योंकि वह सदैव कुपथ्य रोग में हानि करने वाली वस्तु की ही याचना करता है, किन्तु उसको वह नहीं देनी चाहिए, क्योंकि उस वस्तु के देने से उसका रोग बढ़ेगा। इसी प्रकार यहाँ भी यदि आपका कहा हुआ किया जाए तो आपकी ही हानि होगी और जो मरने के समीप है, वह भी बुद्धि शून्य हो जाता है। जिससे वह मोक्ष को हटाकर केवल मारना ही चाहता है, इसलिए उसका कहा भी नहीं करना चाहिए ।।२०।।

आभास—एवमुपदिष्टः युद्धं स्वहितं मन्यमान, ससामग्रीको युद्धार्थमागत इत्याह जरासुत इति।

आभासार्थ—इस प्रकार के उपदेश से युद्ध करने में अपना हित समझ कर सारी लड़ाई की सामग्री सहित सेना को लेकर युद्ध के लिए आया। जिसका वर्णन जरासुत श्लोक से श्री शुकदेवजी करते हैं।

श्रीशुक उवाच—

श्लोक—जरासुतस्तावभिसृज्य माधवौ महाबलौघेन बलीयसावृणोत्।
ससैन्ययानध्वजवाजिसारथी सूर्यानलौ वायुरिवाभ्ररेणुभिः ।।२१।।

श्लोकार्थ—शुकदेवजी कहने लगे कि जरासन्ध ने समीप जाकर, अपनी बड़ी सेना से रामकृष्ण को उनकी सेना, सारथि सहित रथ, ध्वजा, घोड़ों को इस प्रकार घेर लिया जैसे पवन बादलों से सूर्य को और रेणु से अग्नि को घेर लेता है ।।२१।।

सुबोधिनी—मातुः पुत्रोऽयम्। तत्रापि सा जरा, सर्वानेव विरूपान् करोति, कथमेनं त्यक्ष्यतीति। तत्रापि राक्षसी। तेन दुर्बुद्धिरप्ययं ज्ञापितः। अन्यथा तदुपदेशमेव गृहीत्वा, मरणं निश्चित्य, तेनैव सह किं युद्धं कुर्यात्। तौ कृष्णरामावभिसृत्य सर्वतः संवेष्टयित्वा महाबलौघेन

आवृणोत् । माधवाविति । मधुवंशोत्पन्नाविति भगवन्ताविति वा, धनं दास्यत इति वा, पित्रोः स्वबलं प्रदर्शनीयमिति वा । जेष्यामीति बुद्ध्या प्रवृत्त इति ज्ञापयितुं साधनाधिक्यमाह बलीयसा महाबलौघेनेति । महत्त्वं स्वरूपेण, तादृशानां बहुत्वमोघः अन्तस्सारं बलम् । एवं गुणत्रयस्य विद्यमानत्वात् आवरणं कृतवान् । भगवत्सहायं सर्वमेव स्वार्थं गृहीतवानित्याह ससैन्येति । सैन्य-सहितौ, यानसहितौ, तत्र ध्वजवाजिसारथिभिः सहितौ । अनेनैवमुक्तं भवति, केचन सैन्ये लग्नाः, केचन रथे, केचन ध्वजयोः, केचनाश्वेषु, सूतयोरिति । एतयोरसम्भावितमावरणमिति ज्ञापयितुं दृष्टान्तमाह सूर्यानलाविति । न ह्यावरणं सूर्यं स्पृशति, अग्निं वा, परं पश्यतां चक्षुः प्रतिरोधकमेव । वायुस्थानीयो जरासन्धः, अभ्राणि सूर्यावरकाणि, रेणवोऽग्नेः ।।२१।।

व्याख्यार्थ—यह मगध माता का पुत्र है, उसमें भी यह माता साधारण माता जैसी नहीं है, किन्तु जरा होने से सब को बदसूरत कर देती है, तो इसको कैसे छोड़ेगी ? केवल जरा नहीं, किन्तु राक्षसी भी है, जिससे वह जो दुर्बुद्धि हुआ है, यह भी बता दिया है । यदि यह नहीं बताया जाता तो उसका उपदेश लेकर, मरने का निश्चय कर उसके साथ युद्ध कैसे करें ।

जरासन्ध ने उन दोनों के समीप आ कर अपनी जबर्दस्त सेना से उनको चारों तरफ से घेर लिया । ये दोनों भ्राता मधुवंश में उत्पन्न हुए थे । इसलिए भगवान् अर्थात् षड्गुणसंयुक्त स्वरूप थे । अथवा लक्ष्मी के पति होने से धन देंगे, इसलिए मागध ने घेर लिया । अथवा माता पिता को अपनी शक्ति दिखानी थी, इसलिए घेरे में आ गए । जरासन्ध युद्ध में इसलिए तैयार हुआ कि उसकी बुद्धि में यह विचार था कि मैं जीतूंगा । कारण कि मेरे पास जीतने के लिए साधन बहुत हैं । वे दिखाते हैं ? "बलीयसा महाबलौघेन" अर्थात् स्वरूप से ही उसका महत्व था, ऐसों का बहुत समूह था और उन में भीतर शक्ति भी थी । इस प्रकार वैसे तीन गुणों के विद्यमान होने से ही घेरा डाला था । यों घेरे डालने का कारण यह था, कि भगवान् की सहायता करने वाले सर्व साधन अपने काम के लिए आधीन हो जाए । अर्थात् सैन्य सहित; यान सहित और ध्वजा घोड़े सारथी सहित ये दोनों मेरे शरण में आजाएँ किन्तु वैसा हुआ नहीं । श्री शुकदेवजी यह दृष्टान्त से स्पष्ट करते हैं कि जैसे पवन से चलायमान मेघ से सूर्य का आवरण तो हो जाता है परन्तु सूर्य का स्पर्शमात्र भी नहीं कर सकता है और रेणु भी अग्नि को आच्छादित कर देती है किन्तु अग्नि को छू नहीं सकती है । सारांश यह कि मेघ और रेणु केवल देखने वालों की दृष्टि को रोकने वाले होते हैं । इसी प्रकार सैन्य सहित इसका घेरा भी उनके सैन्य स्पर्श भी नहीं कर सका केवल मनुष्यों की दृष्टि में ही यह घेरा देखने में आ रहा था । उनका आवरण करना मागध के लिए असम्भव था । वे तो कोई सैन्य व्यवस्था में लगे थे, कोई रथ की गति में कोई ध्वजाओं की स्थिति में और कोई घोड़ों की तीव्रतावरोध* में लगे थे ।।२१।।

* तेजी को रोकना ।

आभास—अतः स्वरूपे फलस्यायुक्तत्वात् दृष्टौ तज्जातमित्याह सुपर्णताल-ध्वजचिह्नि ।

आभासार्थ—अतः जरासन्ध के घेरे का फल भगवत्स्वरूप में होना, अनुचित होने से केवल देखने में ही वह हुआ जिसका वर्णन "सुपर्ण" श्लोक से करते हैं—

श्लोक—सुपर्णतालध्वजचिह्नितौ रथावलक्षयन्त्यो हरिरामयोर्मृधे ।
स्त्रियः पुराट्टालकहर्म्यगोपुरं समाश्रिताः संमुमुहुः शुचार्पिताः ॥२२॥

श्लोकार्थ—गरुड़ और तालकी ध्वजा से चिह्नित राम कृष्ण के रथों को युद्ध में न देख कर, पुरी के अट्टालिकाओं, महत्व और नगर के बड़े दरवाजों पर चढ़ी हुई नगर की स्त्रियाँ शोक से दुःखी हो मूर्च्छित हो गईं ॥२२॥

सुबोधिनी—सुपर्णध्वजो भगवद्रथः। तालध्वजो बलस्य। सेनामध्ये पतिताविति रेणुभिः विजातीयध्वजादिभिश्च व्यवधानात् अलक्षयन्तः अपश्यन्तो जाताः। एको दुःखहर्ता, अपरो रमयतीति सुखदाता। उभयोरत्यावश्यकत्वात् तद-दर्शने व्याकुलता उचितैव। स्त्रियश्च तत्र मुख्यतया द्रष्टुं समागता इति युद्धानभिज्ञत्वात् रसान्तरपरिग्रहे स्ववैयर्थ्यं सूचयन्त्यः शोकेनार्पिता जाता इत्याह स्त्रिय इति। पुरस्य अट्टालकाः अत्युच्चा भवन्ति। हर्म्याणि राज्ञां गृहाः। पुरद्वारं चात्युच्चम्। एतानि समाश्रित्यापि अलक्षयन्त्यः सम्यक् मुमुहुः, मूर्च्छां प्राप्तवत्यः। ततो जागरणे शुचा चार्पिताः। कृष्णो हि भगवान् स्त्रीणामेवार्थे अवतीर्ण इति तद्बाधकत्वेनैव सैन्यं मारितवान्। न त्वन्यथेति स्वरूपविचारसिद्धयर्थमुक्तम्। अन्यथा सङ्कर्षणकार्ये भगवान् प्रविष्ट इति भवेत्। तच्चैकादशे न पुनरुक्तम् ॥२२॥

व्याख्यार्थ—गरुड़ की ध्वजा वाला भगवान् का रथ और ताल की ध्वजा वाला राम का रथ ये दोनों रथ सेना के मध्य में आ गए, तथा धूलों से और विजातीय ध्वजादि से रुकावट होने के कारण नगर की नारियाँ उनको देख न सकीं एक रथ जो भगवान् का है वह दुःखहर्ता है और जो दूसरा राम का है वह आनन्द दाता है दोनों के दर्शन अत्यावश्यक है, अतः उनके दर्शन न होने से, स्त्रियों की व्याकुलता होना उचित ही है, वहाँ देखने वाली में मुख्य रूप से स्त्रियाँ ही दर्शक थीं किन्तु स्त्री होने से युद्ध का नमूना नहीं जानती थीं, इसलिए अन्य रस की प्राप्ति होने से अपना यहाँ आना अथवा जन्म व्यर्थ समझ शोक युक्त हो गई शहर की अट्टालिकाओं बहुत ऊँची होती हैं, राज महल नगर के बड़े द्वार[1] भी बहुत ऊँचे होते हैं उन पर बैठी हुई भी नगर की नारियाँ न

१ भीतर जाने का फाटक ।

देख कर बहुत मूर्च्छित हो गईं जब कुछ होश में आती तो शक्ति से घिर जाती थीं, क्योंकि भगवान् कृष्ण तो स्त्रियों के लिए ही प्रकट हुए हैं उन स्त्रियों की सेना के कारण ही भगवान् के दर्शन न हुए इसलिए सैन्य का नाश किया गया नहीं, कि अन्यथा स्वरूप के विचार की सिद्धि के लिए यों कहा है, यदि यों न कहा जाए तो लोक समझने लगे कि संकर्षण के कार्य में भगवान् प्रविष्ट हुए हैं और वह फिर एकादश में नहीं कहा है ॥२२॥

श्लोक—हरिः परानीकपयोमुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितम् ।
स्वसैन्यमालोक्य सुरासुरार्चितं व्यस्फूर्जयच्छार्ङ्ग शरासनोत्तमम् ॥२३॥

श्लोकार्थ—शत्रुओं की सेना रूप बादलों से गिरती हुई बाण रूपी तीखी वृष्टि से पीड़ित, अपनी सेना को देख भगवान् ने, देव तथा दैत्यों से पूजित अपने शार्ङ्ग धनुष का टंकार शब्द किया ॥२३॥

सुबोधिनी—अतः स्त्रीणां दुःखनिवृत्त्यर्थं भगवान् सैन्यं निहतवानित्याह हरिरिति । सूर्यस्थानीयो हि भगवान् । तत्र मेघस्थानीयाः तदीयाः । अतस्तेषां निराकरणमनायासेनैव भविष्यतीति निरूपयितुं तेषां सेनामनुवदति परानीकपयोमुचामिति । शत्रूणामनीकमेव पयोमुचः मेघाः । तेषां शिलीमुखान्येवोल्बणवर्षः । तेन पीडितं स्वसैन्यम् । अनेन महाशूरा अपि, अहन्यमाना अपि, यथा वृष्टौ समागतायां सर्व एव भीताः पलायन्ते, न हि वृष्टिः कांश्चिन्मारयति, मृता वा भवन्ति केचन, तथापि महाशूरा अपि राजानमपि परित्यज्य पलायन्ते, तथा अत्र जातमित्युपहासार्थं निरूपितम् । स्त्रीषु कृपा, तेषु च हास्यरसमुत्पन्नमिति भावः । अत उभयोरपि हन्चिकीर्षया स्वशार्ङ्गं गृहीतवानित्याह सुरासुरार्चितमिति । सुराणां हितम्, असुराणां मोक्षम्, द्वयं दास्यतीति ज्ञात्वा शार्ङ्गं धृतवान्, विशेषेणास्फूर्जयत् । शार्ङ्गज्यानिनादः सुराणां चित्ते भयनिवर्तको भवतीति प्रथमं सन्देहनिवारणार्थमाश्वासनमुक्तवान् । 'यज्ज्यानिनादश्रवणात् सुराणां चेतांसि निर्मुक्तभयानि सद्यो भवन्ति' इति वाक्यात् । शार्ङ्ग एव शरासनेषु भगवदीयेषु उत्तमम् । अनेनाशनिबाणवर्षमिति तस्य द्वितीयं माहात्म्यमुक्तम् । भगवतः अनेकान्यपि धनूंषि सन्तीति बोधितम् । शरासनपदेन देवतारूपत्वं प्रतिषिद्धम् । अन्यथा माहात्म्यमुक्तं न भवेत् ॥२३

व्याख्यार्थ—इस श्लोक में कहते हैं, कि स्त्रियों को जो न देखने से दुःख हुआ था उसकी निवृत्ति के लिए भगवान् ने शत्रु की सेना को मारा भगवान् का नाम यहाँ हरि दिया है, जिससे दो आशय हैं, एक दुःखहर्ता है इसलिए स्त्रियों के दुःखों को मिटाने के लिए शत्रु सेना का नाश किया और जैसे सूर्य अन्धकार को मिटाता है वैसे ही यहाँ आप शत्रु सेना रूप अन्धकार को नाश करने के लिए सूर्य हैं, सूर्य के ताप से बादल आ जाते हैं वैसे यहाँ शत्रु सेना रूप बादलों ने आकर तीक्ष्ण

बाणों की वृष्टि से भगवान् की सेना को पीड़ित किया, जैसे वर्षा आने पर सब डर कर अपने-अपने घरों को भाग जाते हैं, यद्यपि वर्षा किसी को भी मारती नहीं है, कितनेक मर भी जाते हैं वैसे वाणों की वर्षा से भयभीत हुए बड़े-बड़े शूरवीर घायल न होने पर भी राजा को छोड़ कर भागने लगते हैं, यहाँ भी इस प्रकार होने लगा। यह उपहास के लिए कहा गया है स्त्रियों पर कृपा हुई जिससे उनमें हास्य रस उत्पन्न हुआ। भगवान् ने दोनों के हित के लिए अपना शार्ङ्ग धनुष ग्रहण किया,—वह धनुष देवता तथा दैत्यों से पूजित है, क्योंकि इस धनुष से देवताओं का भय निवृत्ति रूप हित होता है और दैत्यों को मोक्ष मिलता है भगवान् के अनेक धनुषों में "शार्ङ्ग" धनुष उत्तम है और जोर से उसकी टंकार की, टंकार इसलिए की, कि उससे देवों के चित्त में विश्वास हो जाए कि अब हमारा भय नष्ट होगा जैसे कि कहा है कि "शार्ङ्ग धनुष के टंकार से देवता शीघ्र ही निर्भय हो जाते हैं, यों उत्तमता कहने का आशय यह है, कि इस धनुष से वज्रवत् शरों की तेज वर्षा होती है, यह उसका दूसरा माहात्म्य बताया है। इससे यह भी प्रकट कर दिखाया है, कि भगवान् के पास अनेक धनुष हैं, 'शरासन" पद का भाव यह है, कि यह धनुष देवता रूप नहीं है यदि देवता रूप होता तो माहत्म्य नहीं कहते ॥२३॥

श्लोक—गृह्णन्निषङ्गादथ संदधच्छरान्विकृष्य मुञ्चन् शितबाणपूगान् ।
निघ्नन्रथान्कुञ्जरवाजिपत्तीर्निरन्तरं यद्वदलातचक्रम् ॥२४॥

श्लोकार्थ—शरों को तरकश से निकाल, धनुष में जोड़ कर, धनुष को खेंच, जो आप तीक्ष्ण बाणों के समूह को फेंकते हैं तो उनसे रथ हाथी घोड़े और पैदल चलती सेना का निरन्तर नाश हो जाता, क्योंकि उस समय धनुष अलातचक्र की भाँति कार्य करता हुआ दीखता था ॥२४॥

सुबोधिनी—इदानीं भगवतो युद्धचातुर्यमाह गृह्णन्निषङ्गादिति । अतितेजस्विनां स्वागमेपि स्वशक्तिस्तिष्ठतीति क्रियाशक्तेर्व्यापकता नित्यत चोक्ता भवति । निषङ्गात् तूणीरात् शरान् गृह्णन्, अथ तदनन्तरं तस्य योजनाप्रकारेण योजितवान् । ततो विकृष्य मुञ्चन्, ततः चतुरङ्गिणीं सेनां निघ्नन् । जात इति प्रत्येकं वा सम्बन्धः । चतुर्धा भगवत्कृतिः ।

व्याख्यार्थ—अब भगवान् का युद्ध में चातुर्य कैसा है वह वर्णन करते हैं विशेष तेजस्वियों की अपनी शक्ति अपने आगम-साधन-में भी रहती है इससे भगवान् को क्रिया शक्ति की नित्यता और व्यापकता कही है, तरकस से शरों को लेकर बाद में धनुष में जोड़ते थे फिर उससे खेंचकर फेंकते हुए उनसे चतुरंङ्गिणी सेना को मारने लगे, इस प्रकार समस्त क्रिया से आपका सम्बन्ध रहा जिससे यह भगवान् की चार प्रकार की कृति है।

कारिका—स्थानात् प्रच्यावनं पूर्वं साधने योजनं तथा ।
फलार्थं विनियोगश्च फलसिद्धिरिति क्रमात् ॥१॥

कारिकार्थ—पहले स्थान से (तरकस से सरों को निकालना) फिर उसी तरह साधन में (धनुष में उन शरों का जोड़ना) लगाना और फल के लिए उनका (शत्रु सेना का नाश कर विजय पाना) विनियोग करना, इस प्रकार करने से फल की सिद्धि की है ॥१॥

सुबोधिनी—मोचनसमयेपि ग्रहणमावर्तते चेत्, तदा क्रिया अपरिच्छन्ना भवति, नान्यथेत्यत आह निरन्तरमिति । अन्तराभावो यथा भवति तथेति । चतुर्णां विशेषणं । तदसंभावितं मत्वा दृष्टान्तमाह यद्वदलातचक्रमिति । अलातचक्रं परिभ्रममाणं सर्वत्र विद्यमानमिव मण्डलाकृति भाति, तद्वन्निरन्तरमिति सम्बन्धः। यद्यपि भगवतः क्रियाशक्तौ न सन्देहः, तथापि स्वयमपि वक्ष्यति । लोके निरूपणे असंभावना मा भवत्विति दृष्टान्तमप्याह । निषङ्गादित्येकवचनेनाक्षयतूणीरता निरूपिता । अथेति भिन्नोपक्रमेण । अनेन शरेण एतावत् मारयिष्यामीति पूर्वं सङ्कल्पो निरूपित; । तदेव च निघ्नन् जातः, अन्यथा काकतालीयवत् भगवत्प्रवृत्तिरपि स्यात् । ततश्च न पराक्रम; सिध्येदिति । एतावदथशब्देन निरूपितम् । सन्दधत् सम्यग् धनुषि योजयन् । शरानित्यस्त्रव्यावृत्त्यर्थम् । अन्यथा देवताया एव सामर्थ्यं भवेत् । शरानिति बहुवचनं सकृदपि बहूनां सन्धानं सूचयति । विकृष्य मुञ्चन्निति । मानुषक्रियैवात्र व्यापृता भगवता, न त्वलौकिकं किञ्चित्प्रकाशितमिति ज्ञापितम् । शितास्तीक्ष्णाः ते च बाणाश्च तेषां पूगः समूहो येषु । एकस्मिन् बाणे भगवत्क्रिया व्यापृतेति भगवता स मुक्त इति परिच्छेदे निवृत्ते सहस्ररूपः स एव जात इति बाणस्यानन्तत्वे प्रतिपादिते तेन मोचितशराणामपि अनन्तत्वं फलिष्यतीति तथोक्तम् । अन्यथा पुनरुक्तदोषः स्यात् । सन्धितानामेव विमोकस्य सिद्धत्वात् । नितरां घ्नन्निति सकृत् प्रहारेणैव प्राणवियोगः शरीरस्य शतधा खण्डाश्च प्रदर्शिताः । चतुरङ्गसेना सर्वैव मारिता इति ज्ञापयितुं गणनामाह । रथान् कुञ्जरान् वाजिनः पत्तयः पदातयः । पत्तीरिति स्त्रीप्रयोगः । एको वाणः एकां पत्तिमनेकां वा मारयतीति सूचयति । 'एकेभैकरथा अश्वा पत्तिः पञ्चपदातिके'ति । पत्तीनिति वा पाठः । शूराणां प्राणवियोगमात्रे न सामर्थ्यं सिध्यति । मर्मस्थानस्पर्शे अल्पप्रहारेणापि प्राणवियोगसम्भवात् ॥२४॥

व्याख्यार्थ—जिस समय शरों को फेंका जाता है, उस समय शरों को तरकस से लेने का कार्य भी होता था तब उस में अपरिच्छिन्नता रही है, यदि यों न होता तो क्रिया में परिच्छिन्नता होती इसलिए श्लोक में "निरन्तर" पद दिया है, जिस क्रिया में थोड़ा भी अन्तर न हो उसको निरन्तर की हुई क्रिया कहते हैं, इसलिए समस्त क्रियाएँ वर्तमान काल में दी हुई है, यों एक ही काल में सब

होना असम्भव है, इस प्रकार किसी के मन में शंका उत्पन्न हो तो उसको मिटाने के लिए दृष्टान्त देकर समझाते हैं 'यद्वदलातचक्रम्" जैसे अलातचक्र जब घूमता है तब चारों तरफ एक ही समय घूमता हुआ दीखता है उसी भाँति यहाँ भी समझ लेना चाहिए । यद्यपि भगवान् की क्रियाशक्ति में किसी प्रकार सन्देह नहीं है, तो भी अपने आप भी कहेंगे, इस प्रकार निरूपण करने में लोक में असम्भावना न होवे इसलिए दृष्टान्त भी कहते हैं श्लोक में "निषङ्गस्" एक वचन दिया है जिस से जाना जाता है कि तरकस एक ही था किन्तु वह अक्षय शरों का निवास था अर्थात् उसमें अक्षय शर थे, "अथ" शब्द देकर यह बताया है, कि अब अलग विषय का प्रारम्भ करते हैं, इस शर से इतनों को मारूँगा इस प्रकार का संकल्प भगवान् पहले ही कर लेते थे बाद में शर फेंकते थे, फेंकते ही उनका नाश उस काल ही हो जाता, यदि यों न हो तो भगवान् की कृति भी काकतालीय न्याय के समान हो जाती, उससे कोई पराक्रम सिद्ध न होना चाहिए, किन्तु भगवान् की क्रिया की प्रवृत्ति का फल पराक्रम तो प्रत्यक्ष प्रकट है ही, इतना आशय "अथ" शब्द का निरूपण किया है। सन्दधत् शब्द का अर्थ है, अच्छे प्रकार से शरों को जोड़ते हुए "शरात्" शब्द कह कर बताया कि अस्त्र नहीं है किन्तु शस्त्र है यदि शस्त्र नहीं अस्त्र हो, तो देवता का ही सामर्थ्य हो जाए "शरान्" बहुवचन देकर यह सिद्ध किया है, कि एक ही काल में बहुत शरों को धनुष में जोड़ देते हैं "विकृष्य मुञ्चन्" इस पद से यह दिखाया है, कि यहाँ भगवान् ने मानुष क्रिया ही ग्रहण की है, कुछ भी अलौकिकता प्रकट नहीं की है, एक एक बाण भगवान् की क्रिया शक्ति से युक्त था, इस लिए वह एक को भी जब भगवान् फेंकते थे तब उसका परिच्छेदपन निवृत्त हो कर वह सहस्र रूप हो जाता फिर उनका समूह होता था जिससे वे अनन्त होकर अनन्त शरीरों की मुक्ति कर देते थे, अन्यथा पुनरुक्ति दोष हो जाता, क्योंकि जोड़े हुए शरों को फेंकना ही सिद्ध होने से । 'निघ्नत्" पद का भावार्थ है कि एक प्रहार से ही प्राण निकल जाते और शरीर के सैकड़ों टुकड़े हो जाते, चतुरंग, जितनी भी सेना थी वह सारी नष्ट कर दी गई, यों मालूम करने के लिए उसकी गणना करते हैं। रथ, हाथी, घोड़े और पैदल सेना। एक बाण एक सेना को अथवा अनेकों को मारता है यह सूचित किया है जैसे कि कहा "एकेभैकेरथा अश्वापत्तिः पंचपदातिका" अर्थात् एक रथ, एक हाथी, तीन घोड़े और पांच प्यादे, इसको भी एक प्रकार की सेना कहते हैं, शूरवीरों का सामर्थ्य केवल प्राण वियोग से सिद्ध नहीं होता है क्योंकि ममस्थान पर अल्पप्रहार से भी प्राण निकल जाते हैं ॥२४॥

आभास—अथो भगवतः क्रियाशक्ति बोधयितुं बाणानां महत्कार्यमाह निर्भिन्न-कुम्भा इति ।

आभासार्थ—अतः भगवान् की क्रियाशक्ति का बोध कराने के लिए "निर्भिन्न-कुम्भाः" श्लोक में बाणों के महान् कार्य का वर्णन करते हैं—

श्लोक—निर्भिन्नकुम्भाः करिणो निपेतुरनीकशोऽश्वाः शरवृक्णकन्धराः ।
रथा हताश्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकन्धराः ॥२५॥

श्लोकार्थ—फाड़े हुए गण्डस्थल वाले हस्ती, बाणो से कटी हुई गरदन वाले अनेक घोड़े नष्ट हुए हैं घोड़े, ध्वजा, सूत और नायक जिनके वैसे रथ टूटी हुई भुजाएँ छगनी और ग्रीवा जिनकी वैसे प्यादे, ये सब रण के मैदान में गिर गये थे ।

सुबोधिनी—करिणो हस्तिनः नितरां खण्डशो निर्भिन्नाः । यद्यपि निर्भिन्नकुम्भाः करिण एव भवन्ति, तथापि स्वतन्त्रः करो मेषामितिति षष्टिहायनपरः करि शब्दः । अनीकशः अश्वा एकैकेन शरेण वृक्णाः कन्धरासु केशाः सन्तीति तत्र बाणप्रचारो न भविष्यतीति कन्धरपदम् । रथास्तु, हता अश्वा ध्वजाः सूता नायकाश्च येषां, तादृशा जाताः । नत्वेकमारणेन शिष्टं दैवान्मृतमिति । रथोऽपि अवयवशः वृक्णः इति ज्ञातव्यम् अन्यथा निपेतुरिति क्रियासम्बन्धो न स्यात्, अन्यथा जाता इति क्रियान्तरं कल्प्यं प्रसज्येत । पदातयश्च निपेतुः । आघातेनापि पतन्तीति तेषां विशेषणमुच्यते । छिन्नाः भुजाः ऊरवः कन्धराश्च येषाम् । उरु स्थूला वा कन्धरा । नाभेरधो बाणप्रहारस्य निषिद्धत्वात् । अनेन शिरश्छेदः अर्थादुक्तः ॥२५॥

व्याख्यार्थ—हस्ती अतिशय टुकड़े-टुकड़े हो गए, हालांकि फाड़े हुए गण्डस्थल वाले 'करि' ही होते हैं, तो भी जिनकी सूंड * स्वतन्त्र हो जाती है वे हस्ती साठ वर्ष के होते है, यहाँ 'करि' शब्द वैसे हाथियों के लिए दिया है अनेक घोड़े एक-एक शर से नाश को प्राप्त हुए, यहाँ "कन्धरा" पद इस लिए दिया है, कि उसके ऊपर केश होते हैं केशों पर बाण का प्रहार असर न करेगा बाण के प्रहार का असर तो ग्रीवा पर ही होगा अतः "कन्धरा" शब्द उचित ही है, रथ तो मरे हुए घोड़े वाले, नष्ट हुई ध्वजा वाले और सूतनायक भी जिनके मृत हुए हैं वैसे हो गए, यों भी न समझना चाहिए कि एक के मरने से शेष देव से मरा, रथ भी समग्र अवयवों सहित नष्ट हो गया यों जानना चाहिए जो यों नहीं माना जाएगा तो 'निपेतुः" क्रिया का सम्बन्ध सब के साथ न हो सकेगा, यदि "निपेतुः" क्रिया का सम्बन्ध न समझा जाएगा तो दूसरी क्रिया "जाताः" की कल्पना करनी पड़ेगी, अतः "निपेतुः" क्रिया सब के साथ सम्बन्ध वाली है यह ही युक्त है इसलिए आचार्य श्री आज्ञा करते हैं कि "पदातयश्चनिपेतुः" इस वाक्य में "च" शब्द देकर सर्व के साथ

---

* साठ वर्ष के हस्तियों के गण्डस्थल ढीले पढ़ते हैं जिससे सूंड उनसे सटी हुई नहीं रहती है अतः वह सूंड स्वतन्त्र कही जा सकती है—अनुवादक

सम्बन्ध बताया है, यदि कोई कहे, कि चोट लगने से भी गिर पड़ते हैं तो इसका समाधान करते हुए कहते हैं कि यदि चोट से गिरे होते तो उनकी भुजाएँ, छातियाँ, ग्रीवाएँ अलग-अलग छिन्न होके गिरती नहीं, युद्ध शास्त्र में नाभि से नीचे शरीर में बाण के प्रहार का निषेध है । इससे ऊपर के भाग का टूटना ही कहा है ।।२५।।

आभास—एवं चतुरङ्गसेनामारणमुक्त्वा तस्याधिक्यं वक्तुं तेन जाता रुधिरनदीर्वर्णयति संच्छिद्यमानेति सार्धाभ्याम् ।

आभाषार्थ—इस प्रकार चतुरंगिणी सेना को मृत्यु कह कर अब उसकी अधिकता दिखाने के लिए उससे उत्पन्न रुधिर की नदी का "संछिद्यमान" श्लोक से लेकर २।। श्लोकों से वर्णन करते हैं—

श्लोक—संछिद्यमानद्विषपदेभवाजिनामङ्गप्रसूताः शतशोऽसृगापगाः ।
भुजाहयः पूरुषशीर्षकच्छपा हतद्विपद्वीप हयग्रहाकुलाः ।।२६।।
करोरुमीना नरकेशशैवला धनुस्तरंगायुधगुल्मसंकुला ।
अच्छूरिकावर्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः ।।२७।।
प्रवर्तिता भीरुभयावहा मृधे मनस्विनां हर्षकरीः परस्परम् ।

श्लोकार्थ—मनुष्य, हस्ती तथा घोड़ों के कटे हुए अंगों से सैकड़ों रुधिर की नदियाँ बहने लगी, जिनमें भुजाएँ सांप जैसी दीखती थीं मनुष्यों के सिर कछुओं के समान नजर आते थे, मरे हुए हाथीं टापू से और घोड़े मगर से दृष्टि में आते थे हस्त ही बड़ी मछली के समान दीखते थे अथवा हस्त तथा छाती ही मछलियाँ थीं, मनुष्यों के केश ही शेवाल+ था धनुष तरंग थे, शस्त्र झाड़ी थी, ढालें भँवर थे और अमूल्य बड़ी-बड़ी मणियों के उत्तम आभूषण पत्थर तथा पँवारे से नजर आते थे युद्ध में बहती हुई इस रुधिर की नदियों को देख डरपोक तो घबराते थे और शूरवीर परस्पर प्रसन्न होते थे ।। २६, २७, २७।। ।।

+ सवार-पानी की लताएं ।

सुबोधिनी—चतुरंगेषु त्रय एव रुधिरवन्तः, एकं दारुमयम्। अतस्त्रीन् गणयति। द्विपदाः मनुष्याः, इभाः हस्तिनो वाजिनश्च, तेषामङ्गै छिन्नैः प्रसूताः शतशः असृगापगा जाताः। अनेन मृतानां निर्भयत्वं सूचितम्। अन्यथा भयेन रुधिरशोष एवं स्यात्। विजातीया अपि एकैकप्रकृतिका जाता इत्यपि। अङ्गपदं तु तेषां हनने जाते दैवकृतां रुधिरवृष्टिं व्यावर्तयति। प्रशब्देन मरणानन्तरमपि संस्कारेणापि भयाभावः सूच्यते। अन्योन्यं प्रवाहमेलनात् पूर्वं नामान्तरमप्यापन्नाः पश्चादनेकानि नामानि प्राप्नुवन्तीति शस्प्रत्ययः। असृगापगा रुधिरनद्यः। ननु नदीत्वं कुतः, नहि प्रवाहमात्रेण नदीत्वं भवति, अन्यथा वर्षाकाले जगदेव नदी स्यादित्याशङ्क्य नदीसमानाकृतित्वसिद्धचर्थं वर्णयति भुजाहय इति। भुजा एवाहयः सर्पा यत्र। पूरुषशीर्षाण्येव कच्छपा यत्र। एतत्सात्त्विकम्। हता ये द्विपास्त एव द्वीपप्रायाः। द्विर्गता आपो यत्रेति। तस्मिन् द्वीपे छिन्ना ये हयाः अश्वास्त एव हि ग्रहा ग्राहाः। तैराकुलाः। द्वीपा एव तामसा नदीत्वख्यापकाः। तथापि तत्र प्रवाहेण गच्छतां हयावयवानामारोहावरोहौ द्वीपाधिक्यार्थमेव निरूपितौ। आगन्तुका एवैते नदीधर्माः, न तु सहजा इति। साधारणान् वर्णयति करोरुमीना इति। करा एव उरु अधिका मीना यत्र। करा ऊरवश्च मीना इति वा। मध्यच्छेदे शिष्टो भागः ऊरुशब्देन ग्राह्यः। उरुशब्द एव वा। नराणां केशा एव शैवालानि शैवाला यत्र। धनूंष्येव तरंगाः। मीनाः सात्त्विकाः। तरङ्गास्तामसाः इति। त्रयं पूर्वेण वा। नरके शान्तास्त्रयः। आयुधान्येव तृणोरादीनि गुल्माः, तैः सङ्कुलाः। अत एव धनुस्तरङ्गाश्च ताः आयुधगुल्मसंकुला इति कर्मधारयः। अच्छूरिकान्येव आवर्ताः। तैर्भयानकाः। अच्छूरिकाश्चक्राणि चर्माणि वा। अनेनातिगाम्भीर्यं नद्याः प्रदर्शितम्। महामणिप्रवेका महामण्युत्तमाः, तद्युक्तान्याभरणान्येव शर्करा यासाम्। पुरातननदीस्थाने कदाचित्पतितं रुधिरं जलेन सहितं तथा जातमिति शङ्कां व्यावर्तयति प्रवर्तिता इति। नूतनतया प्रवर्तिताः। पूर्वस्माद्वैलक्षण्यमाह भीरुभयावहा इति। भीरूणामेव भयावहाः। मनस्विनां तु हर्षकरीः। अन्येषां तु साधारणा यथावद्वर्णिताः। परस्परमिति समयुद्धे। अन्यायुद्धे तु जयशीलानां प्रायेण हर्षो भवतीति नाश्चर्यमेतत्।

व्याख्यार्थ—सेना के चार अङ्गों में से तीन रुधिर वाले हैं, एक काष्ठ का होने से रुधिर शून्य है, अतः यहां तीन ही गिने हैं, मनुष्य, हाथी और घोड़े उन तीनों के कटे हुए अङ्गों से सैंकड़ों खून की नदियां निकलीं, इससे अर्थात् इतनी खून की नदियों के निकलने से यह बताया कि यह सेना डरपोक नहीं थी, यदि डरपोक होती तो मरे हुए सैन्यों से खून की नदियाँ न निकलती थी भय से खून सूख जाता है, ये, विजातीय होते हुए भी, एक सी प्रकृति वाले हो गए, सेना के टूटे हुवे अङ्गों से खून की नदियाँ बहीं, इस वाक्य में अङ्ग पद कहने का आशय यह है, कि कोई यों न समझे कि इनके मरने पर देवों ने रुधिर की वृष्टि की है, अर्थात् ये रुधिर की नदियाँ इनके अङ्गों से ही निकली हैं ॥प्रसूताः॥ पद में ॥प्र॥ अक्षर देने का यह आशय है कि मरने के बाद भी इनके हृदय में संस्कार से भी भय नहीं रहा है, ॥शतशः॥ पद में शस्॥ प्रत्यय देने का भाव बताते हैं कि परस्पर प्रवाह के मिलने से पहले दूसरे नाम वाली होते हुए भी पश्चात् अनेक नाम को धारण किया है। ये नदियाँ

जल की नहीं थीं किन्तु रुधिर की थी, शंका होती है कि इस रक्त प्रवाह को नदी कैसे कहा जाता है, केवल प्रवाह से नदी नहीं बनती है, यदि प्रवाह को नदी कहा जाता है तो वर्षा काल में जगत् ही नदी रूप हो जाएगा ? इस शंका का समाधान करते हुए कहते हैं, कि ये नदियाँ सहज नदियाँ नहीं हैं किन्तु नदी समान आकृति वाला प्रवाह होने से नदियाँ कहलाती हैं, जिसकी सिद्धि के लिए वर्णन करते हैं, कि नदियों में जो जो दृश्य देखे जाते वे सब इन में भी हैं जैसे कि–भुजाएँ ही सर्प हैं, पुरुषों के मस्तक कछुवे हैं ये सात्विक हैं हस्ति टापू है उसमें मरे हुए घोड़े मगरमच्छ है, उनसे व्याकुल हुए हैं, टापू ही तामस हैं वे नदीपन को प्रसिद्ध करते हैं, तो भी वहाँ के प्रवाह से बहकर जाते हुए घोड़ों के अवयवों का जो चढ़ना और उतरना अर्थात् नीचे ऊपर होना टापुओं की अधिकता दिखाने के लिए ही वर्णन किया है, अतः ये नदी के जो धर्म हैं वे आगन्तुक हैं सहज नहीं हैं, नदी ये साधारण धर्मों का वर्णन करते हैं–हस्त जिनमें बड़े मत्स्य हैं, अथवा हस्त तथा छातियाँ ही बड़े मत्स्य हैं, बीच के भाग को काटने पर जो शेष भाग रहता है उसको ।।उरु।। जानना, मनुष्य के केश सेंवार है, मनुष्य ही तरंग हैं, मछलियाँ सात्विक हैं तरंग तामस है, अथवा उरु के साथ जो तीन है उनको लेना चाहिए, नरक में तीन ही शान्त हैं, भाथे आदि आयुध ही मकड़ी है, उनसे घिरी हुई है, इस लिए ही ।।धनुस्तरंगायुधगुल्मसंकुला।। पद का इस प्रकार कर्मधारय समास किया है, ।।धनुस्तरंगश्चताः आयुधगुल्मसंकुला।। ढालें ही भंवर है उनसे ये नदियाँ भयानक दिखती हैं और इससे नदी की अतिशय गम्भीरता भी दिखाई है, उत्तम मणियों से युक्त आभूषण ही जिन नदियों में पत्थर वा पंवारे हैं यदि कोई कहे कि यह रुधिर की नदी वैसी तब हुई है जब वह रुधिर प्राचीन नदी में गिरा है उस नदी के जल से मिलने पर इतना ज्यादा हो गया है जो नदी सा प्रतीत होता है अन्यथा नहीं होता, इस शंका के मिटाने के लिए श्लोक में ।।प्रवर्तिता।। पद दिया है जिसका भावार्थ है कि यह रुधिर की नदी नवीन प्रवृत्त हुई है अर्थात् पहले की नदी के जल से मिलकर प्रवृत्त नहीं हुई है, अगली प्राचीन से इस नदी की विलक्षणता बताते हैं, कि डरपोकों को डराने वाली है वह पुरानी जल की नदी डराती नहीं है, वीरों में तो हर्ष पैदा करती है दूसरों के लिए तो साधारण है, जैसी वर्णन की है वैसी ही देखते हैं उनको न भय होता है और न प्रसन्नता होती है ।।परस्परम्।। का तात्पर्य है कि समान युद्ध में जय होने पर आपस में योद्धे प्रसन्न होते ही हैं किन्तु अन्याय की लड़ाई में तो जीतने वालों को बहुत करके प्रसन्नता होती है इस में कोई आश्चर्य नहीं है ।। २६, २७. २७½

आभाष—**एवं भगवत्कृतं सपर्यवसानं युद्धमुक्त्वा बलभद्रकृतमाह विनिघ्नतारीनिति ।**

आभासार्थ—इस प्रकार भगवान् के किए हुए युद्ध का सम्पूर्ण वर्णन कर अब "विनिघ्नातारीन्" श्लोक से बलभद्र कृत कहते है ।

श्लोक—विनिघ्नातारीन्मुसलेन दुर्मदान्संकर्षणेनापरिमेयतेजसा ।।२८।।

श्लोकार्थ—अमित तेज वाले बलभद्रजी ने दुर्मदवाले वैरियों को मूसल से मार कर रुधिर की नदियाँ बहा दी ॥२८ ॥

सुबोधिनी—अरय: कथञ्चित् हन्तव्या:। भगवतस्त्वरयो न सन्तीति बलभद्रे तदुक्तम्। हलेनाकृष्य मुसलेन विनिघ्नता सङ्कर्षणेन सह। भगवान् गृह्णान् निषङ्गादित्यादि जात इति पूर्वेणैवान्वय:। अथवा। अरीन् विनिघ्नता सङ्कर्षणेन कृत्वा नद्य: प्रवर्तिता इति। हनने हेतु: दुर्मदानिति। दुष्टो मदो येषां उद्धृत्तिकरणरूप:। सङ्कर्षणपदेनैव तेषामाकर्षणं निरूपितम्। सामर्थ्ये हेतुमाह। अपरिमेयं तेजो यस्येति। अन्तर्बलमस्त्येव, बहिस्तेजोपि। कस्याप्येतावदिति मातुमशक्यम् ॥२८॥

व्याख्यार्थ शत्रुओं को कैसे ही मारना चाहिए, भगवान् के तो कोई शत्रु है ही नहीं इसलिए यह कार्य बलभद्र ने किया, बलभद्र संकर्षण है इसलिए उनमें खेंचने की शक्ति है जिससे उसने शत्रुओं को मुसल से खेंच लड़ाई में मारने के लिए खड़ा किया उस (संकर्षण) के साथ भगवान् भी तरकश से शरों को निकाल अपना कार्य करते थे, अथवा शत्रुओं को नाश करते हुए संकर्षण ने इन रुधिर की नदियों को बहने में प्रवृत्त किया, शत्रुओं के मरने का कारण यह था, कि वे दुष्ट मद वाले हो गये थे, जिससे वे उलटे कार्य कर पृथ्वी के भार भूत हो गए थे, बलरामजी को सामर्थ्य में कारण कहते हैं, कि असीम तेज वाले हैं भीतर तो बल है ही किन्तु बाहर भी तेज प्रकट कर दिखाया है, किसी का भी इतना बल व तेज नहीं है इसलिए भी नापा नहीं जाता है ॥२८॥

आभास—**एवमुक्तं युद्धमुपसंहरति बलमिति।**

आभासार्थ—इस प्रकार कही हुई युद्ध को समाप्ति करते हैं, जिसका वर्णन "बलं तदंगार्णवं" श्लोक में करते हैं।

श्लोक—**बलं तदङ्गार्णवदुर्गभैरवं दुरन्तपारं मगधेन्द्रपालितम्।**
क्षयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयो: परम् ॥२९॥

श्लोकार्थ—अश्व आदि अंग रूप अर्णवों से दुर्ग में तथा भयानक जरासन्ध से पालित,अपार अन्तवाली सेना को वसुदेव के पुत्र ने क्षण में नाश किया वह कार्य उनकी विशेष क्रीड़ा ही है, क्योंकि वे जगत् के ईश हैं।

सुबोधिनी—शीघ्रमुपसंहारे ततोऽपि महत्त्वं भवतीति बलमिति। अङ्गैरश्वादिभि: अर्णवरूपै: दुर्गं भैरवं भयानकं च। अनेन स्वरूपतो माहात्म्यमुक्तं बलस्य। दुरन्ता: पाला यस्येति बलस्य

रक्षकाः । सङ्गे समागताः राजानः दुरन्ताः । न हि तेषामन्तं कश्चित्कर्तुं शक्तः । ततोऽपि माहात्म्यमाह मगधेन्द्रपालितमिति । जरासन्धेन पालितम् । इन्द्रपदेन सर्वतो बलस्य समृद्धता द्योतिता । एतादृशमपि क्षणमध्ये क्षयं प्रणीतम् । एतदपि वसुदेवपुत्रयोः क्रीडितम् । यद्यपि वसुदेव-पुत्रत्वेन नाट्यं कृतम् । तथा सति पुत्रत्वनि-र्वाहार्थं प्रयासोऽपि बाललीलायामिव प्रकाश-नीयः । तथापि न प्रकाशितम्, किन्तु क्रीडयैव सर्वं मारितमिति । एव करणे वेतुमाह जगदीश-योरिति । सर्वजगत एव ईश्वरयोः । नहीश्वरः सदैकरूपो भवति । कदाचिदभिनय करोतीति सर्वदा अभिनयमेव करिष्यति । परमित्यनेन विशेषक्रीडायामप्यनादरः, ततोऽप्यल्पमिति सूच-नार्थः ।। २९ ।।

व्याख्यार्थ—इस श्लोक में दिखलाते हैं कि शीघ्र ही युद्ध को समाप्ति कर दिखाई, जिससे भगवान् का आगे से भी विशेष महत्व प्रकट हुआ है, सेना का स्वरूप से माहात्म्य बताते हैं, कि वह बल अश्व आदि अंगों से समुद्र रूप बन गया है जिससे जाने में कठिन और भयानक है मगध के संग में आए हुए राजा ऐसे है जिनका कोई अन्त पा नहीं सकता है उनसे यह सेना रक्षित है उससे भी विशेष सेना का माहात्म्य इससे है, जो जरासन्ध से पाली हुई है जरासन्ध को मगध देश का इन्द्र कह कर यह प्रकट किया है, कि सेना सर्व प्रकार से समृद्ध है वैसी सेना को क्षण में नष्ट कर दिया, नष्ट करने में वसुदेव के पुत्र को कोई परिश्रम न हुआ, क्योंकि यह तो उनके लिए बाल क्रीड़ा ही थी, जो वसुदेव के पुत्रपन से यह खेल ही किया है, तो भी पुत्रत्व के निर्वाह के लिए, बाल लीला की भाँति प्रयत्न भी प्रकट करना योग्य है तो भी प्रकट नहीं किया, किन्तु सर्व को क्रीड़ा से ही मारा है यों करने का कारण बताते हैं, कि सारे जगत् के ईश्वर हैं, ईश्वर सदा एक रूप नहीं होते हैं, कभी खेल भी करते हैं इस प्रकार सदा ही खेल ही करेंगे । "परं" पद से यह बताया है कि विशेष क्रीड़ा में भी आदर नहीं है, इस कारण से भी थोड़े समय में सर्व क्रीड़ा कर विशेष क्रीड़ा में भी अनादर सूचित किया है ।।२९।।

आभास—ननु किमित्येषा कथा वर्णिता विशेषाकारेण, सामान्यत एवैतद्वक्तव्यम्, जरासन्धसमानीतसैन्यस्य बहुशो वधं कृतवानिति, अल्पे हि पौरुषत्वेन युद्धं वर्णनीयम्, न तु भगवतीति चेत्, सत्यम्, इत्याह स्थित्युद्भवान्तमिति ।

आभार्थ—यह युद्ध का वर्णन विशेष रूप से क्यों किया ? साधारण रीति से ही करना चाहिए था, जैसा कि जरासन्ध की लाई हुई सेना को बहुत प्रकार से बध किया इस प्रकार थोड़े में ही पुरुषार्थ न दिखा कर युद्ध का वर्णन करना चाहिए, न कि भगवद्रूप में इतना विस्तार करना था, यदि यों कहते हो तो, सत्य है, इस प्रकार की शंका का समाधान "स्थित्युद्भावन्तं" श्लोक में करते हैं ।

**श्लोक—स्थित्युद्भवान्तं भुवनत्रयस्य यः समीहतेऽनन्तगुणः स्वलीलया ।
न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ॥३०॥**

श्लोकार्थ—जो अनन्त गुण वाले भगवान् हैं वह लीला से ही त्रिलोकी को उत्पत्ति, स्थिति तथा लय करते हैं उन्होंने शत्रु पक्ष को दण्ड दिया इससे कुछ भी आश्चर्य नहीं है, तो भी मनुष्यावतार धारण करने के कारण यह कथा विस्तार से वर्णन की गई है ॥३०॥

सुबोधिनी—यस्त्वनन्तः सर्वतः परिच्छेदरहितः, स्वरूपविचारे क्रियमाणे । गुणविचारे त्वाह अनन्तगुण इति । अनन्ताः कोटिब्रह्माण्डेषु यावन्तः पदार्थाः तावद्गुणो भगवान् । ततोऽप्यधिक इति मुख्यः सिद्धान्तः । कांश्चिद्गुणान् प्रकटीकरोति । क्रियाविचारे त्वाह । भुवनत्रयस्य स्थित्युद्भवप्रलय स्वस्य लीलामात्रेण समीहत इति । तत्र कियदिदं बलम् । अतः तस्यैतन्न चित्रम् । तथापि तस्य परपक्षनिग्रहो वर्ण्यते भक्तिस्थापनार्थम् । नन्वीश्वरे परपक्षनिग्रहव्यतिरेकेणापि महत्त्वादेव भक्तिर्भविष्यति, किं निग्रहवर्णनेनेत्याशङ्क्याह मर्त्यानुविधस्येति । भगवान् मर्त्यानुविधानं करोति । तथा सति कदाचिद्भक्तपक्षपात न कुर्यात्, अन्यधर्माभिनिवेशादिति । तत्रापि चेन् भक्तपक्षपात कुर्यात्, तदा निःसन्दिग्धं भक्तिमार्गः प्रवर्तेति । अत एव वर्ण्यते विशेषाकारेणेति ॥३०॥

व्याख्यार्थ—रूप के विचार करने से ज्ञात होता है, कि भगवान् चारों ओर परिच्छेद रहित होने से अनन्त हैं, तथा उनके गुणों का विचार करने से भी मालूम होता है कि उनके गुण भी अनन्त हैं कोटि ब्रह्माण्डों में जितने पदाथ हैं उतने गुणों वाले भगवान् है किन्तु उनसे भी अधिक असीम गुण भगवान् के हैं यह ही मुख्य शास्त्रीय सिद्धान्त है भगवान्, कुछ गुणों को प्रकट करते हैं, भगवान् की क्रिया शक्ति का विचार करते हुए जाना जाता है कि वह अपनी लीला मात्र से ही जगत् की उत्पति, स्थिति तथा लय करते हैं, जो इतना कार्य लीला मात्र से कर सकते हैं, उनके लिए यह सेना कितनीक है ? अर्थात् कुछ नहीं है, अतः भगवान् इस सेना का निग्रह करें, यह अचम्भे की बात नहीं है, तो भी उनने जो शत्रु पक्ष का नाश किया है, इसका इतना विशेष वर्णन भक्ति की स्थापना करने के लिए किया गया है इस पर वादी कहता है कि शत्रु पक्ष का नाश करने के सिवाय भी महत्व होने से ईश्वर में स्वतः भक्ति होगी हो, तो सेना के मारने के वर्णन करने को क्या आवश्यकता है ? जिस का उत्तर देते हैं कि भगवान् ने अबक्मनुष्य नाटय किया है अतः मनुष्य की भांति ही सर्व लीला कर दिखानी है यों करने से कभी भक्त का पक्षपात नहीं करना चाहिए, क्योंकि यों करने से अन्य धम का अभिनिवेश होगा, वहाँ भी यदि पक्षपात करें, तब निश्चय भक्ति मार्ग प्रवृत्त होगा ही अतः विशेष रूप से वर्णन किया है ॥३०॥

आभास—**एवं दूषणं परिहृत्य जरासन्धेन बलभद्रं प्रति यदुक्तं तद्बलभद्रः कृतवानित्याह जग्राह विरथमिति ।**

आभासार्थ—इस प्रकार विशेष वर्णन करने में जो दूषण दिए उनको मिटाकर अब जरासन्ध ने जो बलभद्र को कहा, बलभद्रजी ने उसके कहने से जो कुछ किया, उसका वर्णन "जग्राह विरथं" श्लोक में करते हैं ।

श्लोक—जग्राह विरथं रामो जरासन्धं महाबलम् ।
हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा ।।३१।।

श्लोकार्थ—सेना नष्ट हो जाने से जिसके केवल प्राण ही बचे हैं ऐसे महाबली रथहीन प्यादे बने हुए जरासन्ध को, जैसे सिंह अपने पराक्रम से दूसरे सिंह को पकड़ता है वैसे ही बलरामजी ने उसे हाथों से ही पकड़ लिया ।। ३१ ।।

सुबोधिनी—तस्य रथोऽपि छिन्नः । केवलं पदातिरवशिष्टः । यद्यपि शरीरेणापि महाबलः, तथापि तं जग्राह । विरथो हन्तव्यो न भवतीति बद्धा गृहे नेय इति बन्धनार्थं गृहीतवान् । यतोऽयं रामः सर्वेषां रमणार्थे प्रवृत्तः । सः हन्तुमप्यशक्य इति तस्य नामाह । महाबलमिति च दैवं मानुषं च बलं तस्य निरूपितम् । तर्हि दैवगत्या गृहीत इति चेत्, तत्राह ओजसेति । तर्हि पाशादिभिर्गृहीतो भविष्यतीति चेत्, तत्राह सिंहः सिंहमिवेति । हस्ताभ्यामेव निगृह्य स गृहीतः, न तु हलादिना आकृष्टः । तस्य मोचकाभावमाह । हतमनीकं यस्य, अवशिष्टा असवो यस्येति ।।३१।।

व्याख्यार्थ—उस (जरासंध) का रथ भी टूट गया था अतः पैदल चल रहा था यद्यपि शरीर से महाबलवान् था, तो भी उसको बलरामजी ने पकड़ लिया पकड़ा क्यों ? मारा क्यों नहीं ? इसके उत्तर में कहते हैं कि युद्ध शास्त्र की रीति के अनुसार जिसका रथ नष्ट हो गया हो उसको मारना नहीं चाहिए इस लिए मारा नहीं और बान्ध कर घर ले आना था, इस लिए पकड़ा था क्योंकि वह राम होने से सर्व को रमण कराने के लिए ही प्रवृत्त हुए हैं, उसको मारना भी कठिन था, कारण कि वह महाबलवान था अर्थात् उस में दो बल थे (१) देव बल और दूसरा मानुष बल, तब तो बलरामजी ने भी उसे देव गति से पकड़ा होगा ? यदि यों कहो तो, उत्तर में कहते हैं, कि नहीं, उन्होंने अपने बल से ही पकड़ा है तो वरुणादि पाशों के द्वारा पकड़ा होगा ? इस के उत्तर में भी कहते हैं कि नहीं, जैसे सिंह सिंह को पकड़ता है वैसे हाथों से ही पकड़ लिया, हलादि से भी खींचकर नहीं पकड़ा, क्या उसको किसी ने छुड़ाया भी नहीं ? इसके उत्तर में कहते हैं कि उसको छुड़ाने वाला कोई बचा ही नहीं था सारी सेना नष्ट हो गई थी, केवल इसके ही प्राण बचे थे अर्थात् यह एक ही बचा था ।।३१।

आभास—ग्रहणानन्तरं परोपकारार्थमागतो न बन्धनीय इति बध्यमानं भगवान् निवारयामासेति आह बध्यमानमिति ।

आभासार्थ – पकड़े जाने के अनन्तर भगवान् ने बान्धने वाले बलराम को कहा कि इस को मत बान्धो क्योंकि परोपकार के लिए आए हुए को बान्धना नहीं चाहिए इस का वर्णन "बध्यमानं" श्लोक में करते है ।

श्लोक—**बध्यमानं हतारातिं पाशैर्वारुणमानुषैः ।**
वारयामास गोविन्दस्तेन कार्यचिकीर्षया ॥ ३२ ।

श्लोकार्थ – शत्रुओं का नाश करने वाले जरासन्ध को वरुण और मनुष्यों के पाशों से जब बलरामजी बान्धने लगे तब श्रीकृष्ण भगवान् ने निषेध किया, कारण कि उसके द्वारा अन्य कार्य भी कराने को भगवान् की इच्छा थी ॥ ३२ ॥

सुबोधिनी—महतो बन्धनमनुचितमिति तं विशिनष्टि हतारातिमिति । हताः अरातयो येन । अनेन शत्रुभूयस्त्वात् तेषां च दुष्टत्वात् तत्सुखं भविष्यतीत्यपि मोचने तदभावो हेतुरुक्तः । केवल-बन्धनानि तत्र न समर्थानीति पाशैर्बद्धः । ते आकृष्टाः निग्रहहेतवो भवन्ति । तत्रापि वारुणैर्मानुषैश्च । जरादीनां मोचनाभावाय वारुणाः पाशाः, मनुष्याणामर्थे मानुषाः । एतादृशमपि स्वाधीनं जातं परमशत्रुं वारयामास, बन्धनं न कर्तव्यमिति । ननु कथमेवं भूभारहर्ता तं मोचयतीति चेत्, तत्राह गोविन्द इति । सिंहावलोकनन्यायेन पूर्वलीलां स्मृतवान् । अतस्तेनापि काचिल्लीला सेत्स्यतीति तं मोचितवान् । ननु कीमिति दुष्टो मुच्यते, तत्राह तेन कार्यचिकीर्षयेति । निरोधो हि कर्तव्यः, एतदभावे सर्वे भगवत्परा राजसाः सात्त्विकाश्च न भविष्यन्तीति तदर्थमयं रक्षितः । अक्लिष्टकर्मत्वाय च ॥ ३२ ।

व्याख्यार्थ—महान् पुरुष को बान्धना अयोग्य है उसको महता सिद्ध करने के लिए उसका बखान करते हैं, इसने वहुत शत्रुओं को मारा है इसके शत्रु बहुत हैं और वे दुष्ट हैं यदि इसको आप बान्धोगे तो वे दुष्ट सुखी होंगे, अतः दुष्ट प्रसन्न न हो इसलिए इसको छोड़ दो जिससे ये दुष्ट सुखी न होवें यह महाबली है इसको वान्धने के लिए केवल रज्जु आदि बन्धन समर्थ नहीं है किन्तु पाशों से बान्धना चाहिए, उनको आकर्षण करने से वे निग्रह के कारण वन जावेंगे वे पाश भी वारुण तथा मानुष्य होने चाहिए । जरादिकों के वन्धन में पड़े रहने के लिए वारुण पास चाहिए और मनुष्यों के लिए मानुष्य पाश चाहिए ? ऐसे भी अपने हाथों में आए हुए परम शत्रु को वन्धन से छुड़ाने के लिए वलरामजी को कहने लगे कि इसका वन्धन नहीं करना चाहिए । भूमि से भार उतारने वाले भगवान् यों उसको कैसे छुड़ाते हैं ? इसके समाधान के लिए कहते हैं कि वे "गोविन्द" हैं, अतः "सिंहावलो-

कन" माया से आगे करने वाली लीला को याद करने लगे, जिससे यह विचार उत्पन्न हुआ, कि यह होगा तो आगे की लीला 'द्वारिका लीला" सिद्ध हो सकेगी, इसलिए उसको छुड़ाया, अरे यह दुष्ट है, ऐसे ही क्यों छुड़ाते हैं, वहाँ कहते हैं कि उसके द्वारा आगे भी कार्य करने की इच्छा है, और निरोध भी करना है इसके न होने से, सब सात्विक राजस भगवत्परायण न होंगे इस कार्य को सिद्ध करने के लिए इसकी रक्षा की है और आप 'अक्लिष्टकर्मा" हैं, उसके सार्थक होने के लिए भी ॥ ३२ ॥

आभास—ततो यज्जातं तदाह स मुक्त इति ।

आभासार्थ—अनन्तर जो हुआ वह "स मुक्तो" श्लोक में कहते हैं ।

श्लोक—स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमतः ।
तपसे कृतसंकल्पो वारितः पथि राजभिः ॥ ३३ ॥

श्लोकार्थ—बड़े ही शूरवीर जरासन्ध को जब त्रैलोक्यनाथों ने मुक्त किया तब वह लज्जा के कारण घर जाने का विचार छोड़ तपस्या का संकल्प कर, उसको करने के लिए जब जाने लगा, तब मार्ग में राजाओं ने उसे लौटाया । ३३ ।

सुबोधिनी—अन्ये यादवाः पुनर्बन्धनं करिष्यन्तीत्याशङ्क्याह लोकनाथाभ्यामिति । त्रैलोक्यनाथाभ्यां मुक्तं को वा बद्धुं शक्तः । द्विवचनेन विभक्तसामर्थ्यं सर्वमेव मोचने नियुक्तमिति सूचितम् । ननु तादृशः त्यक्तोपि म्रियेतेति कथं कार्यसिद्धिरिति चेत् ? सत्यम् । व्रीडितः । अत्र हेतुः वीरसंमत इति । वीरेषु अयमतिवीर इति संमतः । ततः मानुषपराक्रमस्य हतत्वात् अलौकिकं पराक्रमं साधयितुं तपसे कृतसङ्कल्पो जातः । ततस्तपःकरणार्थं गच्छन् पथि राजभिर्वारितः, ये राजानो भारभूताः । अनेन भगवच्चरित्रमलौकिकमित्युक्तम् । येषामुपकारं करोति तैस्त्यक्तः, येषां त्वपकारं करिष्यति तैर्गृहीत इति ॥ ३३ ॥

व्याख्यार्थ—दूसरे यादव फिर बान्ध लेंगे ? इस शंका को मिटाने के लिए ही "लोकनाथाभ्या" पद दिया अर्थात् जो कार्य त्रैलोक्यनाथों ने किया है उसको कौन अन्यथा कर सकता है ? तात्पर्य यह है कि जिसको इन्होंने छोड़ दिया उसको बन्धन में कोई नहीं डाल सकता है । द्विवचन से पृथक् करने अर्थात् मुक्त करने की सब सामर्थ्य मुक्त करने में लगा दी है यह सूचित किया है जिससे अन्य कोई भी बन्धन में नहीं डाल सकता है, यदि वैसा छोड़ा हुआ भी मर जावे तो, कार्य की सिद्धि कैसे होगी ? यदि यों कहो तो सत्य है, क्योंकि लज्जित हुए गण हैं, लज्जित क्यों हुआ ? इसलिए, कि वीरों में मान पाया हुआ है अर्थात् बड़ा शूरवीर है अतः हार जाने से लज्जित हुआ है । तो क्या

किया ? इस पर कहते हैं कि उसने सोचा कि मेरा मानुष पराक्रम नष्ट हो गया है, अब अलौकिक पराक्रम सिद्ध करना चाहिए, अतः उसकी सिद्धि के लिए संकल्प कर, तपस्या के लिए जाने लगा तो मार्ग में राजाओं ने समझा कर लौटाया। कौन से राजा थे ? तो कहते हैं जो दुष्ट राजा लोग भूमि पर भार रूप थे इससे जाना जा सकता है, कि भगवान् के चरित्र अलौकिक हैं, जिनका उपकार करता है उन्होंने तो छोड़ दिया, जिनको बुराई करेगा उन्होंने उसका स्वीकार किया ॥३३॥

आभा—**तेषां बोधेने करणान्याह वाक्यैरिति।**

आभासार्थ—उनको समझाने के साधन "वाक्यैः" श्लोक से कहते हैं।

श्लोक—**वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि।**
स्वकर्मबन्धनः प्राप्तो यदुभिस्ते पराभवः ॥३४॥

श्लोकार्थ—मार्ग में जाते हुए राजाओं ने धर्म तथा नीति के वचनों से समझाया कि आपकी जो यादवों से हार हुई है वह केवल कर्म बन्धन से हुई है, इसमें लाज करने का कोई कारण नहीं है ॥३४॥

सुबोधिनी—त्रिविधा हि बोधकाः। तत्र सात्त्विकानां वचनं पवित्रार्थपदैरिति पवित्रार्थानि पदानि येषु वाक्येषु। वाक्यैरिति त्रिष्वपि सम्बध्यते। नयनैः प्राकृतैरपि। भगवानीश्वरः सर्वात्मा, तत्र पराजयो भाग्यमेवेति पवित्रार्थपदानि। नीतिवाक्यानि तु स्वदेशो न भवति, विचारश्च न कृतः। अकस्माद्युद्धे पलायनमुचितमेवेति राजसाः। अतो नीतिविरुद्धं न कर्तव्यमित्युपदेशपरैः। प्राकृतास्तु बहूनामेव महतामपि पराजयो जायत इति प्राकृतवचनैः बोधमुक्तवन्तः। एते त्रिविधा अपि दृष्टन्यायेनैवोक्तवन्तो, नादृष्टन्यायेन। अन्ये पुनरन्तरङ्गाः अदृष्टप्रकारेण बोधयामासुरित्याह स्वकर्मबन्धन इति। त्वया हि बहवो जिताः, तत्कर्मफलं च भोक्तव्यम्, अन्यथा प्रकारान्तरेण दुष्टैः सह पराजयो भवेत्, यतः स्वकर्मणा बन्धनं यस्य तादृशः पराभवः। अपिशब्दात् सर्वे चतुर्धा व्यस्तैः समस्तैश्च बोधयामासुरित्यर्थः। यदुभिः सह पराभव इति। युक्तमेवैतत्। यतो ज्येष्ठो यदुरित्यपि ज्ञापितम् ॥३४॥

व्याख्यार्थ—ज्ञान देने वाले तीन प्रकार के हैं उनमें पहले सात्विकों के वचन ये हैं 'पवित्रार्थ पदैः' पवित्र अर्थ वाले पद जिनमें हो ऐसे वाक्यों से समझाने लगे सात्विकों ने वाक्यों में कहा कि राम कृष्ण मनुष्य नहीं है किन्तु ईश्वर तथा सर्वात्मा है, उन से पराजय होना कोई आश्चर्य नहीं है, समझलो कि भाग्य में यों ही होना था।

जब दूसरे राजस "नयतेः वाक्येः" से नीतिवाक्यों से समझाने लगे जहाँ लड़ाई की, वह अपना देश नहीं था और पूर्ण विचार भी नहीं, अचानक युद्ध कर लिया, अतः ऐसे युद्ध में पलायन करना उचित नहीं हैं इसमें लज्जा किस कारण की है लज्जा करनी नहीं चाहिए अतः कोई कार्य नीति विरुद्ध नहीं करना चाहिए ।

प्राकृत समझाने लगे कि पराजय में क्या है ? बड़े-बड़े राजा लोगों की तथा महान् शूरवीरों की भी पराजय हो ही जाती है इसमें लाज करनी वृथा है, इन तीन प्रकार वालों ने जो कुछ कहा वह दृष्ट न्याय से ही अर्थात् देख कर जो अनुभव किया तदनुसार ही उपदेश दिया है ।

दूसरे जो अन्तरंग हैं वे अदृष्ट न्याय से समझाने लगे "स्वकर्म बन्धनः" यह सर्व अपने कर्म का ही फल है आपने भी बहुत राजाओं को जीता है उसका फल भोगना ही चाहिए अन्यथा दूसरे प्रकार से दुष्टों के साथ पराजय तो होवे ही, क्योंकि अपने कर्म का फल ही पराभव मिला है श्लोक में "अपि" शब्द कहा है जिसका भावार्थ है कि सबने पृथक् एवं मिलकर चार प्रकार से जरासन्ध राजा को समझाया कि यादवों से पराजय होना योग्य ही है कारण कि यदुराजा बड़ा है बड़े के वंश से पराजय होनी ही चाहिए और उसमें लाज नहीं करनी चाहिए ।।३४।।

श्लोक—**हतेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा ।**
उपेक्षितो भगवता मागधान्दुर्मना ययौ ।।३५।।

श्लोकार्थ—सब सेना के मरने के अनन्तर जब भगवान् ने उपेक्षा कर दी तब जरासन्ध उदास हो मगध देश गया ।।३५।।

सुबोधिनी—ततो यज्जातं तदाह । हतेषु सर्वानीकेष्वपि, तथापि सर्वैः पुरस्कृत इति राजचिह्नानि प्राप्य स्वदेशान् गतः जरासन्धः । यतो नृपः दैवामानुषसहायः सूचितः । तदा बोधनानन्तरं दृष्टसामग्रयां च सत्यां पश्चाद्गत इत्याह तदेति ।

व्याख्यार्थ—उसके अनन्तर जो कुछ हुआ वह कहते हैं सर्व सेना के मर जाने पर भी सब राजाओं ने उसका आदर किया जिससे राज चिन्ह धारण कर अपने देश को जरासन्ध गया क्योंकि राजा था इससे देव और मनुष्यों ने सहायता की यह सूचित होता है । राजाओं द्वारा समझाने से देखा कि अब भी लड़ने के लिए सामग्री है यों समझने के बाद देश को गया ।

कारिका—**निकटे सम्भृतिं कृत्वा प्रगल्भवचनैः सह ।**
गच्छन् पुनर्भगवता निगृहीतो भविष्यति ।।

कारिकार्थ—थोड़े ही समय में सेना का भरण पोषण कर सेना तैयार करली सेना को लेकर गर्व के वचन कहते हुए तथा युद्ध के लिए मथुरापुरी जाते हुए फिर भगवान् पकड़ लेंगे।

सुबोधिनी—इत्याहशङ्क्याह उपेक्षितोभगवतेति। भगवतः स्थाने यद्यप्युक्तम्, यद्यपि भगवत्त्वाच्च जानाति, तथापि तानि वाक्यान्यनाहत्योपेक्षामेव कृतवान्। भगवत्त्वादग्रिनकार्यमेव विचारयति, न तु नीतिविरोधम्। उपेक्षया सुतरां दुर्मना जातः। तत्त्वे अवगतेऽपि मागधत्वान्न शरणमागतः। नापि तूष्णीं स्थास्यति। मागधत्वादेव मागधान् ययौ ॥३५॥

व्याख्यार्थ—जरासन्ध ने यद्यपि अभिमान के ऐसे शब्द भगवान् की सीमा में ही कहे, भगवान् होने से वे यों ही समझते हैं, तो भी भगवान् ने उन वचनों का आदर न कर उसकी उपेक्षा की, कारण कि भगवान् होने से आगे हमें क्या करना है उसका ही विचार करते हैं। अतः उपेक्षा की, यों करना नीति के विरुद्ध भी नहीं है, भगवान् ने उपेक्षा की, अतः अतिशय उदास होने लगा, यद्यपि इसका आशय समझा, तो भी शरण न आया, कारण कि मगध देश में उत्पन्न होने से उसकी वैसी नीच बुद्धि हो गई थी और नीच बुद्धि वाला होने से चुप करके भी न बैठेगा मागध होने से मागध देश को ही गया ॥३५॥

आभास—तस्य स्वगृहप्राप्तिमुक्त्वा भगवतोऽपि परमवैभवेन मथुराप्रवेशमाह मुकुन्दोऽपीति पञ्चभिः।

आभासार्थ—उसका अपने घर जाने का वर्णन कर भगवान् ने भी परम वैभव से मथुरा में प्रवेश किया, जिसका वर्णन पाँच श्लोकों में कहते हैं।

श्लोक— **मुकुन्दोऽप्यक्षतबलो निस्तीर्णारिबलार्णवः।**
विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥३६॥

श्लोकार्थ—मुक्ति देने वाले भगवान् ने भी शत्रुओं की सेना रूप बड़े समूह को पार कर अपनी अक्षत सेना को साथ में लेकर, देवताओं ने फूलों की वर्षा की थी जिससे मार्ग फूलों से छाया हुआ था तथा देवता अनुमोदन कर रहे थे उस समय, मथुरा में प्रवेश किया ॥३६॥

सुबोधिनी—न क्षतं बलं यस्य । एकोपि न हतः । यद्यपि मोक्षदाता तानपि मारयित्वा मुक्ति दद्यात्, जरासन्धं वा मोचयेत् । न हि भगवान् जयहेतुः, किन्तु मोक्षहेतुः । लीनाः केचन पुनरायास्यन्तीति शङ्काभावार्थमाह । निस्तीर्णः नितरामुत्तीर्णः अखिलरूप एवार्णवो येन । अर्णवो हि नान्यत्र समायाति । महत्त्वेन पौरुषं पुनरागमनाभावश्च निरूपितः । ततः कुसुमैः विकीर्यमाणः, त्रिदशैरनुमोदितो जातः । अन्यथा अनन्तवधे तदधिष्ठातृदेवानां दुःखं भवेदित्याशङ्क्येत । देवार्थमेतत्कृतमित्यपि सूचितम् ।।३६।।

व्याख्यार्थ—जिनकी सेना का एक भी सैनिक घायल न हुआ था वैसे मुक्ति दाता भगवान् उनको भी मारकर मुक्ति दे, वा जरासन्ध को छुड़ा दे, भगवान् को जय के कारण नहीं है, किन्तु मोक्ष के कारण हैं, कितनेक सेनिक छिप गए होंगे, वे फिर लड़ने आ गए ? इस शंका का समाधान करने के लिए कहते हैं, कि शत्रु सेना रूप समुद्र को अतिशय पार कर लिया है, अर्थात् कोई सैनिक छिपा नहीं है क्योंकि समुद्र दूसरे स्थान पर नहीं जा सकता है अतिशय पार करने का कहने से भगवान् का महत्व तथा पौरुष भी दिखा दिया, जिससे यह भी निरूपण कर दिया कि अब जो सेना आई इनमें से कोई शेष बचा नहीं, जो फिर आ सके । पश्चात् जिस मार्ग पर पुष्प बिखरे हुए, उस मार्ग से पधारते हुए देवों से भी अनुमोदित हुए । यदि देवता अनुमोदन नहीं करते, तो यह शंका उत्पन्न होती कि अनन्त वध के कारण उनके अधिष्ठाता देवों को दुःख हुआ है, जिससे उन्होंने अनुमोदन नहीं किया है, किन्तु अनुमोदन से यह शंका भी मिट गई इससे यह भी सूचित किया, कि यह कार्य देवों के लिए ही किया गया है ।।३६।।

आभास—ततो मानुषैरप्यनुमोदित इत्याह माथुरैरिति ।

आभासार्थ—पश्चात् मनुष्यों ने भी अनुमोदन किया जिसका वर्णन "माथुरं" इन दो श्लोकों में करते हैं ।

श्लोक—माथुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः ।
उपगीयमानविजयः सूतमागधबन्दिभिः ।।३७।।
शङ्खदुन्दुभयो नेदुर्भेरीतूर्याण्यनेकशः ।
वीणावेणुमृदङ्गानि पुरं प्रविशति प्रभौ ।।३८।।

श्लोकार्थ—सन्ताप रहित होने से, आनन्दित अन्तःकरण वाले मथुरा निवासी सूत मगध और बन्दीजनों के साथ मिल कर आपकी विजय गान गाने लगे । उस

समय शंख और नौबत बजने लगी तथा वीणा, वेणु और मृदंग बजाए जाने लगे जिस समय भगवान् ने नगर में प्रवेश किया ।।३७, ३८।।

सुबोधिनी—दुर्गमुद्घटय्च सर्वे समागताः । यतो विज्वराः मरणशङ्कारहिताः । ज्वरो हि समागत एव मरणशङ्कामुत्पादयति । तेषां स एव ज्वरः प्राप्त इति । कालदेहादिधर्मास्तु पूर्वमेव निवारिताः । किञ्च, बहिर्बुद्ध्यापि मुदितात्मनो जाताः । ततः सूतमागधबन्दिभिः उपगीयमानविजयो जातः । शङ्खदुन्दुभयश्च नेदुः । ततः शनैः गमनसूचनाय । वीणावेणुमृदङ्गान्यपि वादितानि । यतः प्रभुः पुरं प्रविशतीति । लौकिकमेतदिति सूचितम् ।।३७-३८।।

व्याख्यार्थ—किले का फाटक खोल कर सब आए क्योंकि मरने की जो मनमें शंका थी वह मिट गई, जिस शंका से ही ज्वर आ गया था, शंका मिटते ही ज्वर भी उतर गया उनके काल और देह आदि के धर्म का तो पहले ही निवारण कर दिया था अतः शंका के मिटने से बुद्धि खिल गई, जिससे बाहर प्रसन्न अन्तःकरण देखने में आने लगे पश्चात् सूत मागध और बन्दीजनों ने भगवान् की विजय का गान गाया शङ्ख तथा नौबत बजने लगी अनन्तर प्रभु धीरे-धीरे पधार रहे हैं, इसको सूचना देने के लिए वीणा, वेणु और मृदङ्ग भी बजाने लगे क्योंकि प्रभु पुर में प्रवेश करते हैं यह लौकिक है यों सूचन किया ।।३७, ३८।।

आभास—अन्तः पुरं **वर्णयति सिक्तमार्गामितिद्वाभ्याम् ।**

आभासार्थ—मथुरा पुरी के भीतरी भाग का वर्णन करते हैं ।

श्लोक—सिक्तमार्गां हृष्टजनां पताकाभिरलंकृताम् ।
निघुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणाम् ।।३९।।
निचीयमानो नारीभिर्माल्यदध्यक्षताङ्कुरैः ।
निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ।।४०।।

श्लोकार्थ—नगर के सर्व मार्ग सुगंधि पदार्थों से युक्त जल से सींचे हुए हैं, सर्व जनता हर्ष में मगन हो रही है, नगर पताकाओं से सुशोभित है, वेद के मन्त्रों की **ध्वनी जोर से हो रही है अद्भुत प्रकार के तोरण बन्धे हुए हैं, ऐसी पुरी में प्रवेश करते समय, नारियों ने दही, अक्षत, पुष्प और अंकुर भगवान् के ऊपर बरसाए तथा प्रीति से प्रफुल्लित नेत्रों द्वारा स्नेह सहित उनका दर्शन किया ।।३९,४०।।**

सुबोधिनी–सिक्ता: सर्वे मार्गा यस्याम्, गन्धोदकै: सेक: । हृष्टा जना यस्याम् । पताकाभि: जयलेखाङ्किताभिरलङ्कृतामिति । अधो मध्ये उपरि च शोभा निरूपिता । नितरां घुष्टा ब्रह्मघोषेण वेदपाठेनेति । प्रत्यागाशिषो मन्त्रा: प्रवेशे पठनीया इति पुरप्रवेशे तदर्थमेव ब्राह्मणै: ब्रह्मघोष: पठित: । वैश्यानां विशेषचेष्टामाह । कौतुकैराबद्धानि तोरणानि यस्यामिति । सर्वाभिरेव नारीभि: माल्यादिभि: विकीर्यमाणो जात: । दध्यक्षता: विकीर्णा:, यवाङ्कुराश्च । एवं तासां क्रिया भगवति निरूपिता त्रिविधा । ज्ञानमपि तथा निरूपयति निरीक्ष्यमाण इति । स्नेहो बन्धुभावेन । प्रीति: पुरुषभावेन । उत्कण्ठा कामभावेनेति । एवं त्रिस्वभावैर्लोचनैर्निरीक्ष्यमाणो जात: । स्नेह: पृथक् कृतो लौकिकदोषाभावाय ॥ ४० ॥

व्याख्यार्थ—जिस पुरी के सर्व मार्ग सुगन्धित जल से सिञ्चित हैं, समस्त जन हर्षित हैं जय जय शब्दों से अंकित पताकाओं से अलंकृत पुरी है, इससे यह बताया है, कि नीचे का, मध्य का और ऊपर का तीनों भाग उसके शोभायुक्त हैं । प्रवेश के समय आशीर्वाद के मंत्र पढने चाहिए, अत: ब्राह्मण वेद के मंत्रों का घोष कर रहे थे ।

व्यापारियों ने जो विशेष नगर को सजाया था उसका वर्णन करते हैं, उन्होंने आश्चर्य में डालने वाले अजीब तोरण लगाए थे । नगर की नारियों ने भी भगवान् का दधि, अक्षत, पुष्प अंकुरों से सत्कार किया अर्थात् पुष्प आदि सौमंगल्य सूचक पदार्थों की भगवान् के ऊपर वृष्टि की । यों क्रिया करने से उन्होंने भगवान् का तीन प्रकार से सत्कार किया, उसी प्रकार ज्ञान का भी निरूपण करते हैं, तीन प्रकार के अपने भाव वाले नेत्रों से भगवान् के दर्शन किए (१) बन्धुभाव से दर्शन कर स्नेह प्रदर्शित किया, (२) पुरुष भाव से दर्शन कर प्रीति प्रकट की और (३) कामना भाव से दर्शन कर उत्कण्ठा दिखाई है, स्नेह प्रथक् कह कर लौकिक दोष उस में नहीं है यह सिद्ध कर दिखाया है ॥ ३९, ४० ॥

आभास—तत: प्राप्तधनस्य राजन्येव विनियोगं वदन् स्वस्य तदाज्ञया युद्धादिकरणं सूचयति, तद्दु:खाभावाय, आयोधनगतमिति ।

आभासार्थ—लड़ाई से प्राप्त धन को राजा में ही विनियोग करते हुए उसकी आज्ञा से युद्धादि करना सूचित करते हैं उसके दु:ख के अभाव को मिटाने के लिए जिसका वर्णन "आयोधनगतं" श्लोक में करते हैं ।

श्लोक—आयोधनगतं वित्तमनन्तं वीरभूषणम् ।
यदुराजाय तत्सर्वमाहृतं प्राविशत्प्रभु: ॥ ४१ ॥

श्लोकार्थ—लड़ाई के मैदान में जो वीरों के आभूषण रूप अनन्त धन पड़ा था, वह सब लाकर भगवान् ने यदुराज के आगे धरा, क्योंकि प्रभु हैं ॥ ४१ ॥

सुबोधिनी—आयोधनं युद्धभूमिः, तत्र योधैरानीतं द्रव्यमाभरणादिप्रकारेण। अनन्तं बह्वेव। बह्व एव हता इति। अनन्तत्वे हेतुमाह वीरभूषणमिति। यावदाहृतं तत्सर्वं यदुराजाय प्रादिशत् प्रकर्षेण बोधितवान्। रक्षास्थापनादिकं तु स्वकृत्यमेवेति निवेदनमात्रं राज्ञे निरूपितम्। प्रभुत्वात् न सह गतानां यथेष्टं द्रव्यविनियोगः ॥ ४१ ॥

व्याख्यार्थ—संस्कृत में युद्धभूमि को आयोधन कहा गया है, वहाँ योद्धाओं से जो आभरणादि कार से धन लाया गया वह असीम था, कारण कि सैनिक बहुत थे, उनके मरने से उनके आभूषण रणभूमि में पड़े थे जिससे वे आभूषण भी बहुत थे, वहाँ जो भी पड़े हुए थे वे सब लाए गए थे, वे सब यदुराज को भेट किए। रक्षा आदि करने का कार्य तो आप ही करते थे, इसलिए निवेदन मात्र हो राजा को किया, यों निरूपण किया, प्रभु होने से साथ में युद्ध के लिए जो चले थे उनको अपनी इच्छा से द्रव्य का विनियोग नहीं किया ॥ ४१ ॥

आभास—**एवमेकप्रकारेण भगवतो जयं निरूप्य जयान्तरेष्वपीमं प्रकारमतिदिशति एवं सप्तदशकृत्व इति।**

आभासार्थ—यों एक प्रकार भगवान् की जयका वर्णन कर अन्य जयों में भी यही प्रकार दिखाते हैं, वैसे १७ बार युद्ध हुआ यह "एवं सप्तदश" श्लोक में कहते हैं।

श्लोक—**एवं सप्तदशकृत्वस्तावत्यक्षौहिणीबलः।**
युयुधे मागधो राजा यदुभिः कृष्णपालितैः ॥ ४२ ॥
अक्षिण्वंस्तद्बलं सर्वं वृष्णयः कृष्णतेजसा।

श्लोकार्थ—मगध के राजा ने इसी प्रकार उतनी ही अक्षौहिणी सेना सत्रह बार ला कर कृष्ण से पालित यादवों से युद्ध किया, यादवों ने श्रीकृष्ण के तेज से सारी सेना को मार डाला ॥ ४२½ ॥

सुबोधिनी—अनेनापि सह सप्तदश। एकः सप्तदशधा आवृत्त इति सर्वसाम्यत्वाय कृत्वसुच्प्रत्ययः। देशदोषात् न विवेक उत्पद्यते इति मागध इत्युक्तम्। सम्पत्तिस्तु राजत्वात्। अन्यत्रापि भगवान् न स्वयं युयुधे। तथा सति लोकप्रतीत्या सर्वदा क्लेश एव भवेत्, किन्तु कृष्णरक्षितैर्यदुभिः सह युयुधे। अत एव च तद्बलमक्षिण्वन्। न केवलं रक्षार्थमेव भगवद्विनियोगः, किन्तु निराकरणार्थमपीत्याह कृष्णतेजसेति।

व्याख्यार्थ—इसके साथ भी सत्रह वार लड़े एक युद्ध की सत्रह वार आवृत्ति हुई, सब समर एक सरीखे ही थे, यह जताने के लिए "कृत्व" पद पर सुच् प्रत्यय दिया है, दूसरी लड़ाईओं में भी भगवान् स्वयं नहीं लड़े हैं, यों होवे तो, लोक प्रतीति से सर्वदा क्लेश ही होवे, इस प्रकार का क्लेश न हो तदर्थ ही कृष्ण से रक्षित यादवों के साथ ही लड़ाई की है, इस कारण से ही जरासन्ध की सेना मारी गई, यह कार्य कृष्ण के तेज द्वारा ही हुआ, श्रीकृष्ण का तेज यादवों में केवल रक्षा के लिए नहीं प्रकटा है, किन्तु शत्रु बल के निराकरण के लिए भी उत्पन्न हुआ है ॥ ४२½ ॥

आभास—पुनः पुनः तस्यापि गमनं वाक्यैरधिकैरावेशेन चेति वक्तुमाह हतेष्विति ।

आभासार्थ—जरासन्ध फिर फिर आते तो पृथक् प्रकार से ही आते थे जैसे कि कभी विशेष बड़बड़ाता था कभी बहुत आवेश से आता था, यह वर्णन करने के लिए "हतेषु" श्लोक कहते हैं--

श्लोक—हतेषु स्वेष्वनीकेषु त्यक्तऽयादरिभिर्नृपः ॥ ४३ ॥

श्लोकार्थ—जब अपनी सेना मर गई तब जरासंध शत्रुओं से त्यागा हुआ चला गया ॥ ४३ ॥

सुबोधिनी—यतो नृपः । राज्ये हृते हि स निवृत्तो ऽभवेत् । तद्भगवान् न करोतीति स निवर्तत इत्यर्थः ।

व्याख्यार्थ—राज्य जीता जाए तो राजा भी जीता गया यों माना जाता है । उसको बन्दी बनाया जाता है, भगवान् यों नही करते हैं इसलिए वह लोट जाता है, क्योंकि नृप है मनुष्यों का पालन करता है ॥ ४३ ॥

आभास—ब्रह्माण्डे हि प्रजापतिरध्यक्षः, स कालात्मा यज्ञात्मा च, स सप्तदशो ऽभवत् स पराजित एव । अतः परं प्रमाणरूपाः ब्राह्मणा अवशिष्यन्ते । शिवश्च वेदरूपः । उभयबलमाश्रित्य अष्टादशे पर्याये समागमिष्यतीत्याह अष्टादशम इति ।

आभासार्थ—ब्रह्माण्ड का अध्यक्ष प्रजापति है, वह काल रूप तथा यज्ञरूप है, वह सत्रह प्रकार का होता है, उसका पराजय हो ही गया, इसके बाद प्रमाणरूप ब्राह्मण

बचते हैं शिव वेद रूप है, इन दोनों के बल का आश्रय ले कर अठारवीं बार आएगा, जिसका वर्णन "अष्टादशम" श्लोक में करते हैं-

श्लोक— अष्टादशमसंग्राम आगामिनि तदन्तरा ।
नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत ॥ ४४ ॥
रुरोध मथुरामेत्य तिसृभिर्म्लेच्छकोटिभिः ।
त्रैलोक्ये चाप्रतिद्वन्द्वो वृष्णीन् श्रुत्वात्मसंमितान् ॥ ४५ ॥

श्लोकार्थ—अठारवीं बार भी जरासन्ध आने वाला था, उसके 'बीचमें" पहले ही नारदजी का भेजा हुआ वीर यवन देखने में आया, उसने तीन करोड़ म्लेच्छों के साथ आकर मथुरापुरी को घेर लिया, तीन लोक में इसका कोई प्रतिद्वन्दी नहीं था अर्थात् इसके साथ लड़ने वाला नहीं था, इसने सुना था कि मेरे जैसे शूरवीर तो यादव हीं हैं अतः उनसे लड़ने के लिए घेरा डाला ॥ ४४, ४५ ॥

सुबोधिनी—एवं पुराणान्तरे कथा । बहुधा सर्वैः संप्रार्थितोऽपि सप्तदशे पर्याये पराजितः पतस्तप्तुं गतः । तत्र समाराधितः शिवः । पश्चात् प्रसन्नेन शिवेन ब्राह्मणसमाराधनार्थं निरूपितः । ब्रह्मण्यः कृष्णो न ब्राह्मणवाक्यमन्यथा करिष्यतीति । ततः स्वनगरीं समागत्य ब्राह्मणानाहूय सिंहासने उपवेशितवान् । ततः प्रीतैर्ब्राह्मणैः पुनस्तस्मै सिंहासनं दत्वा वरोपि दत्तः, 'शत्रुं जेष्यसी'ति । 'अजेयश्च त्रैलोक्यस्य भविष्यसो'ति । एतत् ज्ञात्वा नारदः मध्ये कालयवनं च प्रेषितवान् । सोऽपि सर्वयादवनिराकरणार्थं प्रतिज्ञां चक्रे । स चेत्पश्चादागच्छेत्, द्वारकां गच्छेदिति । तस्य तत्र निराकरणं मर्यादापालकेनाशक्यमिति उभयमेकहेलया निर्वहत्विति मध्ये देवगुह्यकर्ता नारदो यवनं प्रेषितवान् । स हि वृद्धगर्गस्य पुत्रः । महायवनो ह्यप्रज आसीत् । तेन पुत्रार्थं प्रार्थितो वृद्धगर्गः तद्भार्यायां पुत्रमधात् । 'अजेयश्च तव पुत्रो भविष्यती'त्याह । ततः कालान्तरे यदुसभायां स एव वृद्धगर्गो यदुभिरुपहसितः स्वपुत्रं प्रार्थितवान् 'यादवा मारणीया' इति । एवं वैरे सिद्धे नारदेन तेषु प्रविष्ट एवं सन्धिकालोऽयम्, शीघ्रं गम्यतामिति तं प्रेषितवान् । तदाह । आगामिनि अष्टादशमे सङ्ग्रामे तदन्तरा नारदेन प्रेषितो यवनः वीरत्वाद्युद्धरसाभिनिविष्टः प्रत्यदृश्यत प्रतिकूलतया समागतो दृष्टः । तस्य प्रतिकूलतामाह रुरोधेति । स्वयं समागत्य म्लेच्छकोटिभिः मथुरां रुरोध । तत्र कारणमाह त्रैलोक्ये अप्रतिद्वन्द्वः । चकारादनुभावेनापि । वृष्णींश्च आत्मसम्मितान् तुल्यान् श्रुत्वा नारदात् तदसहमानो रुरोधेति सम्बन्धः ॥ ४४, ४५ ॥

व्याख्यार्थ—अन्य किसी पुराण में कथा है, कि अठारवीं बार हार जाने के बाद जरासन्ध को बहुतों ने प्रार्थना की, कि फिर राजधानी में चल कर राज्य करो और फिर तैयारी करो, किन्तु वह प्रार्थना स्वीकार न कर तपस्या करने चला गया, वहाँ शिवजी की अच्छी तरह आराधना की,

जिससे शंकर भगवान् प्रसन्न हुए, प्रसन्न हो के जरासन्ध को कहने लगे कि ब्राह्मणों की सेवा करो, ब्राह्मण प्रसन्न हो कर जो कुछ तुझे वरदान देंगे उसको कृष्ण अन्यथा नहीं करेंगे क्यों कि वह ब्रह्मण्य हैं, ये श्री शंकर भगवान् के वचन शिरोधार्य कर अपनी नगरी में आ के जरासन्ध ने ब्राह्मणों को बुलाया और उनको सिंहासन पर बैठाया, जिससे ब्राह्मणों ने प्रसन्न हो कर राज्य लौटा कर इन को दिया और वर भी दिया, "शत्रु को तूं जीतेगा" तथा 'तीन लोक में तू अजय होगा इस प्रकार जब वर प्राप्त किया, तब इसकी खबर नारदजी को पड़ गई, जिससे नारदजी ने उसके आने से पहले ही, कालयवन को मथुरा को विजय करने के लिए भेज दिया, क्योंकि उसने भी यादवों को नाश करने की प्रतिज्ञा की थी, यदि अब वह न आवे तो उसको यादव नाशार्थ द्वारका जाना पड़ेगा, वहाँ इसका निराकरण हो नहीं सकेगा, क्योंकि वहां कृष्ण मर्यादा पालक रूप में विराजेंगे. अतः अब यहाँ दोनों का एक ही से कार्य पूर्ण करें. इस विचार से देवताओं के गुप्त कार्य को सिद्ध करने वाले नारदजी ने यवन को बीच में ही भेज दिया। क्योंकि वह यवन वृद्धगर्ग का पुत्र है, महायवन का पुत्र नहीं था, उसने पुत्र प्राप्ति के लिए वृद्धगर्ग को प्रार्थना की उसकी स्त्री में पुत्र को धारण कराया, और यह वरदान दिया कि यह पुत्र किसी से भी जीता नहीं जाएगा, किसी समय यादवों की सभा में उस वृद्धगर्ग का यादवों ने उपहास किया. जिससे वृद्धगर्ग ने अपने पुत्र कालयवन को प्रार्थना की, कि "यादव मारने योग्य हैं" अर्थात् यादवों का तूं नाश कर इस प्रकार कालयवन की यादवों से शत्रुता हुई, नारदजी उसमें प्रविष्ट हो कर अर्थात् उनके पास जाकर यह बीच का समय है अतः आपको उनकी पराजय करने का अच्छा अवसर है शीघ्र जाओ, यों कहकर उसको रवाना किया। अठारवीं बार होने वाली लड़ाई के बीच में, ही नारदजी से भेजा हुआ यवन शूरवीर होने से, युद्ध के रसपान करने की इच्छा वाला था देखा गया कि वह प्रतिकूल हो कर लड़ने के लिए आया है वह प्रतिकूल है यह कैसे जाना, तो कहते हैं स्वयं आकर करोड़ों म्लेच्छों से मथुरा को घेर लिया, कारण कि तीन लोक में उसके समान कोई यौद्धा नहीं है जो उससे लड़ सके "च" शब्द से बताया है, कि प्रभाव से भी वह बड़ा वीर देखने में आता था, और नारदजी से सुना था कि यादव आप जैसे शूरवीर हैं इस बात को सहन न कर सके, इस लिए भी अपना शौर्य प्रकट दिखाने के लिए मथुरापुरी को घेर लिया ॥ ४४. ४५ ॥

आभास—तदा भगवान् तत्स्थानपरित्यागार्थं निरोधं चिन्तयामासेत्याह तं दृष्ट्वेति ।

आभासार्थ—तब भगवान् उस स्थान का परित्याग ही हेतु, जिसका वैसे निरोध का, चिन्तन करने लगे जिसका वर्णन "तं दृष्ट्वा" आधे श्लोक में कहते हैं ।

श्लोक—तं दृष्ट्वाचिन्तयत्कृष्णः संकर्षणसहायवान् ।

श्लोकार्थ—श्रीकृष्ण उसको देखकर सहायता करने वाले संकर्षण से मिल विचार करने लगे ॥ ४५॥ ॥

सुबोधिनी—इदं तु प्रकटचिन्तनम्। अतो गूढाभिप्रायेणैव चिन्तयति। अभिप्रायस्तु स्थानात् परित्याजनीयाः ये निरोद्धव्याः यथा बृहद्वनात् निष्कासिताः, तथा मथुरातोऽपि निष्कासनीयाः। यदि देशान्तरं न गच्छेयुः, तदा निरुद्धा एव न भवेयुः, लोके तथा दर्शनात्। अतो भगवानेतानन्यत्र नेतुं विचारयति। तत्संमतिव्यतिरेकेण नयने मन्त्रभेदः स्यादिति मर्मज्ञान बलभद्रेण सह मन्त्रयामास। यतोऽयं कृष्णः, निरोधार्थमेव प्रवृत्तः। अन्यथा सदानन्दः तेषां न भवेत्, बहिश्चित्तत्वादिति। संकर्षण एव सहायो यस्येति। अतस्तेन सह चिन्तनम्।

व्याख्यार्थ—यह विचार तो प्रकट रीति से करते हैं इस कारण से गूढ अभिप्राय से ही विचार करते हैं, वह अभिप्राय है मथुरापुरी से इनको निकालना है कारण, इनका निरोध करना है जैसे निरोधार्थ वृहद्वन से निकालना वैसे इनकी यहाँ से निकालना चाहिए, जो दूसरे देश नहीं जायेंगे तो इनका निरोध सिद्ध न होगा, लोक में यों ही देखा जाता है, अतः भगवान् इनको दूसरे स्थान पर ले जाना चाहते हैं, इसलिए विचार करते हैं मर्म को जानने वाले बलभद्रजी से सलाह करने लगे, क्योंकि इनके साथ विचार करन के सिवाय, ले जाने का पता सब को लग जायगा, जो हितकारक नहीं है। ऐसा क्यों करते हैं? इस के उत्तर में कहते हैं, यह कृष्ण निरोध करने के लिए ही प्रकटे हैं, निरोध न होगा तो, यह उनका सदानन्द नहीं रहेगा, अर्थात् निरोध के सिवाय भक्त सदैव आनन्द में मग्न नहीं रहेंगे, क्योंकि उनका चित्त बाहिर इधर उधर फिरता रहेगा, संकर्षण से परामर्श क्यों किया? दूसरे किसी से क्यों नहीं किया, जिसके उत्तर में कहते हैं, कि वह संकर्षण ही आपके सहायक हैं दूसरा कोई नहीं, अतः उसके साथ ही विचार किया ॥ ४५॥ ॥

आभास चिन्तनवाक्यान्याह अहो इत्यादिसार्धैः त्रिभिः।

आभासार्थ—"अहोयदूनां" श्लोक से ३॥ श्लोकों से परामर्श के वचन कहते हैं।

श्लोक—अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महान् ॥४६॥
यवनोऽयं निरुन्धेऽस्मानद्य तावन्महाबलः।
मागधोऽप्यद्य वा श्वो वा परश्वो वागमिष्यति ॥४७॥
आवयोर्युध्यतोरस्य यद्यागन्ता जरासुतः।
बन्धून्हनिष्यत्यथवा नेष्यते स्वपुरं बली ॥४८॥
तस्मादद्य विधास्यामो दुर्गं द्विपददुर्गमम्।
तत्र ज्ञातीन्समाधाय यवनं घातयामहे ॥४९॥

श्लोकार्थ—श्रीकृष्ण विचार कर संकर्षणजी को कहने लगे, आश्चर्य है कि यादवों को यह दुःख दोनों तरफ से अचानक कैसे प्राप्त हुआ ? आज तो महाबली यवन ने हमको घेर लिया है और जरासन्ध भी आज, कल या परसों आ जायगा उस समय हम यवन से लड़ते रहेंगे, उसको छोड़ कर जरासन्ध से लड़ना भी नहीं हो सकेगा, अतः वैसी दशा में आया हुआ वह चतुर मागध हमारे वसुदेवादि को मारेगा, अथवा उनको बान्ध कर अपने देश को ले जायगा तो उनको छुड़ाने के लिए फिर बहुत परिश्रम करना पड़ेगा इस कारण से, आज ही ऐसा दुर्ग बनाया जाए जिसमें मनुष्य जा नहीं सके अपने यादवों को लेकर ऐसे किले में आज ही पहुँचा कर आज ही यवन को मारेंगे ॥४६--४९॥

सुबोधिनी—अहो इत्याश्चर्ये । कथमयमकस्मादागत इति, कथं वा सन्धिकालं ज्ञातवानिति । यदूनां वृजिनं दुःखमुभयतोऽपि प्राप्तमिति प्रतिज्ञा । तां निरूपयति । महान् यवनोऽयमद्य निरुन्ध इति । अस्मानिति तैः सहाभेदः कार्यार्थं निरूपितः । स्वरूपतोऽप महान् महाबलश्च । अत्र महाबल इति उभयोर्ब्राह्मणवाक्यं बलमिति सूचितम् । यावज्जरासन्धो नायाति, तावदनेनैव निरुद्धा इति । तर्हि जरासन्धस्थाने अयमेव जातः, को विशेष इति चेत्, तत्राह मागध इति । मागधोऽप्यद्यैवायास्यति । तर्हि तद्बुद्धिः प्रेरणीया, यथाद्य नायास्यतीति चेत्, तत्राह श्वो वा समागमिष्यतीति । तर्ह्यन्तर्यामी वक्तव्यः, श्वोऽपि नानेतव्यः, तत्राह परश्व इति । तर्हि कालो वक्तव्य इत्याशङ्क्य त्र्यधिकपर्याये कोऽपि वक्तुं न युक्त इति वाशब्दं प्रयुक्तवान् । किमद्य श्वो वञ्चनेन आगमिष्यतीत्यत्र तु न सन्देहः । अत उपाय एव कर्तव्य इत्यर्थः । तर्हि उभावपि मारणीयाविति चेत्, तत्राह आवयोर्युध्यतोरिति । उभावजेयौ, अतः प्रधानपरिहारेण केवलबलहनने विलम्बो भवतीति यवनेन सह आवयोर्युध्यतोः सतोः, प्रक्रान्तस्य त्यागायोगात् । यदि मध्ये जरासन्धः चतुरः समागच्छेत्, तदा अस्मानन्यत्रासक्तान् विहाय बन्धून् वसुदेवादीन् हनिष्यति । स्वपुरं वा बद्ध्वा नेष्यति । पश्चान्मोचनार्थं बहु कर्तव्यं पतेत । मारयितुमशक्य एवेत्याह बलीति । एवं सति यत्कर्तव्यं तदाह तस्मादिति । द्विपदानां मनुष्यमात्रस्य दुर्गमं दुर्गं विधास्याम इति । नन्वेतावदलौकिकं यः करोति स तानेव कथमन्यथा न करोति, किमिति स्थानं त्याजयतीति चेत ? मैवम् । द्वारकादिनिर्माणे न काचिन्मर्यादा बाध्यते अन्यत्र तु ब्राह्मणवाक्यानि बाध्यन्ते । एतदर्थमेव द्वारकानिर्माणमिति न तत्र ब्राह्मणवाक्यं प्रभविष्यति । सर्वत्राधिकप्रयत्नः साधारण्यं निराकरोतीति । अत एव पूर्वं बलीति पदम् अत्र च द्विपदमिति । अतो ब्राह्मणा अपि द्विपदा एवेति तेषामपि स दुर्ग एव । पश्चान्निर्भये स्थाने ज्ञातीन् वसुदेवादीन् समाधाय यवनं घातयामहे, तदा बिलम्बो न बाधक इति । अन्यथा भगवत्यन्यत्र गते मुचुकुन्दगुहायाम्, वसुदेवादयो भीताः खेदं प्राप्नुयुः ॥४९॥

व्याख्यार्थ—आश्चर्य है कैसे यह अचानक आ गया और इसको इस संधिकाल * का ज्ञान कैसे हुआ यादवों को दोनों तरफ से सकट प्राप्त हुआ है, इस अपने पक्ष का संकर्षण के आगे निरूपण करते हैं। इस महान् यवन ने हम लोगों को आज घेर लिया है "हम लोगों को" कह कर यह बताया है कि हमारा यादवों के साथ कार्य के लिए अभेद है वह यवन स्वरूप से भी महान् है और बलवान् है 'अद्यमहाबल' कह कर यह सिद्ध किया है कि जरासन्ध तथा यवन दोनों महाबली हैं. कारण कि दोनों को ब्राह्मणों के आशीर्वाद से बल प्राप्त है, जरासन्ध नहीं आया है तो इसने ही पहले रोक लिया है अर्थात् घेरे में ले लिया है, यदि यों है तो जरासन्ध के स्थान पर इसको समझ कर इससे युद्ध कर इसको नाश करदो तो पता पड़ जाएगा कौन विशेष है, इसके उत्तर में कहते हैं कि मागध भी आज ही आजाएगा जो यों है तो उसकी बुद्धि में ऐसी प्रेरणाकर दो जैसे आज न आ सके यों करेंगे तो कल वा परसों तो अवश्य आ जाएगा, तो उसके आने का निश्चित समय कहिये ? तो कहते हैं कि तीन से अधिक कोई नहीं बता सकता है इसलिए "वा" शब्द कहा है, अच्छा यदि आज, कल परसों वा कभी ठगी से आएगा इसमें संशय नहीं है, तो उसका उपाय ही करना चाहिए ? यदि कहो कि दोनों मारने योग्य हैं, इस पर कहते हैं कि दोनों जीतने जैसे नहीं है, अतः मुख्य को छोड़कर केवल सेना को मारने में समय लगता है, तथा हम यवन से लड़ाई में लगे रहे उस समय वह चतुर आ जाय और हमको यवन से लड़ाई में तत्पर देखे तो उसको हम छोड़ भी नहीं सकते, यह ऐसा अवसर देख हमको छोड़ वसुदेवादि बान्धवों को मारेगा अथवा उनको बान्ध-कर अपनी नगरी में ले जाएगा तो पीछे छुड़ाने में बहुत परिश्रम करना पड़ेगा, जरासन्ध भी बली होने से मारा नहीं जा सकता है जब यों है तब क्या करना चाहिए ? वह कर्तव्य बताते हैं, जहाँ मनुष्य नहीं जा सके वैसा दुर्ग बनाएँगे जब ऐसा अलौकिक दुर्ग जो बना सकता है। तब वह उनको ही अन्यथा क्यों नहीं करता है ? क्यों अपना देश छुड़ाता है ? किसी प्रकार को मर्यादा का बाध नहीं होता है उनको निर्बल बनाने में ब्राह्मणों में मर्यादा बाध करती है जैसा कि दी हुई आशीर्वाद का उल्लंघन न करना पड़ेगा इसलिए ही द्वारका बनाने का सुयोग्य विचार किया है जिसमें ब्राह्मण वाक्य उल्लंघन न होगा तथा उस कार्य पर ब्राह्मणों के वचनों का प्रभाव भी न होगा. सब ठिकाने अधिक प्रयत्न, साधारण श्रम का निराकरण करता है।

"बली" शब्द पहले आया है और इसलिए यहाँ "द्विपद" देकर यह बताया है, कि जो भी दो पैर वाले यादवों के नाश के लिए आना चाहेंगे वे नहीं आ सकेंगे भले वे ब्राह्मण भी होवें, दुर्ग बता के अनन्तर उसमें वसुदेव आदि ज्ञातिवालों का वहाँ अच्छी तरह बिठावेंगे यों करने के बाद निश्चिन्त हो के यवन को मारेंगे इसमें विलम्ब बाधक न होगा नहीं तो मुचुकन्द की गुफा में भगवान् के जाने पर वसुदेवादि डरकर दुःखी होंगे ॥४६—४७॥

---

* जरासन्ध चढ़ाई करने वाला है इसके पहले आक्रमण करूँ ऐसे बीच के समय में।

आभास—एवं निर्धारिते मन्त्रे यदासीत्, तदाह इति संमन्त्र्येति ।

आभाषार्थ—इस प्रकार परामर्श करने से जो सलाह निश्चित् हुई उसका वर्णन "इति संमन्त्र्य" श्लोकों में करते हैं ।

श्लोक—इति संमन्त्र्य दाशार्हो दुर्गं द्वादशयोजनम् ।
अन्तःसमुद्रे नगरं कृष्णोद्भुतमचीकरत् ॥५०॥
दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणम् ।
रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम् ॥५१॥
सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् ।
हेमशृङ्गैर्दिविस्पृग्भिः स्फाटिकाट्टालगोपुरैः ॥५२॥
राजतारकुटैः कोष्ठैर्हेमकुम्भैरलंकृतैः ।
रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥५३॥
वास्तोष्पतीनां च गृहैर्वलभीभिश्च निर्मितम् ।
चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥५४॥

श्लोकार्थ—ऐसी सलाह कर भक्त रक्षक श्रीकृष्ण ने समुद्र के मध्य में बारह योजन में अद्भुत किला रूप नगर तैयार किया ॥५०॥

जहाँ भगवान् ने सर्व प्रकार की कारीगिरी की थी, जिसका प्रत्यक्ष दर्शन होता था, वस्तु शास्त्रों के अनुसार राजमार्ग, चौहट, गलियाँ इस प्रकार बनाई थी जो आने जाने में अड़चन न होवे तथा किसी मकान की वायु धूप आदि न रुके ॥५१॥

जहाँ देवता सम्बन्धी वृक्ष लताओं सहित उद्यान तथा उपवनों से सुशोभित घर एवं मार्ग थे, अति ऊँची स्फाटिक मणियों से निमित अटारियाँ तथा दुर्ग के फाटक आकाश को छूते हुए सोने के सींगों से युक्त कलशों से सुशोभित थे ॥५२॥

चाँदी और पीतल से बने कोठे सोने के कलशों से लस रहे थे, अमूल्य मरकत मणि के स्थल वाले सुवर्ण से बने घरों के शिखर माणिक आदि रत्नों से बनाये गए थे ॥५३॥

चारों तरफ लोकपाल तथा दुर्गा आदि देवों के स्थान थे और मध्य में भगवान् का मन्दिर सुशोभित था सारी नगरी के घर पर छज्जे भी लगा दिए थे। वह दुर्ग चारों वर्णों के मनुष्यों से भरा पड़ा था ।।५४।।

सुबोधिनी—यतो दाशार्हो भक्तरक्षक: । अनेन क्लिष्टकरणदोषोऽपि परिहृत: । ननु कालादिभिरनिर्मितं कथं निर्मास्यति, तथा सति कालादयो वा कथं न प्रतिबन्धं करिष्यन्तीत्याशङ्क्याह तद्दुर्गमेव करिष्यति । जलादिदुर्गा: प्रसिद्धा: । अतो नालौकिकं करिष्यति । किञ्च, कालहितमपि करिष्यतीत्याह द्वादशयोजनमिति । द्वादशात्मा हि काल: । प्रतिपक्षतया वा करिष्यति । अलौकिकत्वाच्चतुरस्रं तत् । सर्वापेक्षया विशेषं वक्तुं तत्त्रयं गुणत्रयमाह । अन्त:समुद्र इति समुद्रमध्ये । न सा पृथिव्यां तिष्ठति, किन्तु भूमिवत् नगर्यप्यन्तरिक्षे समुद्रमध्ये जलोपरि तिष्ठति । अन्यथा नीचे स्थिता भवेत् । तत्र वैलक्षण्यं संभविष्यतीति तन्निराकरणार्थं नगरमिति । तत्रापि विशेष: अद्भुतमिति । कृष्ण इति । सदानन्द: । तेन कृतं स्थानं तत्प्रापकं भविष्यतीति ज्ञापितम् । अचीकरदिति । स्वयमेव चकार । विश्वकर्मणा कृतमित्येके, त्वाष्ट्रमिति पदात् । वस्तुतस्तु विश्वकर्मणो यावन्नैपुण्यम्, तावदत्र भगवतैव निर्मितमिति । स हि जले कर्तुं न शक्नुयात् । अन्यथा इतो भगवति क्रमेण षड्गुणेष्वपि गतेषु सप्तमे दिवसे तं न प्लावयेत् समुद्र:, विश्वकर्मणो विद्यमानत्वात् । अस्तु वा विश्वकर्मणा कारितमिति । अचीकरद्विश्वकर्मणेति करण वा ।

यत्र नगरे त्वाष्ट्रं विज्ञानमनेकचातुर्ययुक्तं दृश्यते । शिल्पे नैपुण्यं यस्मात् विज्ञानादिति ज्ञानप्रमायां हेतुरुक्त: । किञ्च, रथ्याचत्वरवीथीभि: सहितम् । यथावास्तु वास्तुशास्त्रसहितम् । विशेषेण निर्मितम्, चित्रादिरहितेपि सामान्यनिर्माणेपि वैशिष्ट्ययुक्तम् । दैविकं लौकिकं शास्त्रीयं च ज्ञानं तस्मिन् नगरनिर्माणे प्रतिष्ठितमिति वर्णनावधित्वं निरूपितम् ।

विशेषतो वर्णयति । सुरद्रुमा: पारिजातादय: । ते उद्यानेषु यत्र । उद्यानं पुष्पप्रधानम् । उपवनं फलप्रधानम्, तैरन्वितमिति सर्वत्र उभयेषां सम्बन्ध उक्त: । अन्तर्नगरे वैशिष्ट्यमाह हेमशृङ्गैर्दिविस्पृग्भिरिति । एकविंशतिगृहोपरि सुवर्णशृङ्गाणि सुवर्णकलशस्य परित: स्थापितानि । अत एव दिवं स्पृशन्ति । तत्र निदानप्रस्तरानाह स्फाटिकेति । स्फाटिकैरेव निर्मिता: अट्टाला: गोपुराणि च ।

दुर्गत्वादन्नसङ्ग्रहार्थं रजतैरारकूटैश्च निर्मितानि कोष्ठानि रजतारकूटशब्दादण् । हेमकुम्भैश्च सर्वत: अलङ्कृतम् । घृतदध्याद्यर्थं राजतानि कोष्ठानि । अन्नार्थं तु पैत्तलनिर्मितानि । सर्वधातूपलक्षणमारकूटपदम् आद्यन्तयो: रजतसुवर्णयोरुपादानात् । उपरिशोभातिशयमुक्त्वा मध्ये शोभामाह रत्नकूटैर्गृहैर्हैमैरिति । सर्वत्र गृहा: रत्ननिर्मितपदकवत् सौवर्णा: । भूमिश्च मरकतशिलाभि: निर्मितेत्याह । महामारकतानि स्थलानि येष्विति ।।५३।।

अनुपयुक्ता अपि धर्मसाधका: कौतुकसाधकाश्च गृहा: सन्तीत्याह । वास्तोष्पतीनां वास्तुदेवताधिपतीनामिन्द्रादीनाम् । वस्तून्यस्मिन्निति वास्तुदेवता भूमि:, तस्या: पतय: सर्वे लोक-

पालाः। चकारात् दुर्गादीनामपि। अनेन मध्ये भगवतः परित आशापालानां गृहा इत्युक्तं भवतिः वलभीभिरिति सर्वत्र छजानिर्माणम्। अनेनाग्रे निर्माणक्रिया कापि नापेक्षितेति सूचितम्। किञ्च, चातुर्वर्ण्यजनाकीर्णम्। चातुर्वर्ण्यैर्जनैः पूर्वमेवाकीर्णम्,। तेन ते भगवत्कृता एव जना निरूपिताः। अन्यथा इतो गतानां वंद्यामिव पातो भवेत्। ते हीदानीमपि तिष्ठन्ति। अतस्तत्सन्निधानेन सर्वदा विद्यमानत्वसाम्यात् भगवद्गृहमाह यदुदेवगृहेण उल्लसदिति। मध्ये भगवद्गृहम्, चतुर्दिक्षु वर्णचतुष्टयानाम्। आकीर्णमिति। किर्मीरितत्वं निरूपितम् ॥५४॥

व्याख्यार्थ – भगवान् को समुद्र के मध्य में दुर्ग अर्थात् द्वारकापुरी बनाने में श्रम हुआ होगा ? आप अक्लिष्टकर्मा हैं फिर वैसा परिश्रम वाला कर्म क्यों किया ? इस शंका को मिटाने के लिए कहा है कि "दाशार्ह" भक्तरक्षक हैं अर्थात् भक्तों की रक्षा के लिए आप सब कुछ करने में हिचकते नहीं हैं, उनके वास्ते जो भी कार्य चाहें वह क्लेशदायी हो तो भी करते हैं किन्तु इससे उनको कुछ भी क्लिष्टता मालूम नहीं होती है अतः इसके बनाने से उनको क्लिष्ट करने का दोष स्पर्श भी नहीं करता है जो कालादिक नहीं बनाते हैं उसको आप कैसे बनाएंगे यदि उनके सिवाय आप बनाते हैं तो कालादिक क्यों प्रतिबन्धक न होंगे ? इस शंका को मिटाने के लिए ही "नगर" बनाना न कहकर "दुर्ग" बनाना कहा है, जलादि दुर्ग तो प्रसिद्ध ही हैं अतः अलौकिक नहीं करेंगे इसके बनने से काल का भी हित करेंगे इस लिए कहा, कि वह दुर्ग बारह योजन का होगा, क्योंकि "काल" "द्वादशात्मक" है अथवा प्रतिपक्षता से करेंगे अलौकिक होने से वह चौकाना बना था, वह दुर्ग सबसे विशेष उत्तम है यह बताने के लिए उसके तीन गुण कहते हैं (१) समुद्र के मध्य में है, जिससे यह पृथ्वी पर तैरी हुई नहीं है किन्तु पृथ्वी की भाँति अन्तरिक्ष में अर्थात् समुद्र के मध्य में जल के ऊपर है। नहीं तो नीचे चली जाए उसमें कुछ विलक्षणता होगी ऐसी शंका मिटाने के लिए दुर्ग को "नगरी" भी कहा है उसमें भी विशेष यह है कि वह "अद्भुत" है, अद्भुत क्यों और कैसे है ? इस पर कहते हैं कि इसके निर्माता कृष्ण हैं जो सदानन्द स्वरूप हैं उनका बनाया हुआ स्थान उनसे मिलाने वाला होगा श्लोक में "अचीकरत्" पद दे कर कहा है कि स्वयं ने बनाया है कोई कहते हैं कि "त्वाष्ट्" पद से समझा जाता है कि यह विश्वकर्मा की बनाई हुई नगरी है सचमुच तो विश्व कर्मा जैसी इसमें निपुणता दीखती है जिससे यह शंका उत्पन्न होती है किन्तु भगवान् ने ही यहाँ बनाई है क्योंकि विश्वकर्मा जल में ही बना सकता है। जो भगवान् ने नहीं बनाई होती तो, भगवान् के पधारने से उनके गुण भी क्रम से पधारने लगे जिससे ही समुद्र ने सातवें दिन उसको डूबो दिया। यदि विश्वकर्मा की बनाई हुई होती तो विश्वकर्मा के विद्यमान होने से समुद्र न डुबोता अथवा मान लिया जावे कि विश्वकर्मा द्वारा बनाई गई है तो भी विश्वकर्मा केवल "करण" है अर्थात् बनाई भगवान् ने है विश्वकर्मा केवल करण था जैसे कर्ता कुम्हार है चाक आदि उपकरण होते हैं।

जिस नगरी में अनेक चतुराई वाला त्वष्टा का विज्ञान दीखता है जिस विज्ञान से कारीगरी में निपुणता का ज्ञान होता है और जहाँ बड़े-बड़े मार्ग तथा चौराहे हैं, वास्तु शास्त्र के सिद्धान्त के अनुसार बनाई हुई है, वह चित्रकला के न होते हुए भी, सामान्य प्रकार से बने होने पर भी उत्तमता

तथा विलक्षणता से युक्त थी उस नगर के निर्माण में दैविक लौकिक तथा शास्त्रीय ज्ञान काम में लाया गया है इन तीन प्रकार के ज्ञान से यह बताया है, कि इससे विशेष वर्णन हो नहीं सकता है, अर्थात् इससे उत्तम नगर नहीं बन सकता है।

विशेष प्रकार से वर्णन करते हैं, जिस नगर के उद्यानों में सुगन्धित पुष्प वाले पारिजात आदि देव वृक्ष लगे हैं, पुष्प ही जिसमें विशेष हो, उसको उद्यान कहा जाता है तथा उपवन थे जिनमें फलों के पेड़ अधिक लगे हुए थे, नगरी के चारों ओर उपवन थे जिनसे नगरी की विशेष शोभा हो रही थी।

नगर के भीतर गृहों की शोभा का वर्णन करते हैं इक्कीस भार वाले गृहों के ऊपर जो सोने के कलश रखे गए थे उनके चारों ओर सोने के शृंग लगाए गए थे जो आकाश को स्पर्श कर रहे थे, अब जिन पत्थरों से अटारियाँ और नगर के फाटक बने थे उन पत्थरों को कहते हैं कि "स्फाटिकेरे-वनिर्मिताः" वे स्फाटिक प्रस्तरों (बिल्लोर) से बनाए गए थे।

दुर्ग था इसलिए अन्न आदि पदार्थों के रखने के लिए बड़े बड़े पात्रों की आवश्यकता थी, उन का वर्णन करते हैं कि चाँदी तथा पीतल आदि के बड़े बड़े कोठे बनाए गए थे और वे सोने के घड़ों से अलंकृत किए गए थे घृत और दधि आदि स्निग्ध पदार्थों के रखने के लिए चाँदी के कोठे बने हुए थे, अन्न के लिए पीतल के कोठे बने थे "आर कूट" शब्द सब धातुओं को बताने वाला शब्द समझना चाहिए, आदि और अन्त में चाँदी तथा सोना ही उपादान से काम में लिया गया था, ऊपर की शोभा का वर्णन कर बीच की शोभा का वर्णन करते हैं। सारी नगरी में जो घर बने हुए थे वे जैसे रत्नों से जड़ित पदक सोने का बना हुआ होता है वैसे सोने के बने हुए घर थे जिन पर रत्न जड़े हुहे थे। घरों की भूमि पर मरकत मणियों के फरश बान्धे गए थे ।।५३।।

लौकिक प्रकार से जो घर उपयोग में आने वाले नहीं थे तो भी वे धर्म को सिद्ध करने वाले थे, क्योंकि वे इन्द्र आदि लोकपालकों के थे, श्लोक में "च" शब्द इस आशय से दिया है कि दुर्गा आदि के भी घर थे इन घरों के बीच में भगवान् का घर था ये देवों के घर भगवान् के घर के चारों तरफ थे, लोकपालों के घर इस लिए बनाए गए थे कि वे भूमि के पति हैं।

सब घरों में छज्जे भी लगा दिए गए थे छज्जों का काम घर के सर्व प्रकार तैयार होने के बाद अन्त में किया जाता है, जिससे मालुम होता है कि निर्माण का सर्व कार्य पूर्ण हो गया है शेष कुछ भी कार्य करना रहा नहीं है यहाँ से जाने वाले मनुष्यों से पहले ही उसमें चारों वर्ण के जन का

भूमि पतियों के सिवाय प्रसन्न नहीं होती है, जहाँ पतियों का समादर होता है, वहाँ पृथ्वी प्रसन्न हो कर अपने बीजरूप में स्थित धान्यादि वस्तुओं को विशेष रूप से जन हितार्थ प्रकट करती है—

चारों दिशाओं में विस्तार हो रहा था, इससे सिद्ध है, कि वे जन भगवान् के ही प्रकट किऐ हुए हैं, यों न होता तो यहां से जाने वाले जनों का बन्दनीयों की भाँति पात हो जावे अतः उनके सामीप्य से सर्वता विद्यमान के तत्व से समानता होने के कारण वे जन निश्चय से अब भी हैं अतः यह नगर भगवान् के धन से विशेष शोभायमान था चारों दिसाओं में चारों वर्णों के घर थे और नगर के मध्य में भगवान् का घर था जैसे अनेक रंगों से चित्रित वस्त्र शोभा देता है वैसे ही यह नगरी अनेक प्रकार के घर तथा जनों से सुशोभित दीखती थी ।।५४।।

आभास— **एवं भगवता स्थाने निर्मिते, विशेषतो निर्माणे कृते, पारिजातादीनामनन्यत्वप्रतिष्ठा गमिष्यतीति लोकपालाः सर्वे स्वस्वसमृद्धि प्रेषितवन्त इत्याह सुधर्मामिति त्रिभिः ।**

आभासार्थ—इस प्रकार भगवान् ने जब द्वारका निर्माण कर दिया, तब विशेष निर्माण के लिए पारिजातादि वृक्षों की विशेष प्रतिष्ठा होगी अतः सर्व लोकपाल अपनी अपनी सम्पादाएँ भेजने लगे, जिनका वर्णन "सुधर्मा" से तोन श्लोकों में कहते है–

श्लोक—सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः ।
यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्न युज्यते ।।५५।।
श्यामैककर्णान्वरुणो हयान् शुक्लमनोजवान् ।
अष्टौ निधिपतिः कोशाँल्लोकपालो निजोदयान् ।।५६।।
यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये ।
सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ।।५७।।

श्लोकार्थ—इन्द्र ने भगवान् के लिए सुधर्मा सभा तथा पारिजात वृक्ष भेजे, जिस सभा में बैठने वालों को मृत्यु के धर्म जरा आदि किसी प्रकार का दुःख नहीं देते हैं ।।५५।।

वरुण ने श्वेत वर्ण वाले अश्व जिनके केवल एक कान काला था, चलने में मन जैसे वेग वाले थे वे भेजे, निधिपति (कुबेर) ने आठ कोश भेजे और लोकपालों ने अपने भंडार भेज दिए ।।५६।।

भगवान् ने इन्द्र आदि देवों को जो कुछ वे अपने धर्म से प्राप्त नहीं कर सकते वे पदार्थ कृपा कर दिए हैं, उनके पास जो कुछ पदार्थ हैं वे वास्तव में भगवान् के ही हैं. अत: जब भगवान् भूमि पर प्रकट होते हैं तब देव वे पदार्थ भगवान् को समर्पण कर सदैव के लिए अपने पास रहे, यह सिद्ध करते हे ॥५७॥

सुबोधिनी—यदग्रे पारिजातहरणम्, तन्मतान्तरभाषया निरूपितम्, तदग्रे विस्तरेण वक्ष्यामः। सुधर्मा देवसभा। नवरत्ननिर्मितेव भूमिरूपा काचित् देवता सुधर्मेत्युच्यते। यत्रोपवेशनमात्रेणैव धर्मो धर्मफलं च भवतीति। चकारादन्येऽपि सुरद्रुमाः। इन्द्रः सिंहासनादिकं च प्रस्थापितवानिति उभयोर्माहात्म्यं वर्णयति यत्र चेति। यत्र सुधर्मायाम्, चकारात् पारिजाता धर्मश्च। अनेन समीपे विद्यमानः सर्वदा नियतमरणधर्मापि तैः स्वाभाविकैः मर्त्यधर्मैः न युज्यते। अनेन पूर्वदोषपरिहारोऽप्युक्तः। गुणास्तु सुधर्मापदेनैवोक्ताः। अन्यामपि सम्भृतिमाह श्यामैककर्णानिति। एकः कर्णः श्यामः दक्षिणः। शिष्टः सर्वोऽपि कुन्दसन्निभः। उच्चैःश्रवस एतद्वै लक्षण्यम्। अयं स्वर्गः कर्म चेति उभयबोधनार्थं प्रवृत्तिशास्त्रस्थाने श्यामता निरूपिता। ते चाश्वाः सैन्धवा एवेति ज्ञापयितुं वरुणेन प्रस्थापितमित्युक्तम्। अन्यत्र वर्णान्तरसम्भावना स्यादिति तन्निवृत्त्यर्थं शुक्ला इति। अत एव तेषां श्लाघ्य इति शुक्लाश्च ते मनोजवाश्चेत्युक्तम्। शुक्ले जवाभावमाशङ्क्य समास उक्तः। निधिपतित्वादष्टौ निधीन् प्रेषितवानिति गम्यते। अष्टो लोकपालाश्च कोशान् भण्डारवस्तूनि। निजस्य स्वस्य स्वस्य अभ्युदयांश्च। ननु स्वयमनेकसुकृतेन प्राप्तं भोगसाधनमधिकारज्ञापकं च किमिति दत्तवन्त इत्याकाङ्क्षायामाह यद्भगवता दत्तमिति। न हि तानि वस्तूनि स्वधर्मोपार्जितानि, किन्तु भगवता दत्तानि। यतस्तदाधिपत्यम्, ईश्वरेणैव ह्याधिपत्यं दीयते। तथापि प्रतिदाने को हेतुरिति चेत्, तत्राह स्वसिद्धय इति। स्वस्य सिद्धये। अधिकारो हीश्वरेच्छयैव भवति। सा च ज्ञातुमशक्येति यथा तन्नियतं भवति, तथोपायः कर्तव्यः, तद्भगवति दान एवाक्षयं भवति। अतः स्वस्य धनस्य अधिकारस्य वा सिद्धये सम्यङ्निष्पत्त्यर्थं सर्वं प्रत्यर्पयामासुः। ननु भगवता तत्कथं ग्राह्यमिति चेत, तत्राह हरौ भूमिगत इति। भूमिरपि दत्ता ब्रह्मणे मनवे वा। पुनर्भक्तोद्धारार्थं स्वयमप्यागतः। तन्न्यायेन सर्वामपि समृद्धिं भक्तेभ्यो दातुं प्रदर्शयितुं वा अपेक्षेतेति प्रत्यर्पणमुचितम्। एतदभिज्ञानाय नृपेति सम्बोधनम् ॥५५-५६-५७॥

व्याख्यार्थ—आगे जो पारिजात लेजाने को कथा की है वह मतान्तर भाषा से कही है, उसको आगे विस्तार से कहेंगे नवरत्नों से निर्मित जैसी भूमि रूप किसी देवता को "सुधर्मा" नाम से कहा जाता है जहाँ केवल बैठने से ही धर्म का फल होता है, अत: "सुधर्मा" शब्द से "देवसभा" समझी जाती है "च" कह कर यह बताया है कि पारिजात के सिवाय दूसरे भी देवद्रुम लाए गए थे।

इन्द्र ने सिंहासन आदि सामान भी भेजा था अब दोनों के माहात्म्य का वर्णन करते हैं जिस धर्म सभा में पारिजात और धर्म भी है, यह "च" शब्द से समझा जाता है इससे क्या लाभ है, वह

बताते हैं कि इनके पास रहने से जो निश्चय से मरने वाले हैं, उनको वह स्वाभाविक मर्त्य धर्म भी कुछ नहीं कर सकता है, अर्थात् मार नहीं सकता है, इससे प्रथम कहे हुए धर्मों के दोष का परिहार भी कह दिया है और गुण तो "सुधर्मा" पद से बता दिए हैं, दूसरी सम्पत्ति का वर्णन करते हैं एक दक्षिण कर्ण श्याम था शेष सब शरीर कुन्द पुष्प के समान शुक्ल प्रकाश वाला है इन अश्वों की उच्चैश्रवा घोड़े से यह ही विलक्षणता है, स्वर्ग और कर्म दोनों प्रकार काम आने वाले ये अश्व हैं, वे अश्व सैन्धव (सिन्धु समुद्र से उत्पन्न हुए हैं) ही हैं इस बात को जताने के लिए कहा है कि ये वरुण देव ने भेजे हैं, इनका वाम श्याम कर्ण प्रवृत्ति शास्त्र रूप होने से स्वर्ग कहा है और दक्षिण कर्ण स्वर्ग का साधन रूप कर्म है, श्याम कर्ण के सिवाय अन्यत्र किसी भी दूसरे वर्ण की सम्भावना न हो इसलिए "शुक्ल" शब्द दे दिया है अर्थात् अन्य अंग श्वेत थे "शुक्लमनोजवान्" यह पद समास इस लिए दिया है कि होने से भी वे शीघ्र गामी थे निधियों के पति होने से आठों लोकपालों ने भण्डार में जो अन्न आदि वस्तुएं चाहिए वे भेजी थीं और अपने-अपने जो भी अभ्युदय हुए थे वे सर्व अर्पण किए थे।

लोकपालों ने अनेक पुण्यों से प्राप्त भोग साधन जिनसे उनके अधिकार का पता लगता था वे क्यों दिए ? इस शंका का निवारण करने के लिए कहते हैं, कि उनने जो वस्तुएँ दीं वे उनने अपने धर्म से इकट्ठी नहीं की थीं, परमेश्वर ने दी थी। अतः उन पर वास्तविक आधिपत्य परमात्मा का है उनको अधिकार भी भगवान् ने ही दिया था जब मिला तब फिर लौटाने में क्या कारण है ? इसके उत्तर में कहते हैं, कि "स्वासिद्धये" अपनी सिद्धि के लिए अधिकार ईश्वर की इच्छा से ही मिलता है वह इच्छा जानी नहीं जाती, अतः वह उपाय करना चाहिए जिससे वह अधिकारादि निश्चित हो जाए, वह अक्षय तब होता है जब भगवान् को अर्पण किया जाता है अतः अपने धन का और अधिकार का अक्षयपन हो तदर्थ सर्व प्रत्यर्पण किया है, दी हुई वस्तु भगवान् ने कैसे ली ? इसके उत्तर में कहते हैं, कि भगवान् इसीलिए लेते हैं कि भगवान् को वे वस्तुएँ भक्तों को देनी हैं, भक्तों के लिए भगवान् सब कुछ करते हैं जैसे भगवान् स्वयं वैकुण्ठादि में विराजते हैं और भूमि ब्रह्मा तथा मनु को दे दी है, तो भी आप भक्तोद्धार के लिए भूमि का ग्रहण कर आप भूमि पर प्रकट होते हैं, इस न्याय से सर्व समृद्धि भक्तों को देने के लिए वा दिखाने के लिए भगवान् को अपेक्षित होती है, अतः लोकपालों का प्रत्यर्पण उचित है, इस को जताने के लिए "नृप" सम्बोधन दिया है ॥ ५५-५६-५७ ॥

आभास—**यदर्थमेतन्निर्माणं तदाह तत्रेति ।**

आभासार्थ—जिसके लिए इसका निर्माण हुआ वह "तत्र" श्लोक से कहते हैं।

श्लोक—तत्र योगप्रभावेण नीत्वा सर्वजनं हरिः ।
प्रजापालेन रामेण कृष्णः समनुमन्त्रितः ॥

निर्जगम पुरद्वारात्पद्ममाली निरायुधः ॥५८॥

श्लोकार्थ—प्रजापालक बलरामजी से परामर्श कर दुःखहर्ता पद्मों की माला पहिने हुए भगवान् कृष्ण बिना शस्त्र, नगर के बाहिर निकले और सर्व मनुष्यों को योग प्रभाव से लेकर द्वारका में पहुँचा कर आप लौट आए ॥५८॥

सुबोधिनी—अणिमा यो हि योगस्य सहजफलानि । इदं तु वक्ष्यमाणं योगस्यानुभावस्य फलम् । यथा स्थितान शयानान् सर्वानेव तेषां दुःखनिराकरणार्थं तत्र द्वारकायां नीत्वा स्वयं पुनरागतः । तत्रत्यप्रजानां देशवासिनां दुःखनिवृत्त्यर्थं बलभद्रं निरूप्य प्रजापालने अङ्गीकृते तेन प्रजापालने वस्तुतोपि रामेण रत्युत्पादकेन कृष्णः स्वयं सदानन्दः नातः परमत्र मथुरायां स्थेयमिति ज्ञापयन्निव साधनानुमतिं गृहीत्वा फलरूपः ततो निवृत्त इत्याह निर्जगामेति । नितरां गमनं नित्यसन्निधिरूपेणापि ततो निर्गत इति ज्ञापयितुम् । नित्यक्रियारूपेण तु वर्तते इति न काप्यनुपपत्तिः । पुरद्वारादिति निर्गमनं सर्वजनीनं भवत्विति । निर्गच्छता भगवता द्वयं ज्ञापितमिति विशेषणद्वयमाह पद्ममाली निरायुध इति । ततः कीर्तिर्नीता, रक्षा तु कृतेति । एवं निर्गमनस्य प्रयोजनमग्रे स्पष्टं भविष्यति ॥५८॥

इति श्रीभागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे प्रथमाध्यायविवरणम् ॥१॥

व्याख्यार्थ—अणिमा आदि सिद्धियां जो योग का सहज फल है, यह जो यहाँ फल कहा जाता है, वह योग की सामर्थ्य का फल है जैसे ही सोये पड़े थे वैसे हीं उन सबको वहाँ पहुँचाकर आप लौट आए वहाँ लेजाने का कारण उनके दुःख का मिटाना था यहाँ रहने से वे संकट से दुःखी होते थे ।

वहाँ को प्रजाओं के दुःख निवृत्ति के लिए बलभद्र को कहा रति के उत्पादक, उसने वह स्वीकार किया । कृष्ण भी स्वयं सदानन्द हैं. इसके अनन्तर यहाँ मथुरा में रहना नहीं चाहिए मानों यों जनाते हुए बलरामजो से साधन की अनुमति ले फल रूप कृष्ण मथुरा से पधारे । यद्यपि मथुरा में आपकी सदैव स्थिति है, तो भी आप पधारे किन्तु नित्य क्रिया रूप से तो यहाँ विराजते हैं । अतः इसमें किसी प्रकार अनुपति (असंगत) नहीं है नगर के द्वार से बाहिर जाना प्रसिद्ध ही है, भगवान् ने पधारते समय दो बात बताई (१) पद्मों की माला धारण कर पधारे, जिससे यह बताया कि हमने साथ कीर्ति भी ली है ।

और (२) शस्त्रों के बिना जाते हुए भी रक्षा * की है। इस प्रकार निकलने का प्रयोजन आगे स्पष्ट होगा ॥५८॥

इति श्रीमद्भागवत महापुराण दशमस्कन्धानुसार ५० वाँ अध्याय- उत्तरार्ध १ अध्याय
श्रीमद्वल्लभाचार्य चरणकृत श्री सुबोधिनी (संस्कृत टीका) का राजस-साधन
अवान्तर प्रकरण का प्रथम अध्याय श्री सुबोधिनी अनुसार ४७ वाँ अध्याय
हिन्दी अनुवाद सहित, सम्पूर्ण।

---

* इस प्रकरण की लीला प्रद्युम्न स्वरूप से की है, अतः बन्धुओं की रक्षा के लिए शस्त्र ग्रहण किए हैं, किन्तु अब जो रक्षा की है, वह 'स्थानदान से" की है अर्थात् द्वारका में पहुँच कर रक्षा की है अतः आप बिना शस्त्र के पधारे हैं।

राग मारू

श्याम बलराम जब कंस मारयो।
सुनि जरासन्ध वृत्तान्त अस सुता से युद्धहित कटक अपनो हंकारयो ॥
जोरि दल प्रबल सो चल्यो मथुरापुरी सुन्यो भगवान जब निकट आयो।
तब दुहुँ वीर दल साजिकै अपनो नगरते निकसि रणभूमि छायो ॥
दुहुँ दिशि सुभट बाँके निकट अति जुरे मनो दोउ दिशि घटा उमड़ि आई।
सूर प्रभु सिहध्वनि करत जोधा सकल जहाँ तहँ करन लागे लराई ॥

÷÷

॥ श्री कृष्णायनमः ॥

॥ श्री गोपीजन वल्लभाय नमः ॥

॥ श्री वाक्पति चरण कमलेभ्यो नमः ॥

श्री मद्वल्लभाचार्य विरचित सुबोधिनी टीका के हिन्दी अनुवाद सहित

दशम स्कन्ध उत्तरार्ध

राजस साधन अवान्तर प्रकरण

द्वितीय अध्याय

सुबोधिनी अनुसार ४८ वां अध्याय

स्कन्धानुसार ५१ वां अध्याय

कालयवन का भस्म होंना तथा मुचुकुन्द की कथा

★

कारिका—निग्रहं प्रथमेऽध्याये निरूप्य हरिणा कृतम् ।
द्वितीयेऽनुग्रहं प्राह मुचुकुन्दाय तत्कृतम् ॥१॥

कारिकार्थ—पहले अध्याय में हरि ने जो निग्रह किया उसका निरूपण कर, दूसरे अध्याय में मुचुकुन्द पर किए हुए अनुग्रह को कहते हैं ॥१॥

कारिका—तामसी हननाख्या हि राजसी नगरोद्यमा ।
सात्विकी नयनाख्या च निर्गुणा निर्गमस्तथा ॥२॥

कारिकार्थ—हनन रूप लीला तामसी है, नगर रचना रूप उद्यम लीला राजसी है, मथुरा वासियों को लेजाने की लीला सात्विकी है और मथुरा से निर्गमन की लीला निर्गुण है ॥२॥

कारिका—निर्गुणस्य निमित्तत्वं न तु कर्तृत्वमीर्यते ।
प्रबोधो मरणं चैव संवादश्च यथाक्रमात् ॥३॥

स्तुतिश्च निर्गुणा प्रोक्ता तदग्रे हि फलिष्यति ।
अतो निर्गुणलीलात्र द्वितीये विनिरूप्यते ।
क्रिया भगवतो द्वेधा गुणेषु स्वे यतः स्थिता ॥४॥

कारिकार्थ—निर्गुण स्वरूप निमित्त मात्र है न कि कर्ता है, जगना[1] ,मरण[2] , संवाद[3] , तथा स्तुति[4] है, वह निर्गुण है जिसका फल पीछे[5] होगा इस कारण[6] से दूसरे अध्याय[7] में निर्गुण लीला का विशेष निरूपण है, भगवान् की क्रिया लीला दो प्रकार की है क्योंकि लीला गुणों[8] में रहती है अर्थात् गुणों द्वारा होती है, लीला अपने स्वरूप[9] में स्थिति है अर्थात् धर्मी स्वरूप से की जाती है ॥३-४॥

कारिका सम्पूण

आभास—**पूर्वाध्यायान्ते तत्त्वान् परित्यज्य केवलं तं व्यामोहयितुं कीर्तिमयीं वनमालां बिभ्रत् निर्गत इत्युक्तम्, कालयवनस्य मुक्त्यर्थं नारदोपदेशं गृहीतवतः साक्षात्कारः। ततस्तदनुसरणम्, ततो दृष्ट्या ज्ञानरूपेण ज्ञानाग्निना संघातनाशश्च निरूप्यते। निर्गुणक्रियाया मोक्षपर्यवसानात्। परं तस्य काल एव मुक्तिरिति निरूपयितुं द्वादशभिर्निरूप्यते तं बिलोक्येति ।**

आभासार्थ—प्रथम अध्याय के अन्त में कहा गया कि भगवान् बिना आयुधों[10] के केवल कमल माला धारण कर मथुरा से पधारे, यों भगवान् ने किया, उसका भावार्थ यह है, कि भगवान् के आयुध तत्वरूप हैं, अतः वे यहाँ हो छोड़ गए, जिससे वह मोहिते हो, कि यह ऐसे निर्भय हैं, जो बिना आयुधों के गमन कर रहे हैं और इससे भगवान् को कीर्ति सम्पादित की, जिसका चिन्ह कमल माला धारण की थी, नारद से उपदिष्ट कालयवन को मोक्ष देने के लिए उसे दर्शन दिया, पश्चात् उसका अनुसरण करना, अनन्तर दृष्टि से एवं ज्ञान रूप ज्ञानाग्नि से उसके संघात के नाश का निरूपण

१-मुचुकुन्द का जागना, २-यवव का मरण, ३-भगवान् और मूचुकुन्द का वार्तालाप, ४-मुचुकुन्द की दी हुई भगवान् की स्तुति, ५-मुचुकुन्द की मुक्ति जन्मान्तर में होगी, ६-विशेष लीला न होने से पहले अध्याय का अर्थ चारों लीला में है, ७-दूसरे अध्याय का अर्थ निर्गुण लीला है क्योंकि मोक्ष लक्षण फल मिलेगा ।
(८) सगुण लीला, (९) निर्गुण लीला, (१०) हथियारों

किया गया है। निर्गुण-क्रिया का फल मोक्ष होता है, किन्तु वह फल उसको समय आने पर प्राप्त होगा इसका निरूपण 'तं विलोक्य" श्लोक में करते हैं।

श्रीशुक उवाच—

श्लोक—तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपम् ।
दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥१॥

श्लोकार्थ—श्री शुकदेवजी कहते हैं कि, अतिशय सुन्दर श्याम स्वरूप पीले रेशमी वस्त्रों वाले उन **श्रीकृष्ण** को विशेष प्रकार वाले दूज के चन्द्र के समान बाहिर निकलते हुए देख कर उन्हें पकड़ने की इच्छा से पीछे दौड़ने लगा, छठे श्लोक से अन्वय है ॥ १ ॥

सुबोधिनी—तं विलोक्य वासुदेवोऽयमिति निश्चित्य, तं जिघृक्षुरन्वधावदिति षष्ठेन संबन्धः। तत्रादौ त्रिभिस्तद्दृष्टं रूपं वर्णयति। पञ्चदशकलापूर्णमिव तावद्भिर्विशेषणैः। अतः प्रथमतः चन्द्रदृष्टान्तेनैव निरूपयति। विशेषेण निष्क्रान्तम्, यथा उदयाद्रेश्चन्द्रः, न तु राहोर्मुखात्, नापि मेघेभ्यः। तथा भगवानपि न मारयितुं, नापि भयमुत्पादयितुं, भयेन वेति तदाह उज्जिहानमिति। प्रथमदर्शनापेक्षया द्वितीयदर्शने अधिककान्तियुक्तः प्रतीयत इति। ननु विशेषकान्तिप्रदर्शनं किमर्थमित्याशङ्क्याह उडुपमिवेति। चन्द्रो हि नक्षत्राणां रक्षकः। यदि तत्तन्नक्षत्रे न गच्छेत्, गत्वा वा तं न प्रकाशयेत्, स्वरूपतः फलतश्च, तदा नक्षत्राणां वैयर्थ्यमेव स्यात्। तथा भगवान् नारदादीनां रक्षार्थं तदुपदिष्टेषु स्वानुभावं ख्यापयितुं प्रतिक्षणं रूपवैशिष्ट्यं प्रकाशितवानित्यर्थः। किञ्च, तस्मिन् दृष्टे युद्धार्थं समागतानां क्रोधः कदाचिद्भवेत्, ततश्चासन्मत्या मोक्षो न भवेदिति भगवान्स्वस्वरूपं सुन्दरत्वेनैव प्रकाशितवानित्याह दर्शनीयतममिति। दर्शनीयोऽतिसुन्दरः। अत्याश्चर्यं हि परस्मै प्रदर्श्यते। स्वस्यापि पुनः पुनर्द्रष्टव्यो भवति। श्याममिति। रसात्मकता निरूपिता। सर्ववेदयुक्तत्वमाह पीतकौशेयवाससमिति। नग्नान्न मुक्तिरिति वैदिकः सिद्धान्तः। 'आद्यन्तमध्ये बद्धो हि वेदेनामृतमश्नुत' इति।

कच्छाशिखोपवीतानि बन्धनान्याह वेदतः।

पीतवर्णं कौशेयं वासो यस्येति। वेदो यज्ञो देवाश्च पदत्रयेण परिगृहीताः। छन्दोमयं पीतमिति। कौशेयं क्षौमम्। 'सौम्यं वै क्षौम'मिति श्रुतेः। सर्वदैवत्यं वास इति च। अन्यथा पीताम्बरमित्येव ब्रूयात्। भगवदीयं हि न प्राकृतप्रकृतिकं भवतीति विशेषणवैयर्थ्यं च ॥१॥

व्याख्यार्थ—उसको देख कर यह निश्चय किया कि यह वासुदेव है, उनको पकड़ने के लिए पीछे दौड़ने लगा। देखे हुए स्वरूप का तीन से वर्णन करते हैं, पन्द्रह कलाओं से पूर्ण की तरह, उतने ही विशेषण देकर वर्णन करेंगे। अतः पहले चन्द्रमा के दृष्टान्त से वर्णन करते हैं, जैसे राहु के मुख से वा

बादलों से नहीं, किन्तु उदयाचल से जो चन्द्रमा उदय होता है वह सर्व का आनन्द देता है, वैसे ही भगवान् भी मारने के लिए नहीं, न भय पैदा करने के लिए और न स्वयं भय से प्रकट हुए हैं, किन्तु आनन्ददानार्थ आविर्भूत हुए हैं इस लिए "उज्जिहानं" पद दिया है। चन्द्रमा पहले दिन से दूसरे दिन विशेष प्रकाश वाला प्रतीत होता है, विशेष प्रकाश किस लिए ? इसका उत्तर देते हैं, कि चन्द्रमा नक्षत्रों का रक्षक है, यदि प्रत्येक नक्षत्र के प्रकाश द्वारा न पहुँचे और उस प्रकाश से उनको प्रकाशित न करे, स्वरूप और फल से विमुख करदे, तो नक्षत्रों का जन्म ही व्यर्थ हो जावे, वैसे ही भगवान् नारद आदि भक्तों की बात रखने के लिए उन्होंने जिसको उपदेश दिया है उसके आगे अपना प्रभाव प्रकट करने के लिए हरेक क्षण में अपने रूप की विशेषता प्रकट करने लगे। उनके देखने पर युद्ध के लिए आए हुए शत्रुओं का कदाचित् क्रोध आ जाय तो असन्मति होने से, मोक्ष रुक जाएगा, इसीलिए भगवान् ने अपना स्वरूप अतीव सुन्दर बनाके दर्शन दिया, जिससे उनको न क्रोध आवे और न उनको असन्मति हो, तथा अपने विशेष सौन्दर्य से शत्रु को बहुत आश्चर्य में डाल देते हैं, अपने को भी बार बार देखने योग्य होता है क्योंकि वैसा ही आपका (श्याम) स्वरूप है, श्याम शब्द से अपने स्वरूप की रसात्मकता बताई, जैसे श्याम मेघ रसपूर्ण होते हैं, "पीत कौशेयवाससम्" पद से यह बताया है कि वेद, यज्ञ और देव ये तीनों मेरे भीतर हैं, कारण कि श्रुति कहती है कि ',आद्यन्तमध्ये बद्धो" वेदेनामृतमश्नुत" जो मनुष्य ऊपर, मध्य और नीचे वस्त्रयुक्त हैं वह वेद से अमृत पान कर सकता है, जो नग्न है उनका मोक्ष नहीं होता है, जैसे कि वेद में कहा है "कच्छाशिखोपवीतानि बन्धनान्याह वेदतः" नीचे का वस्त्र शिखा और उपवीत ये तीन बन्धन हैं, ये जिनको हैं उनका वेद वचनानुसार मोक्ष होता है, अतः भगवान् ने पीत रंग से वेद को, पटवस्त्र से यज्ञ को और निम्न वस्त्र बान्धने से देवताओं को धारण कर रखा है, यदि इन तीनों को धारण न किया हो तो "पीताम्बर" धारण किया है यों कहते थे, भगवदीय पदार्थ भी प्राकृतिक प्रकृति के नहीं होते हैं यह ही विशेषण का सामर्थ्य है ॥१॥

आभास—एवं धर्मरूपतां निरूप्य अर्थरूपतामाह श्रीवत्सवक्षसमिति ।

आभासार्थ—इस प्रकार भगवान् के **धर्मरूपता का** वर्णन कर अब **अर्थरूपता का** वर्णन "श्रीवत्स" श्लोक से करते हैं--

श्लोक— श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
पृथुदीर्घचतुर्बाहुं नवकञ्जारुणेक्षणम् ॥२॥

श्लोकार्थ—छाती पर श्रीवत्स का चिन्ह धारण किए हुए देदीप्यमान कौस्तुभ मणि को कण्ठ में धारण किए हुवे मोटी और लम्बी चार भुजाओं वाले और नवीन कमल जैसे लाल नेत्र वाले "उन (भगवान्) को देखकर ।।२।।

सुबोधिनी—श्रीवत्सो वक्षसि यस्येति । दक्षिणावर्तरोमरेखायां सुवर्णरेखावत्तेजोविशेषः श्रीवत्सशब्देनोच्यते । वक्षसि जीवः सन्निहित इति तत्रैव भगवता अर्थः स्थापितः सुतराम् । दक्षिणः स्तनो धर्मो भवतीति धर्मप्रतिष्ठित एवार्थो भगवता परिगृहीतः । अत एव तत्र जीवप्रतिष्ठामाह । भ्राजत्कौस्तुभेनामुक्ता कन्धरा यस्येति । 'पुरुषः काममय' इति कामस्तन्निरूपणेन निरूपितः । मोक्षस्तु स्वनैव दीयत इति प्रसङ्गादन्यदानमपि चतुर्भुजत्वेन निरूपयति पृथुदीर्घेति । पृथवो दीर्घाः चत्वारो भुजा यस्येति । कृपया ज्ञानमपि प्रयच्छतीति ज्ञापनार्थमाह नवकञ्जारुणेक्षणमिति । नवकमलवदरुणे ईक्षणे यस्य । नूतनत्वेन कालाग्रासः, कञ्जत्वेन सात्त्विकता, अरुणत्वेन राजसता च, ईक्षणस्य निरूपिता । तेन सरसा सदया ज्ञानदृष्टिर्भगवदीया भक्तिं साधयतीति पञ्चमोऽपि पुरुषार्थो निरूपितः ।।

व्याख्यार्थ—श्री अंग में दक्षिण तरफ वाली रोमों की रेखा में जो सुवर्ण की रेखा सकल विशेष तेज दृग्गोचर होती है उसको "श्रीवत्स" कहते हैं वह जिसकी छाती पर शोभायमान है, जीव छाती के निकट स्थित है, अतः भगवान् ने 'अर्थ' अतिशय कर वहाँ ही पर धारण किया है दक्षिण स्तन धर्म है, इसलिए धर्म में स्थित ही अर्थ भगवान् ने ग्रहण किया है अतएव वहाँ जीव की स्थिति कहते हैं, देदीप्यमान कौस्तुभमणि को कण्ठ में धारण कर यह दिखाया है कि मैंने "काम" को भी धारण किया है, कारण कि श्रुति कहती है, कि 'पुरुषकाममयः" इस श्रुति को चरितार्थ कर दिखाया है मोक्ष तो अपने आप ही देते हैं शेष अन्य दान भी प्रसंग आने पर देते हैं जिसको "चतुर्भुज" होने से निरूपण करते हैं कि आपकी चार भुजाएँ मोटी और लम्बी हैं, कृपा कर ज्ञान भी देते हैं, इसको जताने के लिए कहा है, कि आपके नेत्र नवीन कमल सदृश लाल हैं, नेत्रों की नवीनता से यह कहा है कि जिस पर आपकी कृपा दृष्टि पड़ती है उसको, काल अपना ग्रास नहीं बना सकता है, कमलपन से सात्विकता प्रकट की है अरुणपन से राजसता आविर्भूत की है, इससे यह कहा है, कि रस और दया से युक्त भगवान् की ज्ञान दृष्टि जिस पर पड़ती है, उसकी भक्ति सिद्ध हो जाती है अर्थात् वह जीव भक्त बन जाता है, इस प्रकार पाँचवा पुरुषार्थ भी निरूपण किया है ।।२।।

आभास—प्रार्थनावसर इति ख्यापयति नित्यप्रमुदितमिति ।

आभासार्थ—यह प्रार्थना का अवसर है यह "नित्यप्रमुदित" श्लोक से प्रकट करते हैं--

श्लोक—नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् ।
मुखारविन्दं बिभ्राणं स्फुरन्मकरकुण्डलम् ।।३।।

श्लोकार्थ—नित्य आनन्दयुक्त, शोभायुक्त, सुन्दर कपोल वाले, मनोहर मन्द मुसक्यान वाले, चमकीले मकर कुण्डलों वाले मुखारबिन्द को धारण किए हुए उनको देखकर ।।३।।

सुबोधिनी—एवं सर्वपुरुषार्थदातारं भगवन्तं निरूप्य, मुखारविन्दमपि पञ्चभिर्विशेषणैः, विशिष्टं पञ्चपर्वविद्यारूपं स्वतन्त्रभक्तिमार्गत्वेन निरूपयन्नाह श्रीमदिति । मुखारविन्दं बिभ्राणमिति भगवद्विशेषणम् । स मार्गो भगवतैव स्थाप्यत इति ख्यापयितुम् । तदपि श्रीयुक्तं भवति परमसुन्दरम् । भगवानिव । सुष्ठु कपोले यस्येति । प्रवृत्तिनिवृत्तिप्रकारेणापि रसानुभवस्थानयुक्तम् । शुचि शुद्धं स्मितं यस्मिन्निति । सेवनार्थमेव समीचीनं मोहं संपादयति, नान्यथेति निरूपितम् । स्फुरन्ती मकरसदृशे कुण्डले यस्येति । बहिर्निर्गमने ग्रासार्थं स्थापिताविव मकरतुल्यौ वेदौ निरूपितौ । मोक्षदित्सया गच्छन् भगवन्मार्गं भक्तिमार्गं च स्थापयतीति निरूपितम् ।।३।।

मनुष्यचेष्टामापन्नौ राजन्दुद्रुवतुर्द्रुतम् ।।७।।

श्लोकार्थ—राम-कृष्ण शत्रुओं की सेना बड़ी वेग से आ रही है यह देख हे राजन् ! मनुष्य नाट्य किए हुवे वे दोनों जल्दी भागने लगे ।।७।।

सुबोधिनी—ते च सर्वे लब्धवराः, पूर्वापेक्षयापि वेगवन्त इति । 'देवानां वाक्यं परिपालनीयं मनुष्यै'रिति मनुष्यचेष्टामापन्नौ, मनुष्यभावस्वीकारे हि ब्राह्मणवाक्यं शिववाक्यं च माननीयं भवति । भागवते चास्याकथनं लोकव्यामोहनार्थम् । राजन्निति स्नेहेन संबोधनं भ्रमानुत्पादनार्थम् । द्रुतं यथा भवति, तथा दुद्रुवतुः पलायितवन्तौ ।।७।।

व्याख्यार्थ—सेना में जो सैनिक आदि आ रहे थे उन सब को वर मिला था इसलिए पहिले की अपेक्षा अब वेग से आरहे थे जिसको देखकर दोनों जल्दी भाग गए कारण कि आप मनुष्य चेष्टा करने को उद्यत हुए हो और मनुष्य नाट्य स्वीकार करने पर देवताओं का वाक्य मनुष्यों को पालना चाहिए मनुष्य को ब्राह्मण के एवं शिव के वचन मान देने योग्य हैं । लोक को मोह में डालने के लिए भागवत में इसका कथन नहीं है राजन् ! यह संबोधन स्नेह से इसलिए दिया है कि इसमें राजा को भ्रम उत्पन्न न होवे जिससे जल्दी ही वैसे दोनों भागे ।।७।।

श्लोक—**विहाय वित्तं प्रचुरमभीतौ भीरुभीतवत् ।**
पद्भ्यां पद्मपलाशाभ्यां चेरतुर्बहुयोजनम् ।।८।।

श्लोकार्थ—बहुत मिले हुए धन को छोड़ कर निर्भय होते भी डरपोकों से भी डरे हुए की भाँति कमल के समान कोमल चरणों से बहुत योजन जाने लगे ।।८।।

सुबोधिनी—विहायेति । भारवाहकास्तु गन्तुमसमर्था इति तान्विहायैव, प्रचुरमपि वित्तं विहाय, अभीतावप्येतौ भीतेभ्योऽपि भीताविव रथाश्वादिकमपि यवनवधात्प्राप्तं विसृज्य, पद्भ्यामेव भूमिसुखार्थं पद्मपलाशतुल्याभ्यां बहुयोजनं चेरतुः, चित्रकूटमार्गेण गतौ ।।८।।

व्याख्यार्थ—भार ढोने वाले तो जल्दी जाने में समर्थ नहीं होते थे इससे उनको छोड़ कर ही, बहुत धन भी त्याग कर स्वयं डरे तो नहीं थे किन्तु डरपोकों से भी डरे हुए जैसे हो, यवनों के वध

से प्राप्त रथ और अश्व आदि भी वहीं छोड़ कर भूमि को सुख देने के लिए कमल के पत्तों के समान कोमल चरणों से बहुत योजन चित्रकूट के रास्ते से जाने लगे ॥८॥

आभास—ततो मागधोऽपि भगवल्लीलामज्ञात्वा वरेण दृप्तः पृष्ठतोन्वगमदित्याह पलायमानाविति ।

आभासार्थ—पश्चात् मगध भी भगवान् की लीला को न जान कर वर प्राप्त करने से घमन्डी हुआ था अतः पीछे जाने लगे जिसका वर्णन "पलायमानौ" श्लोक में करते हैं--

श्लोक　पलायमानौ तौ दृष्ट्वा मागधः प्रहसन्बली ।
अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥९॥

श्लोकार्थ—उनको भागते हुवे देख सेना सहित वह हँसता हुवा शीघ्र जाने वाले रथों में बैठ उनके पीछे दोड़ा क्योंकि उन दोनों ईशों में कितनी शक्ति हैं इसको वही जानता था ॥९॥

सुबोधिनी—तौ रामकृष्णौ । ननु बहुवारं धृत्वा मुक्तः, तयोर्बलं जानन्नपि कथं तत्सङ्गे गत इति चेत्, तत्राह मागध इति । देशदोषेण नष्टमतिरित्यर्थः । ततः प्रहसन् बलसहितः सेनासहितः अन्वधावत्, रथानीकैः सहेति ये शीघ्रगामिनो रथास्तानारुह्य तादृशैः सह गत इत्यर्थः । अनेन रथानां सेनायाश्च महान् क्लेशो निरूपितः । स क्लेशः सार्थको भविष्यतीत्याशङ्क्याह ईशयोरप्रमाणविदिति । कृष्णरामयोः प्रमाणं सामर्थ्यमादरणीयत्वं वा । तौ हि ब्राह्मणादिवाक्यं प्रमाणीकृत्य भगवान् गच्छति, न त्वशक्तः सन् इति भगवत्प्रमाणं न ज्ञातवान् । ईशयोरिति पूर्णा शक्तिर्विभक्तेति एकस्याप्यनङ्गीकारे विप्रादीनां वाक्यमप्रमाणं भवेदिति उभाभ्यां तत्प्रमाणीकृतमित्यर्थः ॥९॥

व्याख्यार्थ—उसने राम और कृष्ण की शक्ति को क्यों नहीं जाना, जब कि कई बार उन्होने उसे पकड़ कर छोड़ दिया है ? इस शंका के मिटाने के लिए जरासन्ध न कह कर "मागध" कहा है, जिसका भाव यह है कि मागध देश वासी होने से इसकी बुद्धि नष्ट हो गई है इस कारण से हँसता हुआ सेना सहित पीछे दौड़ने लगा रथ और सेना सहित, जो रथ शीघ्र चलने वाले थे उनमें बैठ सेना के साथ गया इससे यह बताया कि रथ तथा सेना को बहुत कष्ट हुआ क्या वह कष्ट सफल होगा ? इस शंका का निवारण करते हुवे कहते हैं कि "ईशयोरप्रमाणवित्" राम कृष्ण के सामर्थ्य अथवा

उनके आदरणीयपन को नहीं जानता है, भगवान् क्यों जा रहे हैं ? भगवान् अशक्त हैं इसलिए डर कर नहीं जा रहे हैं किन्तु ब्राह्मण के वचनों को सत्य करने के लिए ही जारहे हैं इस रहस्य को उसने समझा नहीं "ईशयोः" दोनों में पूर्ण शक्ति विभक्त है इसको सिद्ध करने के लिए दोनों गए यदि एक जाते तो ब्राह्मण आदि के वाक्य पूर्ण प्रमाणित नहीं होते इसलिए दोनों ने जाकर उनके वचन सत्य प्रमाण किए ।।९।।

आभास—**ततो रामकृष्णौ पर्वतेन प्रार्थितवरौ तत्प्रियार्थं तुङ्गं गिरिमारुहताम् । स हि पर्वतः सर्वदा शीतेन व्याप्तः, भगवन्तं शीतनिवृत्त्यर्थं विज्ञापयामास । तत्र हि न कदाचिदपि सूर्याग्निसम्बन्धः । मेघानां तत्प्रियं स्थानम् । अतो मेघाच्छन्न एव तिष्ठतीति न सूर्यसम्बन्धः । वर्षतीति नाग्निसम्बन्धः । ततो भगवान् पूर्वं तस्मै वरं दत्तवान् अहमागत्य ते शीतं निवारयिष्यामीति । ततो भगवतः अद्भुतकर्मत्वं प्रतिपादयितुं श्रान्तिमुक्त्वा पर्वतारोहणं वदति प्रद्रुत्येति ।**

आभासार्थ—इस के बाद रामकृष्ण दोनों प्रवर्षण नाम वाले ऊँचे पर्वत पर उसके प्रिय मनोरथ पूर्ण करने के लिए चढ़ गए, उस पर्वत पर सदैव ठन्ड रहती है उसने भगवान् को शीत मिटाने के लिए प्रार्थना की थी उस पर्वत से कभी भी सूर्य अथवा अग्नि का सम्बन्ध नहीं होता था क्योंकि वह बादलों का बहुत प्रिय स्थान है अतः मेघों से ढका हुआ रहता है जिससे सूर्य का सम्बन्ध नहीं होता है और सदैव वहाँ वर्षा होती रहती है इसलिए अग्नि का सम्बन्ध नहीं होता है इस कारण से पहिले पर्वत ने भगवान् को शीत मिटाने के लिए प्रार्थना की थी भगवान् ने भी वर दिया था कि मैं आकर तेरा शीत निवारण करूँगा इस कारण से भगवान् अद्भुत कर्मा हैं इसका प्रतिपादन करने के लिए मुझे थकावट हुई है यों दिखा कर उसको मिटाने के लिए पर्वत पर चढ़ गए जिसका वर्णन "प्रद्रुत्य" श्लोक में करते हैं--

श्लोक—**प्रद्रुत्य दूरं संश्रान्तौ तुङ्गमारुहतां गिरिम् ।**
प्रवर्षणाख्यं भगवान्नित्यदा यत्र वर्षति ।।१०।।

श्लोकार्थ—बहुत दूर तक दौड़ने से मानो थक गए तब प्रवर्षण नाम वाले ऊँचे पर्वत पर चढ़ गए जहां भगवान् स्वयं सदा ही वर्षते रहते हैं ।।१०।।

सुबोधिनी—न हि कश्चिद्दूरं प्रद्रुत्य तुङ्गं गिरिमारोहति । उच्चारोहणं ह्यश्रान्तमपि श्रमयति, भगवतः सहस्रोपायानां विद्यमानत्वात् निलीय स्थित्यर्थं किं पर्वतारोहणमुच्चस्थानमपेक्षते, प्रत्युत उच्चस्थितं सर्वोऽपि पश्यति, अतोऽत्र भगवत्ः अद्भुतलीलां कथयन् विरोधप्रकारेण कथयति । दूरं प्रद्रुत्य धावनं कृत्वा सम्यक् श्रान्तौ जातौ । नहीशयोः शीघ्रगमनं श्रमो वा सम्भवति । तत्रापि तुङ्गमत्युच्चं गिरिं आरुहतां गुप्ततया । तत्रारोहणप्रयोजनमाह प्रवषणाख्यमिति । प्रकर्षेण वर्षणं यत्रेति । रूढिभ्रमव्युदासाय स्वमेव योगं प्रदर्शयति भगवान् 'नत्यदा यत्र वर्षतीति । तत्र हि सर्वदा भगवान् वर्षति । मेघा हि कदाचित् कचिद्वर्षन्ति, तेषामधिष्ठातृरूपो भगवान् विष्णुः । 'पर्वतानामधिपति'रिति श्रुतेः । स्वयमेव तत्र वर्षति, अन्यथा लोके वृष्टिप्रवृत्तिर्न स्यात् ।।१०।।

व्याख्यार्थ—कोई भी बहुत दूर दौड़ने के बाद थका हुआ ऊँचे पर्वत पर नहीं चढ़ सकता है, थका हुआ नहीं है उसको भी ऊँचे स्थान में चढ़ने में श्रम होता है भगवान् तो छिप कर रहने वास्ते हजारों उपायों को जानते हैं उच्च स्थान पर्वत पर चढ़ने की क्या आवश्यकता थी बल्कि उच्च स्थान पर बैठे हुवे को सब देख सकते हैं यों है किन्तु यहाँ तो भगवान् की अद्भुत लीला कहनी है, इसलिए विरोधी तरीके से कहते हैं-

दूर दौड़ने से बहुत थक गए हांलाकि जो ईश है सर्व समर्थ हैं उनके लिए शीघ्र जाना वा श्रम कुछ भी नहीं है उसमें भी गुप्त रीति से बहुत ऊँचे पर्वत पर चढ़ गए पर्वत पर चढ़ने का प्रयोजन वा प्रकार कहते हैं जिस पर्वत पर हमेशा वर्षा होती है जिससे उसका नाम "प्रवर्षण" है, वर्षा तो सब पर्वतों पर पड़ती है यह रूढि हो है यहाँ भी पड़ती है इसमें विशेषता क्या है ? इस रूढि के भ्रम को मिटाने के लिए कहते हैं कि इस पर्वत पर भगवान् स्वयं वर्षते हैं अन्य स्थानों पर मेघ वर्षा करते हैं वे कभी करते हैं कभी नहीं करते उनका "पर्वतों का" अधिष्ठातादेव विष्णु भगवान् है जैसा कि श्रुति में "पर्वतानामधिपति" कहा है अतः स्वयं विष्णु वहाँ वर्षते हैं यदि भगवान् आप वर्षा न करे तो लोक में वर्षा की प्रवृति हो न हावे ।।१०।।

आभास—ततो भ्रान्तस्य जरासन्ध कृत्यमाह गिराविति ।

आभासार्थ—पश्चात् भ्रमित हुवे जरासन्ध ने कुछ किया वह "गिरौ" श्लोक में कहते हैं--

श्लोक—गिरौ निलीनावाज्ञाय नाधिगम्य पदं नृप ।
ददाह गिरिमेधोभिः समन्तादग्निमुत्सृजन् ।।११।।

श्लोकार्थ—हे नृप ! उनको पर्वत में छिपे हुवे जान कर वहाँ से आगे पद चिन्ह

नहीं गए हैं यों समझ कर काष्ठों से पर्वत के चारों तरफ आग लगाई जिससे वह पर्वत आग से जलने लगा ॥११॥

सुबोधिनी—पर्वतारोहणे कैश्चित् दृष्ट एव, तत्रापि अग्रे न गत इत्यत्र विचारमपि कृतवानित्याह नाधिगम्येति । ततः पर्वतादग्रे पदं गमनचिह्नं नाधिगम्य अप्राप्य । दाहे भगवता हेतुः सम्पादितः स सत्य एव जात इति वक्तुं तस्य निलीनाविति ज्ञानमुत्पादितम् । ततो दाहार्थमेव तथा प्रयत्नः कृत इति सत्यसङ्कल्पस्य भगवत इच्छया गिरिमेधोभिर्ददाह । सर्वत्र वृक्षान् छित्वा परितस्तृणादिना दाहं कारितवान् ॥११॥

व्याख्यार्थ—पर्वत पर चढ़ते हुए किन्होंने देखा ही किन्तु वहाँ से आगे नहीं गए इस विषय में विचार भी किए उससे ढूंडने से पता लगा कि पर्वत से आगे इनके चरण चिन्ह भी नहीं है, इस पर्वत को अग्नि जलावे जिसका हेतु तो भगवान् ने ही बताया है वह हेतु सत्य हुआ, यों तो यहाँ ही छिप गए है यों कहने के लिए इसको वैसा ज्ञान कराया इस प्रकार ज्ञान होने के बाद दाह के लिए ही प्रयत्न किया सत्य संकल्प भगवान् की इच्छा से काष्ठों से पर्वत को जलाया वृक्षों को तोड़ कर सब जगह चारों तरफ तृण आदि से आग लगा दी ॥११॥

आभास—ततो भगवान् पर्वतप्रार्थितं विधाय ततोऽग्रे गत इत्याह तत उत्पत्येति ।

आभासार्थ—अनन्तर पर्वत की प्रार्थना को पूर्ण कर भगवान् आगे गए जिसका वर्णन "तत" श्लोक में करते हैं--

श्लोक—तत उत्पत्य तरसा दह्यमानतटादुभौ ।
दशैकयोजनोत्तुङ्गान्निपेततुरधो भुवि ॥१२॥

श्लोकार्थ—आग लगाई किन्तु उस आग से पर्वत के किनारे सीलगना सुरू होते ही दोनों शीघ्र ही ११ योजन की बड़ी छलांग से कूदकर पर्वत से दूर पृथ्वी पर ठहरे ॥१२॥

सुबोधिनी- तरसा शीघ्रमेव यावदग्निः प्रज्वलति, भगवति विद्यमाने अग्निः पर्वतं न दहेदिति । न तु दाहभयात् । दह्यमानाः तटाःयस्य । सर्वत्र दाहे उद्भूते उभौ पूर्णशक्तिर्भगवान् दशै-

कयोजनोत्तुङ्गादिति । एकादशयोजन स उत्तुङ्गः, तत उभावपि अधः पर्वतस्य प्रस्तरभागमपि परित्यज्य भूभागे निपेततुः । केचित्तु अतिदाहे पुनः पर्वतप्रार्थनायां तं भूमौ नेतुं उपर्युत्थाय पादपीडनेन तं भूमौ प्रवेशयन्नेव स्वयं दूरे गत इत्याहुः ॥१२॥

व्याख्यार्थ—अग्नि जले इससे पहिले ही शीघ्र दोनों ने ११ योजन की बड़ी छलांग मारी जिससे वे पर्वत के पत्थर के भाग से दूर पृथ्वी पर खड़े हो गए इतनी जल्दी भगवान् ने इस लिए की कि भगवान् की विद्यमानता में अग्नि पर्वत को जला न सकती अर्थात् तापयुक्त न कर सकती उन्होंने जल जाने के भय से जल्दी नहीं की थी, अभी तो उसके किनारे किनारे अग्नि सिलगने लगी थी जब वह सर्वत्र प्रकट होने लगी तब पर्वत का मनोरथ पूर्ण देख आप इस प्रकार पधार गए ।

आचार्य आज्ञा करते हैं कोई इस प्रकार भी कहते हैं कि जब अग्नि जोर से जलने लगी तब पर्वत ने पुनः प्रार्थना की जिससे ऊपर उठकर पैरों के दबाब से उसको पृथ्वी में प्रवेश कराते हुवे आप दूर हो गए ॥१२॥

श्लोक—अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ ।

स्वपुरं पुनरायातौ समुद्रपरिखां नृप ॥१३॥

श्लोकार्थ—हे नृप ! यादवों में श्रेष्ठ वे दोनों शत्रुओं से न देखे गए अपंग अनुचरों सहित समुद्र की खाई वाली अपनी पुरी में फिर आए ॥१३॥

सुबोधिनी—ततः पुनरपि तस्य प्रवृत्तिः स्यादिति पूर्वमपि स्वेच्छयैव स प्रवृत्त इति ज्ञापयन् तेनालक्ष्यमाणावेव द्वारकां गतौ । तत्र न भगवता कश्चनाधिकः प्रयत्नः कृतः । स मा पश्यत्विति । किन्तु स्वदोषेणैव स न दृष्टवानिति ख्यापयितुमाह रिपुणेति । दुष्टबुद्ध्यैव न दृष्टवान्, तत्सम्बन्धादन्यैरपि न दृष्टमिति सानुगेनेत्युक्तम् । ननु कार्यस्य सर्वस्यापि कृतत्वात् श्वेतद्वीपादावेव कुतो न गतौ, द्वारकागमने को हेतुरिति चेत्, तत्राह यदूत्तमाविति । अन्यथा यदुकुले अवतारं न कुर्यात् । अतो यादवहितार्थं स्वपुरं यातौ । पुनरायाताविल्यनेन पूर्वमुभावपि स्वयं गत्वा तान् स्थापितवन्ताविति विज्ञायते । तस्य भिन्नद्वीपत्वं कलिप्रवेशाभावाय निरूपयन्नाह समुद्रपरिखामिति । समुद्र एव परिखा यस्येति । विस्तारोऽप्यनेन सूचितः । नृपेत्यप्रतारणाय संबोधनम् ॥१३॥

व्याख्यार्थ—पहिले भी उसने अपनी इच्छा से ही प्रवृत्ति की थी, फिर भी वह प्रवृति करें यों जानते हुवे उसके लक्ष्य में न आवे इस प्रकार ही आप द्वारका गए, जाने में भगवान् ने कोई अधिक

परिश्रम नहीं किया, वह न देखे केवल इतना ही लेकिन उसने तो अपने दोष से ही न देखा इसको प्रकट करने के लिए कहते है कि "रिपुणा" शत्रु से अर्थात् शत्रु था इसलिए उसकी दुष्ट बुद्धि हो गई थी जिससे ही उसने न देखा इसका आशय यह है कि जो दुष्ट बुद्धि होता है वह ही भगवान् का शत्रु होता है अथवा भगवान् के शत्रु आसुरी संपत वाले होते हैं उनकी बुद्धि इसलिए दुष्ट ही होती है उस स्वयं ने तो न देखा किन्तु उसके अनुचरों ने भी न देखा क्योंकि इस दुष्ट बुद्धि के संग से उनकी बुद्धि भी वैसी हो गई थी जब भगवान् ने सब कार्य पूरे कर लिए तब श्वेतद्वीप आदि में क्यों न पधार के गए ? द्वारका में जाने का क्या कारण था यदि यों कहते हैं तो उसका उत्तर देते हैं कि "यदूत्तमो" यादवों में उत्तम है इसलिए उनकी रक्षा के वास्ते अपनी द्वारकापुरी में गए यों नहीं करते तो यदुकुल में अवतार क्यों लिया ? अर्थात् यादवों में अवतार लेकर उनका हित ही करना था इसलिए द्वारका पधारे फिर आए यों कहने का भाव यह है कि इनको द्वारका में पहिले स्थापित भी आपने ही किया था यह सिद्ध कर दिखाया है। आप द्वारका को भारत से जुदा द्वीप कहते हैं क्योंकि उसके चारों तरफ समुद्र रूप खाईयाँ हैं अतः भिन्न द्वीप है जिससे वहाँ कलि का प्रवेश नहीं हो सकता है इससे उसका विस्तार भी दिखाया है "नृप" सम्बोधन भुलावे में आपको नहीं डालता हूँ इसलिए दिया है ।।१३।।

आभास— तस्य च दुर्बुद्धिमाह सोऽपीति ।

आभासार्थ—"सोऽपि" श्लोक में उसकी दुर्बुद्धि का वर्णन करते हैं--

श्लोक— सोऽपि दग्धाविति मृषा मन्वानो बलकेशवौ ।
बलमाकृष्य सुमहन्मगधान्मागधो ययौ ।।१४।।

श्लोकार्थ— वह मागध भी उनको जला हुआ मान अपनी बड़ी सेना को खींचकर मगध देश ले आया ।।१४।।

सुबोधिनी—शब्ददोषपरिहाराय दग्धिशब्दः सप्तम्यन्तो ग्राह्यः । जरासन्धोऽपि दग्धिमध्ये प्रविष्टः। यथा भगवान् द्वारकायां प्रविष्टः, तथा सोऽपि दग्धि प्रविष्टः, परमसन्तापेन सन्तप्त इत्यर्थः। एतदपि ज्ञानकृतमेव तस्य, न क्रियया दाहो जात इति। अन्यथाग्रे पाण्डवानां यशो न स्यात्। इति मृषा मन्वानः बलकेशवावालक्ष्य। बलत्वात् ब्रह्मेशयोरप्यधिपतित्वाच्च तादृशौ न तथाभूताविति मृषा मन्वानो वा। अथवा। स तु दग्ध एव । अतः परं पाण्डवकीर्त्यर्थं मृषाभूतः सकलितः, सीतावत्। ततो मृषा जरासन्धः बलत्वं केशवत्वं च मन्वानः सर्वांशेनापि नाशो भविष्यतीति विज्ञाय स्वस्य बलं सेनामाकृष्य मगधानेव ययौ। ननु स्वयं किल दग्धः, किं बलवाहेनेत्यत

आह सुमहदिति । सत्त्वेन महत्त्वेन च । तद्भगवदधिष्ठानमिति तत्स्थापनार्थं, ततो भगवतः अपगमनार्थं च, मगधानेव देशान् ययौ, यतः सोऽपि मागधः, देशदोषमात्रेणावशिष्टः । मत्वा तौ बलकेशवाविति पाठे स एवार्थः ।।१४।।

व्याख्यार्थ—शब्द मे उत्पन्न हुए दोष को मिटाने के लिए यहाँ "दग्धि"[१] शब्द को सप्तमी विभक्ति भी माननी चाहिए यों मान कर इसका अर्थ करना कि वह जरासन्ध भी परम सन्ताप में वैसे प्रविष्ट हुआ जैसे भगवान् द्वारका में प्रविष्ट हुए यह उसका परिताप में प्रवेश ज्ञान से हुआ है, न कि क्रिया से दाह हुआ है. नहीं तो आगे पाण्डवों का यश नहीं बढ़ता बलरामजी और कृष्णचन्द्र को न देख कर जल गये, ऐसा जो उसने समझा वह उसका समझना झूठा था क्योंकि शक्तिमान होने से जो ब्रह्मा और शिव के अधिपति हैं वैसे आग मे जल नहीं सकते हैं इसलिए इसने यह जलना झूठ ही समझा अथवा वह[२] स्वयं तो जला ही है इसके अनन्तर वह झूठा चिल्लाना सीता को तरह पाण्डवों के कीर्ति के वास्ते है इसके बाद जरासन्ध ने इनका 'बलपना' और 'केशवपना' झूठा समझा यों मान लिया कि इनका सर्व तरह नाश हो गया है, अतः अपनी सेना को लेकर मगध को गया जरासन्ध स्वयं तो सन्ताप से जला किन्तु सेना को जलाने से क्या ? इस शंका का निवारण करते हैं कि वह सेना बलशाली तथा महत्व वाली थो इसलिए उसको भी सन्ताप हुआ जिससे वह भी स्वयं सन्ताप से जलने लगी जरासन्ध मगध देश को क्यों गया ? मथुरा क्यों न आया और आकर लड़ाई से उस पुरी को नाश क्यों नहीं किया ? इस शंका का निवारण करते हैं कि भगवदिच्छा से उसकी बुद्धी ऐसी हो गई कि यह मथुरा भगवान् का रहने का स्थान है, वह कायम ही रहे और यहाँ भगवान् पधारे नहीं इसलिए मगध देश को चला गया क्योंकि वह भी मागध है उसमें देश का ही मात्र दोष रहा है ।

"मत्वा तौ बलकेशवौ" यदि श्लोक में पाठ लिया जावे तो भी यही अर्थ होगा ।।१४।।

आभास—एवं तामसस्य रुवादेः वाक्यपरिपालनं निग्रहं वा विधाय स्त्रीणामुद्धारार्थे कृपया विवाहादिकं कृतवानिति वक्तुं ज्येष्ठस्य बलभद्रस्य विवाहमाह आनर्ताधिपतिरिति ।

१—"दग्धौ" दग्धि शब्द सप्तमी और क्रिया पद दोनों हो सकते हैं ।
२—जरासन्ध संताप से जलगया ।

आभासार्थ—इस प्रकार तामस रुद्र आदि के वाक्य का पालन अथवा निग्रह कर स्त्रियों का उद्धार करने के लिए कृपा कर विवाह आदि किए, यह कहने के लिए पहिले बड़े भ्राता बलदेवजी का विवाह "आनर्त" श्लोक में कहते है ।

श्लोक—**आनर्ताधिपतिः श्रीमान्रैवतो रेवतीं सुताम् ।**
ब्रह्मणा चोदितः प्रादाद्बलायेति पुरोदितम् ॥१५॥

श्लोकार्थ—आनर्त देश के स्वामी, श्रीमान् रेवत ने अपनी रेवती नाम वाली कन्या को बलरामजी को दी क्योंकि ब्रह्मा ने पहिले ही इसको आज्ञा की थी ॥१५॥

सुबोधिनी—आनर्तदेशः द्वारिकानिकटदेशः । तस्याधिपतिः रैवतः । श्रीमानिति । अमृत एव । रेवतीनाम तस्य कन्या, स हि पूर्वं ब्रह्माणं प्रष्टुं गतः । ततो ब्रह्मवाक्यात् कनिष्ठायापि रामाय दत्तवान् इति पुरा नवमस्कन्धे निरूपितम् । अस्य विचारस्तत्रैव कृतः ॥१५॥

व्याख्यार्थ—द्वारका के समीप वाले देश को आनर्त देश कहा जाता है उसका स्वामी रेवत था "श्रीमान्" से बताया कि वह अमृत ही था उसकी कन्या रेवती नाम वाली थी वह पहिले ब्रह्मा से पूछने गया कि मैं अपनी कन्या किस को दूँ ? तब ब्रह्मा ने कहा कि यह बलरामजी को दो इस लिए छोटा होते भी राम को दी यह आगे नवम स्कन्ध में निरूपण हुआ है इसका विचार वहाँ ही किया है ॥ १५ ॥

आभास—भगवतो विवाहमाह भगवानपीति ।

आभासार्थ—"भगवानपि" इस श्लोक में भगवान् का विवाह कहते हैं ।

श्लोक—**भगवानपि गोविन्द उपयेमे कुरूद्वह ।**
वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे ॥१६॥

श्लोकार्थ—हे कुरुद्वह गोविन्द भगवान् ने भी स्वयंवर में लक्ष्मी की अंश रूप विदर्भ देश में उत्पन्न भीष्म की कन्या से विवाह किया ॥१६॥

सुबोधिनी—ननु स्वतःसिद्धलक्ष्मोकस्य निरिन्द्रियस्य प्रयोजनाभावात्कि विवाहेनेत्याशङ्क्य परिहरति । यद्यपि भगवान्, तथापि गोविन्द इति इन्द्रादिभिरिन्द्रत्वेनाभिषक्ति इति तेषां वाक्यसिद्धचर्थ मुपयेमे, विवाहं कृतवान्, न तु गोपिकावत्परिग्रहमात्रम् । कुरूद्वहेति संवोधन भगवत्स्वरूपज्ञानाय । ननु तथापि कर्मणा उत्पादिता कर्मफलरूपा ताहशकर्मकर्त्रैव विवाह्येति कथं भगवता विवाहः कृत इति चेत्, तत्राह वैदर्भीमिति । विदर्भदेशे सोत्पन्ना। अतो न कर्मजनिता । किञ्च । भीष्मकस्य सुता, भीष्मं भयानकं कं सुखं यस्येति । प्रलयकर्ता महादेव एवावतोर्णः, तस्य च सुता सीता पूर्वजन्मन्य प महादेवकन्यैव, सैवेदानीं भीष्मकाज्जाता । अतो विवाहः कर्तव्य एव । किञ्च श्रियो मात्रामिति । सा हि लक्ष्म्याः मात्रा भवति अंशः, नहि तामन्यो ग्रहीतुं शक्तः । सा ह्यवतरति यथा, यथा भगवानवतरति । 'राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनी'त्यादिवाक्यात् । तत्रापि स्वयंवरे यदा सर्व एव राजान आहूताः, तदा भगवानप्याहूतः । यदा तया भगवान् वृतः, ततस्तदिच्छया विवाहं कृतवान् ।। १६ ।।

व्याख्यार्थ—जिसके यहाँ लक्ष्मी स्वतः ही सिद्ध है और जो स्वयं इन्द्रियों से रहित है उसको विवाह करने का कोई प्रयोजन नहीं फिर उन्होंने विवाह क्यों किया ? हालांकि भगवान् है तो भी गोविन्द है, क्योंकि इन्द्र आदि ने आपका इन्द्रपन से अभिषेक किया है उनका वाक्य सत्य होवे इसलिए विवाह किया है नहीं कि गोपिकाओं की तरह केवल परिग्रह "अंगीकार" ही किया है, राजा को "कुरुद्वह" सम्बोधन से यह जताया कि आपको भगवान् के स्वरूप का ज्ञान है यह कर्म से उत्पन्न हुई है कर्मों का फल रूप यह है इसलिए इसका विवाह भी वैसे कर्म करने वाले के साथ ही होना चाहिए भगवान् से इसका विवाह कैसे ? यदि यों कहते हो तो इसका उत्तर यह है कि वह विदर्भ देश में उत्पन्न हुई है अतः इसका जन्म कर्म से नहीं हुआ है और भीष्मक की कन्य है और भीष्मक रूप में प्रलय कर्ता महादेव ने ही अवतार लिया है उसकी यह कन्या है सीता पूर्व जन्म में महादेव की कन्या थी वह ही अब भीष्मक की कन्या हुई अतः विवाह करना चाहिए और विशेष यह भी है कि यह लक्ष्मी का अंश भी है इसलिए इसको दूसरा कोई ले नहीं सकता है जैसे भगवान् अवतार लेते हैं वैसे ही यह भी अवतार लेती है "राघवत्वे भवत्सीता रुक्मिणी कृष्ण जन्मनि" जब भगवान् राम रूप से प्रकट होते हैं तब यह सीता रूप से प्रकट होती है और जब भगवान् कृष्ण रूप से प्रादुर्भूत होते हैं तब यह रुक्मिणी होती है उसमें भी स्वयंबर के समय में जब सब राजा जैसे बुलाए गए वैसे भगवान् भी बुलाए गए वहाँ भगवान् को रुक्मिणी ने स्वयं वरा अनन्तर उसकी इच्छा से विवाह किया ।।१६ ।

श्लोक—प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ।
पश्यतां सर्वलोकानां ताक्ष्यपुत्रः सुधामिव ।।१७।।

श्लोकार्थ--शिशुपाल और उसके पक्षपाती शाल्व आदि राजाओं का बध कर जैसे गरुड़ ने सुधा ली वैसे आप सर्व लोकों के देखते हुए रुक्मिणी को ले आए ।।१७।।

सुबोधिनी—किञ्च, प्रमथ्य तरसा राज्ञ इति । सर्वानेव शिशुपालादीन् प्रमथ्य मारयित्वा जयप्राप्तामिव तां नीतवान् । शाल्वादयोऽतिविरोधिनो बलिष्ठाश्च । तैः सह युद्धे विशेषहेतुमाह चैद्यपक्षगानिति । 'स्वयंवरेऽपि शिशुपालाय यथा भविष्यति, तथा कर्तव्य'मिति रुक्मिवाक्यात् विवाहकर्तैव शिशुपालः समागतः । अतस्तद्धितार्थमपि शाल्वादयः प्रवृत्ताः । मुख्यो भगवद्विरोधो शिशुपालः । अन्येऽपि विरोधिनः यथाकथञ्चिद्भगवद्विरोधं सम्पादयितुं तत्पक्षपातिनो जाता इति । किञ्च । प्रद्युम्नादयोऽप्युत्पाद्याः । अतः कामः सङ्कटे वर्तत इति तदुत्पत्त्यर्थमप्युपयेम इत्याह पश्यतां सर्वलोकानामिति । यथा मातुरापन्निवृत्त्यर्थं गरुडः अयुक्तेभ्योऽप्यमृतं दातुं प्रवृत्तः, तथा भगवानपि कामस्य दुःखनिवारणार्थं वैदर्भीं अयुक्तामपि स्वयं गृहीतवान्, मारितवांश्चान्यान् । यद्ययुक्तमेतद्भवेत्, तदा लोकाः साक्षिण इति तान् प्रमाणीकरोति । एवं सर्वप्रकारेण भगवतो विवाहो निरूपितः ।।१७।।

व्याख्यार्थ—और विशेष "प्रमथ्य तरसा राज्ञः" श्लोक में कहते हैं-कि शिशुपाल से लेकर सब को मार कर जीत कर प्राप्त की हुई वस्तु की भाँति उसको ले गए, शाल्व आदि राजा बहुत विरोधी तथा बलिष्ट भी थे उनके साथ लड़ाई करने में विशेष कारण है वह कहते हैं-"चैद्यपक्षगान्" वे शाल्व आदि शिशुपाल के पक्षपाती थे स्वयम्बर के समय में भी शिशुपाल के लिए जैसा योग्य होगा वैसे करना योग्य है अर्थात् करना चाहिए रुक्मी के कहने से शिशुपाल वर की भाँति आया अतः उसके हित करने के लिए भी शाल्व आदि प्रवृत हुए हैं ।

भगवान् का मुख्य शत्रु शिशुपाल है दूसरे विरोधी भी भगवान् से कुछ विरोध करने के लिए उसके पक्षपाती बने हैं और विशेष यह है कि भगवान् को प्रद्युम्न आदि को उत्पन्न करना है इस कारण से तथा काम संकट में है उसके संकट को नष्ट करने के लिए उसकी उत्पत्ति करनी थी इस लिए भी आपने विवाह किया वह विवाह सर्व लोगों के देखते हुए किया, जैसे माता की आपदा मिटाने के लिए गरुड़ ने अयोग्यों को भी अमृत पिलाया वैसे भगवान् ने काम की पीड़ा को काटने के वास्ते अयोग्य भी वेदर्भी को आपने स्वीकार किया और दूसरों को मारा, जो यह अयोग्य हो तो ये सर्व लोक साक्षी हैं उनको साक्षी बना कर विवाह किया है यों कहने का आशय यह है कि विवाह अयोग्य नहीं यदि अयोग्य होता तो जनता उसकी निन्दा करती अथवा रुकावट डालती यों नहीं किया जिससे सिद्ध है कि विवाह अयुक्त नहीं है यों सर्व प्रकार भगवान् के विवाह का निरूपण किया है ।। १७ ।।

आभास—तत्र राजा विवाहे पौरुषं श्रोतुं विशेषं पृच्छति भगवान् भीष्मकसुतामिति ।

आभासार्थ—इस प्रसंग में राजा, भगवान् ने जो विशेष पौरुष दिखाया उसको सुनने के लिए "भगवान् भीष्मकसुतां" श्लोक में पूछता है।

राजोवाच

श्लोक—**भगवान्भीष्मकसुतां रुक्मिणीं रुचिराननाम् ।**
राक्षसेन विधानेन उपयेम इति श्रुतम् ॥१८॥

श्लोकार्थ—भगवान् ने सुन्दर मुख वाली भीष्मक की कन्या रुक्मिणी से राक्षस नियमानुसार विवाह किया ऐसा सुना है ॥१८॥

सुबोधिनी—भगवतो विवाहः बहुधा पुराणेषु श्रुतः । ततो राजा स्वयंवरविवाहात्प्रकारान्तरेण श्रुतवान्, तत्र च पौरुषमधिकमिति, तद्भवति वा नवेति सन्देहनिवृत्त्यर्थं पृच्छति । भगवत्त्वान्नाज्ञानम् । भीष्मकसुतामिति पितुरपि बलिष्ठता । रुक्मिणीमिति भगवतो मुख्यभार्येति प्रसिद्धा । ततश्च 'गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृता'विति प्रथमो विवाहो धर्म्यः कर्तव्यः । अतो धर्मित्वार्थं राक्षस एव विवाहः भगवता कृत इति स एव त्वया वक्तव्य इत्याह राक्षसेन विधानेनेति । रुचिराननामिति तस्या मुग्धभावो निरूपितः । ततश्च राक्षसे विवाहे सा कथमनुगुणा अभीतागतेत्यपि सन्देहः । 'प्रसह्य कन्याहरणं राक्षसो विधिरुच्यत'इति विधिशब्दः परस्वहरणलक्षणदोषव्यावृत्त्यर्थः । यथा विवाहः दाने अदुष्टः, एवं हरणेऽपि क्षत्रियस्येतिज्ञापनार्थः । श्रुतमिति प्रमाणमुपन्यस्तम् ॥१८॥

व्याख्यार्थ–पुराणों में सुना है कि भगवान् ने अनेक प्रकार से विवाह किए हैं इस कारण से राजा ने जसे स्वयंवर में विवाह हुवा उससे दूसरे नमूने के विवाह सुने हैं उसमें पराक्रम अधिक सुना, वह हुवा है वा नहीं हुवा है इस सन्देह को मिटाने के लिए राजा पूछता है षड्गुण सम्पन्न होने से भगवान् में अज्ञान भी नहीं है भीष्मक की कन्या है इसलिए पिता भी बलिष्ट है रुक्मिणी भगवान् की भार्याओं में से मुख्य भार्या है पहिला विवाह है तो धर्मानुसार करना चाहिए इस कारण से भगवान् ने पहिला विवाह अपना धर्म्मीपणा सिद्ध करने के लिए धर्मानुसार ही किया है यह हो आप मुझे बताना कि वह धर्म्य विवाह जो "राक्षस विधि" के अनुसार किया वह किस प्रकार किया क्षत्री के लिए गान्धर्व और राक्षस विवाह धर्म्मानुकूल है जेसा कि कहा है "गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ"

रुक्मिणी का विशेषण "रुचिराननाम्" देकर उसका मुग्द भाव प्रकट किया है राक्षस विवाह में वह निर्भय होकर कैसे आ गई ! यह भी सन्देह है "प्रसह्य कन्या हरणं राक्षसो विधिरुच्यते" जबरदस्ती से कन्या को हरण कर ले आना राक्षसों की विधि है दूसरे का धन वा स्त्री हरण कर लाना तो दोष है फिर भगवान् ने यह दोष कैसे किया ? इसके उत्तर में कहते हैं कि दोष नहीं है क्योंकि क्षत्रियों के लिए इस प्रकार कन्या हरण कर ले आना दोष नहीं है क्योंकि क्षत्रियों के लिए वह विधि है विधि होने से दोष नहीं है जैसे पराई कन्या से जो विवाह किया जाता है वह इसलिए दोष रहित है जो माता पिता विधिनुसार अपनी कन्या वर को दान कर देता है इस प्रकार हरण में भी क्षत्रि को दोष नहीं है "श्रुतम्" सुना है यह पुराण प्रमाण में दिया है ॥१८॥

आभास—अतस्तत्र प्रकारं पृच्छति भगवन् श्रोतुमिच्छामीति ।

आभासार्थ—अब राजा उस प्रकार "भगवन् श्रोतुमिच्छामि" श्लोक में पूछता है-

श्लोक— **भगवन् श्रोतुमिच्छामि कृष्णस्यामिततेजसः ।**
यथा मागधशाल्वादीञ्जित्वा कन्यामुपाहरत् ॥१६॥

श्लोकार्थ—हे भगवान् जिनके तेज का अन्दाजा कोई नही लगा सकता वैसे श्रीकृष्ण के उस चरित्र को सुनना चाहता हूँ जिसमें मगध शाल्व आदि को जीत कर जैसे कन्या को वे ले आए ॥१६॥

सुबोधिनी—अनेनाग्रे वक्ष्यमाणा कथा अध्यायत्रयात्मिका न समाधिभाषेति सूचितम् । अन्यत्र श्रुतमेव कल्पान्तरीयमपि योगानुभावेन वक्तव्यमिति प्रश्नात्, अन्यथा स्वतन्त्रवक्तुः किं पूर्वश्रुतप्रकारकथनेनेति । अतः श्रोतुरनुरोधात्कल्पान्तरीयमपि गान्धर्वराक्षसगौधभेदेन त्रिधा त्रिभिरध्यायैर्वक्ष्यति । तेनात्र प्राप्तं दूषणत्रयं परिहृतं भविष्यति । भगवान् कपटेन गत्वा अदत्तां हृतवानिति, तस्या भ्रातुर्मुण्डनं कृतवानिति, बलभद्रेण बोधित इति रुक्मिण्याश्च लज्जाभावेनापरिचितभगवत्प्रार्थनेति । एवं सति रसात्मको विवाहो न भवेत् । भक्तिरसो हि शृङ्गारादीनामुपमर्दकः । अतः समाधिभाषाविवाहः स्वयंवर एव । अन्यस्तु मतान्तरीय इति निश्चयः । ननु अप्रस्तुतं किमिति वक्ष्यतीति चेत्, तत्राह श्रोतुमिच्छामीति । इच्छा पूरणीयेति तदर्थं वक्ष्यति । किञ्च, इयमपि कथा कृष्णस्य । अमितं तेजो यस्येति । पराक्रमाधिक्याच्च तद्वक्तव्यम् । क्षत्रियाणां हि क्षात्रप्रकारेण निरूपितं भगवच्चरित्रं मनोहारि भवति । तदाह यथा

मागधशाल्वादीनिति । मागधोऽपि जयं प्राप्त इति स निरूप्यते । शाल्वः सात्त्विको महांश्च । एवं जयेन स्वभावेन च महान्तौ आदिभूतौ येषामिति जयशीलवीरजयो भगवत्कृतः श्रोतव्य इति निरूपितम् । तत्राप्येक एव स्वयं तान् जित्वा स्वयं कुशलेन पुरं द्वारकामभ्यगादिति । तदप्येकस्मिन्कल्पे, तत्सर्वथा विरुद्धं मन्वानः शुको नोक्तवान्, तदा तु भगवानपि समाहूतो गतः । वरणात्पूर्वमेव बलात्तां हृत्वा सर्वान् विनिर्जित्य एकाकी स्वयं गृहं गत इति कथा भवति । तत्र यद्यपि पौरुषं महत्, तथाप्यत्यन्तं क्लिष्टकर्मत्वं भवतीति तन्नोक्तवान् । तामसकल्पे हि तथा कथा । अत एव शिशुपालो वक्ष्यति 'समुद्रं दुर्गमाश्रित्य बाधन्त'इति । अक्लिष्टकर्मत्वं च वक्तव्यम् । अतो यावता तदुपयुज्यते, तावद्वक्तव्यमिति राक्षसो विवाह उक्तः, नत्वेकाकिहरणम् । अनेनैवं ख्यापितम् । पृष्टमयुक्तं चेत्, न वक्तव्यमिति ।।१६।।

व्याख्यार्थ—यों कहकर यह बता दिया कि आगे तीन अध्यायों में जो कथा आने वाली है वह समाधि भाषा नहीं है क्योंकि प्रश्न ही इस प्रकार किया है हुई दूसरी जगह सुनी हुई दूसरे कल्प की भी योग के अभाव से कहिए यदि यों न होता तो स्वतन्त्र कहने वाले को यह कह देने की आवश्यकता ही नहीं थी कि पूर्व सुने हुवे प्रकार से कहिए अतः सुनने वाले के आग्रह से दूसरे कल्प को भी गान्धर्व राक्षस और वैदिक विधि के भेद से तीन प्रकार तीन अध्यायों से कहेंगे उससे यहाँ दिए हुए तीन दूषणों का भी परिहार हो जाएगा १–भगवान् कपट से जा कर जो पिता आदि ने दी न थी उसका हरण कर लाए २–बलभद्र के समझाने से उसके भाई का मुण्डन किया ३–और रुक्मिणी ने लज्जा त्याग कर बिना पहचान वाले भगवान् को पत्र द्वारा प्रार्थना की इस प्रकार होने से विवाह रस रूप नहीं होता है भक्ति रस श्रृंगार रस आदि रसों का उपमर्दन करने वाला है अतः समाधि भाषा विवाह स्वयं-वर ही है दूसरे प्रकार का विवाह अन्य मत के हैं यह निश्चय है जिसका प्रसंग ही नहीं है वह क्यों कहा जाएगा ? यदि ऐसा कहो तो उत्तर में कहते हैं कि सुनने वाले की वैसी इच्छा है सुनने वाले की इच्छा पूर्ण करनी चाहिए इसीलिए कहेंगे विशेष में यह कथा भी श्रीकृष्ण की ही है अधिक पराक्रम के कार्य होने से वह कहना चाहिए क्षत्रिय प्रकारानुसार वर्णन करने से भगवान् के क्षत्रिय चरित्र मन को हरण करने वाले होते हैं शिशुपाल ने बहुत युद्धों में जय पाई हैं शाल्व और सात्विक भी महान् हैं इस प्रकार जो जय से और स्वभाव से आदि में ही वैसे वीर हैं उनको जीतना यह भगवान् का किया हुआ चरित्र श्रवण योग्य है इसलिए निरूपण किया है इसमें भी आप अकेले वे बहुत उनको जीतकर आप कुशल पूर्वक अपने पुर द्वारका में आ गए वह भी एक ही कल्प में वह सव था विरुद्ध जानकर शुकदेवजी ने नहीं कहा तभी तो भगवान् भी बुलाए हुवे गए थे वरण से पहिले ही बल पूर्वक उसका हरण कर सब को जीतकर अकेले आप ही घर गए यों कथा बनती है यद्यपि इसमें भगवान् का महान् पौरुष दिखता है किन्तु तो भी अत्यन्त क्लिष्ट कर्म होने के कारण शुकदेवजी ने सही कहा है यह ऐसी कथा तामस कल्प में हुई है इस कारण से ही जितना वह योग्य बन सकता है जितना ही कहना चाहिए इसलिए राक्षस विवाह कहा नहीं कि अकेले हर ले जाना इससे इस प्रकार प्रसिद्ध किया जो मैंने पूछा वह योग्य न हो तो मत कहिए ।।१६।।

आभास—ननु कथा भगवतो महती वक्तव्या, ततश्च अत्यावश्यककथैव श्रोतव्येति चेत् तत्राह ब्रह्मन् कृष्णकथा इति ।

आभासार्थ—भगवान् की कथा तो वह कहनी चाहिए जो उत्तम होवे और जो अति आवश्यक सुनने जैसी हो वह ही सुननी चाहिए यदि यों कहो तो उसका उत्तर "ब्रह्मन् कृष्ण कथाः" श्लोक में देते हैं ।

श्लोक—ब्रह्मन्कृष्णकथाः पुण्या माध्वीर्लोकमलापहाः ।
को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥२०॥

श्लोकार्थ—हे ब्रह्मन् भगवान् कृष्ण की कथाएँ पवित्र मधुर और जगत के मल को दूर करने वाली है तथा नित्य नवीन हैं इसलिए जो सुनकर उसके तत्व को जान लेता हे वह सुनते हुवे तृप्त नहीं होता है अर्थात् कथा के सार रूप रस को जानने वाला कौन ऐसा है जो तृप्त होवे ? कोई नहीं ॥२०॥

सुबोधिनी—ब्रह्मन्निति ज्ञानमुक्तम् । कृष्णकथात्वात् कीर्तने श्रवणेऽपि वैराग्याभाव उक्तः । किञ्च । प्राणिनो हि धर्मार्थकाममोक्षेप्सवः । तत्र कृष्णकथाश्चतुर्णां प्रतिरूपा इत्याह । पुण्या इति धर्मरूपाः । माध्वीरिति कामरूपाः । लोकानां मलं दारिद्रचवत् कश्मलरूपं हरन्तीति लोकमलापहाः । एवं त्रिवर्गरूपा इति तदभीप्सुः को नु तृप्येत । नु इति वितर्के । न कोऽप्यत्र विरक्त इति भावः । तर्हि कथं सर्वे न प्रवर्तन्त इति चेत्, तत्राह शृण्वान इति । सकृच्छ्रुत्वापि निवर्तन्त इति चेत् । श्रुतज्ञ इति । वर्तमानप्रयोगेण निरन्तरश्रवणे प्राप्तेऽपि श्रवणरसिकोऽत्र मुख्य इति श्रुतं जानाति । रसिकत्वे नेति श्रुतज्ञ उक्तः । रसज्ञ इति पाठे तु स्पष्ट एव । किञ्च । नित्यनूतनाः अयातयामाः कालग्रासरहिताः । तेन मोक्षरूपा अपीत्युक्तम् ॥२०॥

व्याख्यार्थ—हे ब्रह्मन् ! इस सम्बोधन से यह बताया कि आप ज्ञानवान हो इस तत्व को जानते हैं कि यह कथा "ज्ञान" रूप है श्रीकृष्ण की कथा होने से इसके कीर्तन में और श्रवण में किसी को भी वैराग्य नहीं होता है, अर्थात् सब प्रकार के देवी जीव सुनने की इच्छा करते हैं, क्योंकि प्राणी धर्म, अर्थ, काम और मोक्ष इन चार पुरुषार्थ की अभिलाषा वाले होते हैं और कृष्ण की कथाएँ चारों पुरुषार्थों को ही मूर्ति हैं, "पुण्याः" विशेषण से उसका धर्म रूप कहा है "माध्वो" विशेषण से काम रूप है जैसे अर्थ दरिद्रता मिटाता है, वैसे ये कथाएँ लोकों के कश्मल रूप दारिद्रच को मिटाती है अतः अर्थ रूप है इस प्रकार त्रिवर्गरूप हैं, इनकी इच्छा वाला कौन ऐसा है जो तृप्त

होगा अर्थात् कोई भी इससे विरक्त न होगा, यदि यों है तो सब क्यों नहीं इसमें प्रवृत होते हैं ? एक बार सुनकर निवृत हो जाते है यदि यों कहते हो तो इसका उत्तर यह है कि वे निवृत हो जाते हैं जो सुने हुवे चरित्र के रस को नहीं समझते और जो समझते हैं वे विरक्त नहीं होते हैं उनकी ही इसमें प्रवृत्ति बनी रहती है इसलिए कहा है "श्रुतज्ञ" वर्तमान प्रयोग देकर यह बताया है कि यदि निरन्तर श्रवण का अवसर प्राप्त होते हुवे भी वह श्रवण का रस जानने वाले ही मुख्य श्रोता होता है इन कथाओं को काल अपना ग्रास नहीं बना सकता इसलिए मोक्ष रूप भी है ।।२०।।

आभास—एवं राज्ञः श्रवणौत्सुक्यं दृष्ट्वा स्वयोगबलेनैव दृष्टमिति अन्यतः श्रुतत्वमनुक्त्वापि कथामेवारभते राजासीदिति ।

आभासार्थ—इस प्रकार राजा को श्रवण की उत्सुकता देख कर अपने योगबल से हो जो देखा वही कथा प्रारम्भ करते हैं दूसरे से सुनी हुई नहीं कहते है "राजसीत्" श्लोक से प्रारम्भ करते हैं ।

श्रीशुक उवाच—

श्लोक—**राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ।**
तस्य पञ्चाभवन्पुत्राः कन्यैका च वरानना ।।२१।।

श्लोकार्थ—श्री शुकदेवजी कहने लगे कि विदर्भ देश का महान् राजा भीष्मक नाम वाला था जिसके पाँच पुत्र और एक सुन्दर कन्या थी ।।२१।।

सुबोधिनी—आसीदित्येषा पुरावृत्तकथेति निरूपितम् । भीष्मक इति नाम प्रसिद्धेऽर्थे । तस्यान्यत्र स्थित्यभावाय तुल्यधर्माः सर्वे त एवेति निर्दिशति विदर्भाधिपतिरिति । महानिति महत्त्वेन सत्यादयो गुणाः एकचत्वारिंशदतिदिष्टाः । अयमर्थः पूर्वस्माद्विशिष्टः । 'अभ्रातृमती न विवाह्य'ेति तदर्थं भगवतः पञ्चपर्वाविद्यायाः पञ्च देवाः मायाकार्यरूपाः लक्ष्म्या अप्यग्रे उत्पन्ना इति तान् निरूपयति तस्य पञ्चाभवन्पुत्रा इति । 'मायया मे विनिर्मिता' इति । 'रमापि रूपं वत्रे द्वितीयमिव यत्प्रवदन्ति माया' मिति लक्ष्म्या मायारूपत्वात् मायाकार्यत्वाच्चाविद्यायाः तत्सहिता माया तत्र प्रादुर्भूता । अत एव सा जीवमेव व्याप्नोतीति मायामपि जीवपरां कर्तुं रुक्मी विचारितवान् । अत एव रुक्मिण्या रुक्मिप्रभृतिषु पक्षपातः, भगवत्कृते अपरितोषश्च । स्वरूपाज्ञाने निराकृते पश्चान्निरोधः फलिष्यतीति । भगवदीयेषु तस्य प्रतिष्ठाभावाय मुण्डितवान् । तस्य भीष्मकस्य पञ्च पुत्रा अभवन्, एका च कन्या । वराननेति । लोके सौन्दर्यं प्रशस्तमिति सौन्दर्यं मुग्धभावं च निरूपयन्नाह । दया च मुग्धभावे निरूपिता ।।२१।।

व्याख्यार्थ—"आसीत्" क्रिया पद से बताया कि यह पूर्व समय की कथा है "भीष्मक" नाम प्रसिद्धि के लिए दिया है वह दूसरे स्थान[1] पर नहीं रहते थे उसके साथ वाले सर्व तुल्य धर्मा हैं, इसलिए विदर्भ देश का स्वामी कहा है "महान्" विशेषण से यहाँ दिखाया है कि इसमें सत्य आदि ४१ गुण हैं यह अर्थ[2] पहिले से विलक्षण है, "अभ्रातृमती न विवाह्या" जिस को भाई न हो उससे विवाह नहीं करना चाहिए इस कारण से भगवान् के पञ्चपर्वात्मक अविद्या के माया कार्य रूप पांच देव लक्ष्मी से प्रथम उत्पन्न हुए यों उनका निरूपण करते हैं उसको पांच पुत्र हुए "मायया मे विनिर्मिताः" इस वाक्य के अनुसार रमा ने भी मानो दूसरा रूप धारण किया जिसको "माया" कहते हैं इस प्रकार लक्ष्मी माया रूप है और माया का कार्य अविद्या है, उस समेत माया वहाँ प्रकट हुई है, इस कारण से ही वह जीव को पकड़ती है, इसलिए रुक्मि ने माया रूप का जीव से सम्बन्ध कराने का विचार किया अतः रुक्मिणी का रुक्मी आदि में पक्षपात था और भगवान् के लिए सन्तोष नहीं था जब रुक्मिणी का अपने स्वरूप का अज्ञान मिटा कर ज्ञान होगा तब निरोध फलेगा भगवदीयों में रुक्मी की प्रतिष्ठा का अभाव हो इसलिए उसका मुण्डन किया उस भीष्मक को पांच पुत्र हुए और एक कन्या हुई वह ऐसी सुन्दर थी जो लोक में उसके सुन्दरता की प्रशंसा करते थे तथा "दया"[3] पद से उसके मुग्ध भाव का भी निरूपण किया है ।।२१।।

आभास—तान् नामतो निर्दिशति रुक्म्यग्रज इति ।

आभासार्थ—उन पांचों पुत्रों के नाम "रुक्म्यग्रजो" श्लोक से कहते हैं ।

श्लोक—रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनन्तरः ।
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ।।२२।।

श्लोकार्थ—सबसे बड़े भाई का नाम रुक्मी फिर रुक्मरथ, रुक्मबाहु, रुक्मकेश और पांचवा रुक्ममाली था इनकी बहिन सती रुक्मिणी थी ।।२२।।

१—भीष्मक महादेव का अवतार है जिससे उसका कर्म से सम्बन्ध नहीं है तथा उसके साथी भी कर्म सम्बन्ध रहित हैं इसलिए वह अन्यत्र नहीं रहता है ।

२—पहले का विवाह समाधि भाषा है यों कह कर वहाँ "वैदर्भी" नाम देने से बताया कि उसके पिता भीष्म का कर्म से सम्बन्ध नहीं है यह उसकी महानता विशेष रूप से दिखाई है ।

३—बहिन दया की मूर्ति है इस उक्ति के अनुसार भ्राताओं के निरूपण के साथ बहिन का निरूपण करने से उसका "दयारूप" कहा ।

सुबोधिनी—कलेः स्थानं पञ्चात्मकं सुवर्णमिति तन्नामानः सर्व एव। अत एवाग्रे भगवान् वक्ष्यति 'तस्मात्प्रायेण न ह्याढ्या मां भजन्ती'ति। अग्रजो ज्येष्ठः रुक्मी सुवर्णसदृशः, वस्तुतो नाम तथा योगं नापेक्षते। रुक्मरथ इति द्वितीयः। रुक्मबाहुस्तृतीयः। अनन्तर इति त्रयाणामेकप्रकृतिकत्वम्, अन्येषां रुक्मिणीसहितानां भिन्नप्रकृतिकत्वमिति त्रयाणां निरूपणानन्तरमुक्तम्। अनन्तरमिति सर्वत्र सम्बध्यते। रुक्मकेशश्चतुर्थः। रुक्ममाली पञ्चमः। एतेषां योगानुसारेणाप्यर्थः स्वयमूह्यः। एषां स्वसा एकमातृका प्रियभगिनी च रुक्मिणी। यथैते दुष्टाः, तथा सापि भविष्यतीत्याशङ्कयाह सतीति ॥२२॥

व्याख्यार्थ—कलि के रहने का स्थान स्वर्ण है, वह पञ्च रूप होता है, अतः ये पांच भी उसके नाम वाले हैं इसलिए भगवान् आगे कहेंगे कि "तस्मात् प्रायेण न ह्याढ्या मां भजन्ति" इसी कारण से बहुत कर धनवान् मेरा भजन नहीं करते हैं।

प्रथम जन्मा हुआ बड़ा रुक्मी सुवर्ण के समान है, सचमुच जैसा नाम है वैसे योग की अपेक्षा नहीं करता है, रुक्मरथ यह दूसरा रुक्मबाहु तीसरा ये तीन हो एक प्रकृति वाले हैं शेष दो दूसरी प्रकृति वाले हैं इसोलिए अनन्तरं पद दिया है उन एक प्रकृति वाले तीनों के नाम देने के बाद इन दो का और रुक्मिणो का प्रथक् नाम कह कर बताया है कि इनकी दूसरी प्रकृति है, रुक्मकेश चौथा और रुक्ममाली पांचवा था इनका योग के अनुसार अर्थ आप ही समझ लेना चाहिए इनकी प्यारी बहिन रुक्मिणी भी एक ही माता से उत्पन्न हुई है, अतः वह भी उन जैसी दुष्ट होगी ? इस शंका को मिटाने के लिए इसका विशेषण "सती" देकर इसकी दुष्टता का निषेध किया है॥२२॥

आभास—एवं तस्या उत्पत्तिमुक्त्वा, तस्यां भगवतः, भगवति तस्याश्च, गान्धर्वं विवाहं वक्तुं स्नेहं निरूपयति द्वाभ्याम्।

आभासार्थ—इस प्रकार रुक्मिणी की उत्पति कह कर अब दो श्लोकों से भगवान् का उसमें स्नेह है उसका भगवान् में स्नेह है इसको गान्धर्व विवाह करने में हेतु वर्णन करते हैं।

श्लोक—सोपश्रुत्य मुकुन्दस्य रूपवीर्यगुणश्रियः।
गृहागतैर्गीयमानास्तं मेने सदृशं पतिम् ॥२३॥

तां बुद्धिलक्षणौदार्यरूपशीलगुणान्विताम् ।
कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ।।२४।।

श्लोकार्थ—वह रुक्मिणी घर में आये हुए विद्वान ब्राह्मण आदि से गाए हुए श्रीकृष्ण के रूप, वीर्य, गुण और वैभवों को सुन उनको ही अपने योग्य पति समझा ।। २३ ।।

इसी प्रकार भगवान् ने भी उसको "रुक्मिणी को" बुद्धि के लक्षण, उदारता, सुन्दर रूप और शील तथा गुणों से युक्त जान अपने योग्य समझा उससे ब्याह् करने का मन में निश्चय कर लिया ।।२४।।

सुबोधिनी—सोपश्रुत्येति । सा रुक्मिणी मुकुन्दस्य मोक्षदातुः स्वस्यापि पुनर्जन्मनिवृत्त्यर्थं भगवद्गुणानेव शृणोति । कन्याया अपेक्षितं रूपम्, वीर्यं क्षत्रियाणाम् । विद्यास्थानीयं यशः । कुलस्थानीयां श्रीः लक्ष्मीः शोभा च । तेन धनसमृद्धिः सर्वसमृद्धिश्च सूचिता । एवं वरे योग्यानि पञ्च रूपाण्यप्युक्तानि । अन्तपुरस्थायाः कन्यायाः कुत एतावच्छ्रवणमित्याशङ्क्याह गृहागतैर्गीयमाना इति । य एव ब्राह्मणाः विद्ययोपजीविनो वा साधवो वृद्धाः सर्वत्राप्रतिहतगतयः तैः गीयमानाः श्रुत्वा, तमेव भगवन्तं आत्मनः सदृशं पतिं मेने ।।२३।।

भगवानपि तां सदृशीं भार्यां मेने । तत उद्वोढुमपि मनो दधे । तस्या अपि पञ्च गुणाः । एकविकलापि न ग्राह्या भवति । आदौ बुद्धिमती अपेक्ष्यते । अन्यथा गृहं विनश्येत् । स्त्रीलक्षणरहिता तु सामुद्रशास्त्रविरोधिनी भाग्यरहितैव भवति । औदार्याभावे लुब्धा सर्वमेव पुरुषार्थं नाशयेत् । रूपाभावे व्यर्थो विवाहः । शीलाभावे अधर्मं जनयेत् । अतः एते पञ्चापि गुणाः लोके प्रसिद्धिमापन्नाः यस्यां भवन्ति, सा विवाह्या । अन्वयः अव्यभिचारिसम्बन्धः । कृष्णश्चेति चकारः सदृश्यार्थं भगवानपि तादृश इत्याह । अत एव सदृशी । सम्यगुद्वाहः आहूय कन्यादानरूपः । स हि शोभाकरो भवति ।।२४।।

व्याख्यार्थ—वह रुक्मिणी, मैं फिर जन्म के चक्कर में न फसूं, इस इच्छा से मोक्षदाता भगवान् के गुणों को ही सुनती है वर में जो गुण कन्या चाहती है, वे सर्व श्रीकृष्ण में हैं ऐसा उसने सुना, १—कन्या को वर पसन्द है जिसका रूप सुन्दर होके यदि क्षत्री होवे तो वीर्य चाहिए विद्या के स्थान पर यश चाहिए और कुल के स्थान पर "श्री" लक्ष्मी चाहिए इससे बहुत धन तथा

सर्व प्रकार की समृद्धि की सूचना दी इसी प्रकार वर में जो पांच रूप चाहिए वे इनमें है यह भी बता दिया कन्या तो अन्तःपुर में भीतर ही रहती है उसने श्रीकृष्ण के गुण कहां से और कैसे सुने ? इस शंका को मिटाने के लिए कहा कि "गृहागतैर्गीयमानाः" घर में जो ब्राह्मण विद्या से आजीविका करने वाले आते थे और साधु तथा वृद्ध आते थे क्योंकि उनको कहीं भी चले जाने की रुकावट नहीं थी और वे श्रीकृष्ण के गुण गान करते थे उनसे सुनती थी, गुणों के सुनने से उसने भगवान् को ही अपने योग्य पति समझा।

भगवान् ने भी उसको अपने योग्य पत्नी समझा इसी कारण से उससे विवाह करने में मन लगाया उसमें भी पांच गुण थे यदि इन पांचों से एक भी कम हो तो वह कन्या ग्रहण करने योग्य नहीं है पहिले बुद्धि वाली चाहिए यदि सयानी नहीं हो तो घर का नाश हो जाता है स्त्री लक्षणों से जो रहित है वह सामुद्रिक शास्त्र में कहे हुए गुणों से रहित होने से भाग्यहीन ही होती है स्त्री में उदारता का गुण भी चाहिए यदि वह गुण उसमें नहीं है तो लोभिन होने से सर्व पुरुषार्थों को नाश करेगी, यदि रूप नहीं है तो विवाह व्यर्थ है यदि चरित्र अच्छा नहीं है तो अधर्म की उत्पन्न करेगी अतः ये पांच गुण जो लोक में प्रसिद्ध हैं वे उसमें हो तो उससे विवाह करना चाहिए, जिसमें उपरोक्त पांच गुण मिले हुए हैं उसमें किसी प्रकार व्यभिचारि सम्बन्ध नहीं होगा "च" पद का भावार्थ यह है कि कृष्ण भी पांचों गुणों से युक्त होने से वैसा ही योग्य है अतः यह भी समान ही है उस विवाह को उत्तम विवाह कहा जायगा कन्या का पिता बुला कर कन्यादान कर देवे वह ही शोभा बढ़ाने वाला विवाह है ॥२४॥

आभास—**तत्र जातमित्याह बन्धूनामिच्छतां दातुमिति ।**

आभासार्थ—बान्धवों की इच्छा थी कि बहिन, कृष्ण को दी जावे किन्तु वैसा नहीं हुआ जिसका वर्णन "बन्धूनामिच्छतां दातुं" श्लोक में करते हैं ।

श्लोक—बन्धूनामिच्छतां दातुं कृष्णाय भगिनीं नृप ।
ततो निवार्य कृष्णद्विड् रुक्मी चैद्यममन्यत ॥२५॥

श्लोकार्थ—हे राजा सब भाई तो अपनी बहिन कृष्ण को देनी चाहते थे, किन्तु कृष्ण के बैरी रुक्मी ने उससे फेर कर चैद्य राजा को देनी मंजूर की ॥२५॥

सुबोधिनी—बान्धवाः पित्रादयः कुलसम्बन्धिनः दातुमिच्छतां सताम्, यतः कृष्णः सदानन्दः, अन्ये गुणाः फलसाधकाः, अयं तु साक्षादेव फलरूप इति । तत्र रुक्मी वरत्वेन भगवन्तं निवार्य, चैद्यं शिशुपालमेवामन्यत । स्वरूपाज्ञानेन हि स्वकार्यं साधनीयम् । तत्र पूर्वजन्मनि

सीतार्थमेव रावणो हतः । तस्यामभिनिविष्टचित्त एव प्राणान् जहौ। अतो लोकविचारेण तस्मै देयेति भवति। भगिनीत्वादस्य प्राबल्यम्। नृपेति सम्बोधनं राज्ञे राजकन्या देयेति तस्याभिप्रायस्त्वया ज्ञायत एवेत्येतदर्थम्। ततो हेतोः कृष्णाद्वा निवार्य, यतः कृष्णद्विट्। न हि तस्य स्वरूपनाशको भगवान् हितो भवति । अतः शत्रूणां मध्ये मुख्य इति चैद्य एव वरत्वेन स्वीकृतः। अनेन सर्वेषामेव तत्र सम्मतिरपि जातेति सूचितम्। राजा कुलीनः, सोऽपि महानिति ॥२५

व्याख्यार्थ—पिता आदि से लेकर सब कुल के सम्बन्धी भी कृष्ण को देने की इच्छा वाले थे क्योंकि कृष्ण सदानन्द है दूसरे गुण फलों को सिद्ध करने वाले हैं ये तो साक्षात् ही फल रूप है वहाँ रुक्मी ने भगवान् वर हो यह न मान कर शिशुपाल को वररूप मान लिया, स्वरूप के अज्ञान से ही अपना कार्य सिद्ध करना चाहिए वहाँ पूर्व जन्म में सीता के लिए हो रावण को मारा था उसमें पूर्ण रीति से आसक्त चित्त होने से ही रावण मरा अतः लोक विचार से उसको देनी चाहिए यों होता है। रुक्मिणी का बड़ा भाई है इस लिए उसकी प्रबलता है, हे नृप ! सम्बोधन से यह सूचित किया है कि राजा को कन्या राजा को देनी चाहिए यह इसका अभिप्राय आप जानते हो हैं इस कारण से रुक्मी ने कृष्ण से सगाई टाल कर शिशुपाल की सगाई स्वीकार करली क्योंकि रुक्मी कृष्ण का द्वेषी था उसके स्वरूप का नाश करने वाले भगवान् मित्र नहीं हो सकते हैं अतः शत्रुओं में यह मुख्य है यों समझ कर चैद्यको वरपन से स्वीकार किया, इस प्रकार कहने से सर्व की इसमें सम्मति हो गई यह भी सूचित कर दिया कि राजा कुलीन तथा महान् है ॥२५॥

आभास—तद्रुक्मिण्या अनभिप्रेतमिति स्वात्मानं भगवद्गामिनं कर्तुमियेषेत्याह तदवेत्येति ।

आभासार्थ—शिशुपाल मेरा वर हो यह रुक्मिणी को पसन्द नहीं था इसलिए अपने को भगवान् ग्रहण करे ऐसी मनमें इच्छा की और उसके लिए प्रयत्न किया जिसका वर्णन "तदवेत्यासितापाङ्गी" श्लोक में करते हैं ।

श्लोक—तदवेत्यासितापाङ्गी वैदर्भी दुर्मना भृशम् ।
विचिन्त्याप्तं द्विजं कञ्चित्कृष्णाय प्राहिणोद्द्रुतम् ॥२६॥

श्लोकार्थ—जब रुक्मिणी ने यह जान लिया तब वह श्याम कटाक्ष वाली रुक्मिणी बहुत उदास हुई विचार कर किसी विश्वास पात्र ब्राह्मण को कृष्ण के पास जल्दी भेज दिया ॥२६॥

सुबोधिनी—आदौ तन्निश्चित्य भृशं दुर्मना जाता। नन्वग्रे भगवत्प्रापकाणि कर्माणि कृत्वा भगवन्तं प्राप्स्यति, किमित्युद्वेग इति चेत्। तत्राह वैदर्भीति। नास्यां कर्माण्युत्पद्यन्त इति। किञ्च। असितापाङ्गी परमसुन्दरी, परमसुन्दर एव युक्ता भवति, न तु जीवे कुरूपे। अतः आदौ दुर्मना भूत्वा पश्चादुपायचिन्तायां मित्रेणैवैतत्कार्यं कर्तव्यमिति विचार्य, सर्वस्य मित्र गौर्ब्राह्मणो देवश्चेति, तत्रापि गौरज्ञा साधारणी च नात्यन्तं भगवत्पक्षपातिनी. अतो ब्राह्मण एवाप्तोऽस्मिन् कार्ये भवतीति विचिन्त्य, कञ्चिदाप्तं द्विजं गूढार्थसाधकं द्रुतं शीघ्रमेव कृष्णाय प्राहिणोत्। अर्थात् सन्देशानुक्त्वा पत्रिकां वा दत्वा ॥२६॥

व्याख्यार्थ—पहिले सुनी हुई बात का पूर्ण रीति से निश्चय कर बहुत उदास मन वाली हो गई, उदास क्यों हुई ? भगवान् के प्राप्ति को सिद्ध करने वाले कर्म कर भगवान् को वर बना लेगी चित्त की व्याकुलता करने से क्या ? इसके उत्तर में कहते हैं कि 'वैदर्भी" है अर्थात् विदर्भ देश में उत्पन्न होने से जैसे उस देश में दर्भ उत्पन्न नहीं होते हैं, वैसे इसमें कार्य उत्पन्न नहीं होते हैं और विशेष यह परम सुन्दरो है इसलिए जो परम सुन्दर हो उससे ही विवाह करना योग्य है, कि कुरूप जीव के साथ योग्य है अतः पहले उदास हुई पश्चात् विचार करने लगी कि क्या उपाय करूँ ? उपाय का विचार करते ध्यान में आया कि यह कार्य तो मित्र ही कर सकेगा उससे हो कराना चाहिए यों निश्चय कर मित्र को ढूंढने लगी सब के मित्र तीन होते हैं गौ, ब्राह्मण और देव इनमें गौ तो अज्ञ है और साधारण है, भगवान् को बेहद पक्षपात करने वाली नहीं है इस कारण से इस कार्य में सत्यवक्ता विश्वास पात्र ब्राह्मण ही इस कार्य करने में सहायक होगा क्योंकि ब्राह्मण भगवान् के बेहद पक्षपाती है यों पूर्ण विचार कर किसो आप्त गुप्त कार्य को सिद्ध कर देने वाले ब्राह्मण को शीघ्र ही भगवान् के पास भेजा अर्थात् सन्देश देकर अथवा पत्र देकर उस ब्राह्मण को रवानगी की ॥ २६ ॥

आभास—तस्य बहिःकार्यमाह द्वारकां स समभ्येत्येत्यादिदशभिः ।

आभासार्थ—उस ब्राह्मण का बाहिर के कार्य का वर्णन "द्वारकां स" श्लोक में करते हैं।

श्लोक—द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः ।
अपश्यदाद्यं पुरुषमासीनं काञ्चनासने ॥२७॥

श्लोकार्थ—वह ब्राह्मण द्वारका में पहुँचा और दरवानों से अन्दर भेजा गया वहाँ सोने के सिंहासन पर विराजमान आद्य पुरुष के उसने दर्शन किए ॥२७॥

सुबोधिनी स हि निर्गुण सगुणं च कार्यं कृतवानिति स शीघ्रमेव द्वारकां समभ्येत्य, पूर्वमेव भगवदुक्तैः प्रतीहारैरन्तः कृष्णसन्निधौ प्रवेशितः, कार्यं साधयितुमागतः, मध्ये स्वपुरुषार्थमपि साधितवानित्याह अपश्यदिति। ननु दर्शनमवान्तरकार्यमेव कुतो न भवेत्, तत्राह आद्यं पुरुषमिति। सर्वस्यापि पतिदर्शनं पुरुषार्थः, तत्रापि परमः पतिः भगवान्, सर्वे प्रकृतिरूपा इति पूर्वमवोचाम। तादृशो भगवान् कार्यार्थं समागतः व्यग्र एव भविष्यतीति कथं कार्यद्वयमपि सिध्येदित्याशङ्क्याह काञ्चनासने आसीनमिति। उपविष्टत्वादव्यग्रता। सुवर्णासने चोपविष्ट इति विषयपरिग्रहः। तेन कार्यद्वयसिद्धिरिति भावः ॥२७॥

व्याख्यार्थ – उस ब्राह्मण ने सगुण तथा निर्गुण दोनों कार्य किए, वह जल्दी ही द्वारका में पहुँच कर पहिले ही भगवान् की आज्ञा प्राप्त कर ड्योढी वालों से अन्दर भेजा गया क्योंकि कार्य सिद्ध करने के लिए आया है। बीच में अपने पुरुषार्थ भी सिद्ध करने लगा प्रथम जाते ही दर्शन किए दर्शन करना बीच का कार्य क्यों न समझाया जाय ? इसके उत्तर में कहते हैं कि "आद्यं पुरुषं" दर्शन आद्य पुरुष का किया, वह सर्व के पति हैं, पति का दर्शन सब के लिए पुरुषार्थ है उसमें भी मुख्य पति भगवान् ही है अन्य सर्व प्रकृति रूप है यों आगे कह दिया है वैसे भगवान् तो कार्य के लिए आए हैं इसलिए कार्य में बहुत फसे होंगे, तो दोनों कार्य कैसे सिद्ध होंगे इसके उत्तर में कहते हैं कि वे कार्य में व्यग्र नहीं है, इसलिए स्वर्ण के सिंहासन पर विराजमान हैं, सोने के सिंहासन पर विराजमान् से यह भी सूचित किया है कि सर्व विषयों को भी स्वीकार किए हैं, इससे दोनों कार्य की सिद्धि होगी ॥२७।

आभास—**ततस्तस्य सन्मानन माह दृष्ट्वा ब्राह्मण्यदेव इति।**

आभासार्थ—अनन्तर उसके आतिथ्य सत्कार को "**दृष्ट्वा" श्लोक से कहते हैं।**

श्लोक-**दृष्ट्वा ब्राह्मण्यदेवस्तमवरुह्य निजासनात्।**
उपवेश्यार्हयांचक्रे यथात्मानं दिवौकसः ॥२८॥

श्लोकार्थ—भगवान् ब्राह्मण को देख कर अपने आसन पर से स्वयं नीचे उतर कर उसको बिठाकर वैसे उसकी पूजा करने लगे जैसे देव लोग आपकी करते हैं॥२८॥

सुबोधिनी—प्रश्नानन्तरं सन्माननायां स्त्रीनिमित्तं भवेत्। आर्षज्ञानेन पूजायामपि कृत्रिमत्वसम्भावना स्यात्। ततश्च तद्दोषनिवृत्तिधर्मान्तरमेवाह ब्रह्मण्यदेव इति। ब्रह्मण्यश्चासौ देवश्चेति ब्राह्मणानां हितः समर्थश्च। अतो ब्राह्मणस्य अवरुह्य देवस्येव पूजां कृतवान्।

तं प्रकारमाह । निजासनादवरुह्य, तत्र ब्राह्मण-मुपवेश्य, अर्हयामास । प्रकारविशेषजिज्ञासायां स्वधर्ममतिदिशति । दिवौकसो देवा यथा भगवन्तमिति । भगवति गृहमागते इन्द्रः स्वासने भगवन्तमुपवेश्य यावती स्वसमृद्धिः तया सर्वयैव पूजयति । एवं भगवानपि सर्वसमृद्धया पूजितवान् ॥२८॥

व्याख्यार्थ—यदि ब्राह्मण से आने का कारण पूछ पीछे सत्कार करते तो वह सम्मान स्त्री के कारण समझा जाता यदि आर्ष ज्ञान से जानकर पूजा की होती तो वह कृत्रिम पूजा बनती इन दोषों को मिटाने के लिए दूसरा धर्म बताते हैं कि भगवान् ब्राह्मण देव हैं इसलिए भगवान् ब्राह्मण को घर में पधारते देख आसन से नीचे उतर कर देव के समान उसको पूजा करने लगे, वह प्रकार बताते हैं जब ब्राह्मण आया तब भगवान् स्वर्ण के सिंहासन पर विराजमान थे उसको देखते ही आसन पर से उठे और ब्राह्मण के पास जाकर उसको लेके अपने आसन पर बिठाया बादमें उसकी पूजा की विशेष जानने की इच्छा में धर्म प्रकट कर दिखाते हैं "दिवौकसो देवा यथा भगवन्तं" देव जैसे भगवान् की पूजा करते हैं जैसे कि जब भगवान स्वर्ग में पधारते हैं तब इन्द्र भगवान् को अपने घर पधारते देख अपने आसन पर भगवान् को विराजमान कर जितनी अपनी समृद्धि पास है उससे भगवान् की पजा करता है इस प्रकार भगवान् ने भी सर्व समृद्धि से ब्राह्मण का पूजन किया ॥२८॥

आभास—ततस्तस्य राज्ये प्रायेण धर्मो नास्तीति स्वदर्शनफलं तस्य ज्ञानमुपदिशतीत्याह तं भुक्तवन्तमिति ।

आभासार्थ—उसके राज्य में बहुत करके धर्म नहीं है इसलिए उसको अपने दर्शन का फल, ज्ञान का उपदेश कर देते हैं ।

श्लोक—तं भुक्तवन्तं विश्रान्तमुपगम्य सतां गतिः ।
पाणिनाभिमृशन्पादावव्यग्रस्तमपृच्छत ॥२९॥

श्लोकार्थ—जब उसने भोजन कर लिया और मार्ग की थकावट दूर हुई तब सत्पुरुषों की गति भगवान् उसके पास जाके हाथ से पाँवों को चाँपते हुए धैर्य से पूछने लगे ॥२९॥

सुबोधिनी—भोजनपर्यन्तं सर्वे उपचाराः कृताः । ब्राह्मणो हि मुख्यो भोजनप्रियः । ततो भोजनश्रमापनोदनादनन्तरं उपगम्य निकटे गत्वा । नन्वेवं ब्राह्मणमात्रे किमिति करोतीत्याशङ्क्याह सतां गतिरिति । लोकशिक्षार्थमेवं करोतीत्यर्थः । ततः पाणिना पादावभिमृशन् रुक्मिण्यामासक्तिरस्ति ततो व्यग्रः प्रश्नं करिष्यतीत्याशङ्क्य अव्यग्रस्तमपृच्छतेत्याह ॥२६॥

व्याख्यार्थ—भोजन पर्यन्त सब प्रकार की सेवा की ब्राह्मण को सबसे प्रिय भोजन है भोजन के श्रम के निवृत होजाने के पश्चात् समीप जाकर हाथ से पादों को चाँपते हुवे क्षुब्ध न हो के धीरज से पूछने लगे, भगवान् होकर भी साधारण ब्राह्मण का भी वैसा सत्कार क्यों करते हैं ? इसके समाधान में कहते हैं कि भगवान् सत्पुरुषों की गति हैं, और लोगों को शिक्षा देने के लिए यों करते हैं ॥२६॥

आभास **ज्ञानमुपदिशति कच्चिद्द्विजवरेति पञ्चभिः ।**

आभासार्थ—"कच्चिद्द्विजवर" श्लोक से पांच श्लोकों में ज्ञान का उपदेश करते हैं ।

श्री भगवानुवाच—

श्लोक—**कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः ।**
वर्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥३०॥

श्लोकार्थ—श्री भगवान् कहने लगे कि हे ब्राह्मण श्रेष्ठ वृद्ध पुरुषों के समान धर्म पर तू चल रहा है उसमें कोई रुकावट तो नहीं है सदा संतोषयुक्त मन से उसमें प्रवृत हो रहे हो न ? ॥३०॥

सुबोधिनी—चतुर्भिस्तस्य, एकेन तद्राज्ञः । चत्वारः पुरुषार्था ब्राह्मणस्य, राज्ञः अर्थकामौ नियतौ, मोक्षो नास्त्येव, धर्मः संदिग्धः । अतः स एव पृच्छयते । आदौ तस्य धर्मं पृच्छति कच्चिद्द्विजवरश्रेष्ठ इति । द्विजवराणां मध्ये श्रोत्रियाणां मैत्री क्रियत इति श्रेष्ठत्वम् । अतः सर्वेषां मित्रभूतत्वात् तथा सम्बोधनम् । यद्यप्ययं धर्मो वर्तत एव, तथापि वृद्धसम्मतोऽपि परम्परया समागतः श्रौतः स्मार्तः वर्तते कच्चित् । किञ्च । स्वपरपीडया क्रियमाणः शुद्धो धर्मो न भवतीति उत्तरकाण्डानुरोधमप्यङ्गीकृत्याह नातिकृच्छ्रेणेति । अतिकृच्छ्रेण धर्मोऽपि धर्मो न भवतीति । तत्रापि शुद्धमनस एव धर्मो भवति, ब्राह्मणानां मनःशुद्धिः संतोष एवेति तं पृच्छति सदा संतुष्टमनस इति । सदा संतुष्टं मनो यस्य ॥३०॥

व्याख्यार्थ—चार श्लोकों से ब्राह्मण का, एक से राजा का धर्म कहते हैं ब्राह्मणों के लिए चारों ही पुरुषार्थ हैं, राजा के लिए दो अर्थ–"अर्थ और काम" मोक्ष नहीं है और धर्म सन्देह वाला है अर्थात् होवे वा न भी होवे अतः ब्राह्मण ही पूछा जाता है, प्रारम्भ में उसका धर्म पूछते हैं आप ब्राह्मणों में श्रेष्ठ हैं क्योंकि आप वेदज्ञ विप्रों से मैत्री करते हैं, इस कारण से वह प्राणी मात्र के मित्र हैं जिससे वैसा सम्बोधन दिया है, यद्यपि यह धर्म तो होता ही है तो भी वह वृद्धों की राय के अनुसार परम्परा से चलता आया श्रोत और स्मार्त भी कुछ होता रहता है कि नहीं ? जिस धर्म में अपने को वा दूसरे को पीड़ा होवे वह किया हुआ धर्म शुद्ध नहीं होता है उत्तर काण्ड के अनुरोध को भी अंगीकार कर कहते हैं कि "नातिकृच्छ्रेण" बहुत क्लेश देने वाला धर्म भी धर्म नहीं है अर्थात् जिस धर्म के करने से अपने को तथा दूसरों को क्लेश होवे वह धर्म नहीं है उसमें भी जो शुद्ध मन से अर्थात् शान्त तथा सन्तुष्ट मन से किया हुआ धर्म ही धर्म है. ब्राह्मणों के मन की शुद्धि का लक्षण "सन्तोष" ही है इसलिए उससे पूछते हैं कि आप सदैव संतोष युक्त मन से धर्म पालन करते हो कि नहीं ? ॥३०॥

आभास—अर्थं पृच्छति यर्हि वर्ततेति ।

आभासार्थ—"संतुष्टो यर्हि" श्लोक में दूसरे पुरुषार्थ 'अर्थ" को पूछते हैं ।

श्लोक—संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित् ।
अहीयमानः स्वधर्मात्स ह्यस्याखिलकामधुक् ॥३१॥

श्लोकार्थ—ब्राह्मण जो कुछ प्राप्त हो उसमें ही संतोष रखे संतोष के लिए अपने धर्म से न डिगने पर वह सन्तोष ही इसकी सर्व कामनाओं को पूर्ण करता है ॥३१॥

सुबोधिनी—संतोष एव ब्राह्मणानां धनं कामधेनुः, नतु लोकप्रसिद्धं धनम् । येन केन चिदिति । कर्मवशादवश्यं जीवनार्थं प्राप्यत एव । किञ्च । तावता चेत् संतुष्टः, कर्मफलदाता संतुष्टो भवतीति । असन्तोषेऽपि क्रियमाणे नाधिकं प्रयच्छति । असन्तुष्टश्च भवतीति तत्सन्तोषार्थं स्वधर्मादहीयमानः सर्वमेव स्वधर्मं कुर्वन् यर्हि वर्तेत । अनेनेयं स्थितिदुर्लभेति सूचितम् । स एव सन्तोषः अस्य अखिलानेव कामान् दोग्धि ॥३१॥

व्याख्यार्थ—सन्तोष ही ब्राह्मणों का कामधेनु के समान धन है लोक में प्रसिद्ध जो धन है वह ब्राह्मणों का धन नहीं है कर्म के अनुसार जीवन के लिए अवश्य जिस किसी से प्राप्त होता ही है

श्लोकार्थ—प्रथम नगर के राजमार्ग, गली और चौराहे को झार बुहार साफ कराया, फिर छिड़काव कराया, विचित्र ध्वजा, पताका और तोरण बंधवा कर नगर को सुशोभित किया ।।८।।

नगर के नर नारी, माला, सुगन्ध पुष्प और आभूषण तथा स्वच्छ वस्त्रों से अलंकृत हो रहे थे एवं घर घर में अगर की सुगन्धियां जाती थी ।।९।।

सुबोधिनी—पुरमिति । प्रथमतः सम्यक् मृष्टं रजोनिवारणेनोज्ज्वलीकृतम् । ततः संसिक्तं चन्दनादिभिः । मार्गा राजमार्गाः । रथ्या हट्ट-स्थिता । चतुष्पथं सर्वतो मार्गाः । तेषु संसिक्तमित्यर्थः । एकमधः शोभा निरूपिता । उपरिशोभामाह चित्रध्वजेति । त्रिविधैरपि सम्यगलङ्कृतम् । मध्ये अलङ्करणमाह स्रग्गन्धेति । स्त्रीपुरुषैः गृहैश्च जुष्टमिति । अनेन तस्मिन् नगरे केवला व्यावर्तिताः । ये सुतराममङ्गलरूपाः, तेऽपि भूषिता इत्याह । स्रग्गन्धमाल्याभरणैर्युक्ताः, स्रग्गन्धमाल्यानामेवाभरणानि येष्विति । विरजानि अम्बराणि भूषणानि च येष्विति । श्रीमद्गृहैरिति गृहे सर्वसम्पत्तिर्निरूपिता । अगरुधूपितैरिति विशेषसम्पत्तिः विवाहोत्सवप्रयुक्तिश्च निरूपिता ॥८॥६॥

व्याख्यार्थ–पहिले नगर की धूलि आदि निकाल कर उसे खूब उज्ज्वल और साफ किया । बाद में चन्दन आदि के सुगन्धित जल से राजमार्ग, बाजार, गलियाँ, रथ के जाने योग्य सड़कें और चौराहों पर छिड़काव किया । इस प्रकार नीचे भाग की शोभा का वर्णन करके अब ऊपर की शोभा का वर्णन करते हैं कि विचित्र ध्वजा पताका और तोरणों से अच्छे ढंग से उसे सजाया । बीच का शृंगार कहते हैं कि नगर स्त्री और पुरुष तथा गृहों से सुशोभित हैं इससे नगर में कोई भी बिना अलंकार के नहीं है, जो बहुत कर अमंगल रूप हैं, वे भी अलंकृत किए हुए हैं । पुरुष और स्त्रियाँ माला, चन्दन, पुष्पों के आभरणों से युक्त हैं तथा स्वच्छ वस्त्र तथा अनेक आभूषणों से सुन्दर रूप वाले बने हुए हैं, इससे घरों की सर्व प्रकार की सम्पत्ति का निरूपण किया है । घरों में विशेष सम्पत्ति विवाहोत्सव में लगने वाली भी है । अगरु धूप आदि से समस्त घर सुगन्धि से युक्त थे ॥८, ६॥

आभास—**एवं लौकिकसमृद्धिमुक्त्वा वैदिकार्थसमृद्धिमाह पितृन्देवान्समभ्यर्च्येति ।**

आभासार्थ—इस प्रकार लौकिक समृद्धि कहकर अब वैदिक के लिए जो समृद्धि होती है, वह "पितृन् देवान्" श्लोक में कहते हैं ।

श्लोक—**पितृन्देवान्समभ्यर्च्य विप्रांश्च विधिवन्नृपः ।**
भोजयित्वा यथान्यायं वाचयामास मङ्गलम् ॥१०॥

श्लोकार्थ—राजा, पितर और देवों का पूजन करके ब्राह्मणों का भी विधि के अनुसार पूजन किया । सबको उचित रूप से भोजन कराके बाद में पुण्याहवाचन कराया ॥१०॥

सुबोधिनी—पितरो देवाश्च नान्दीमुखदेवताः सम्यक् पूजिताः, अन्यथा प्रथमत एव कन्याहरणे विवाहो विगुणः स्यात्, अतः कर्तव्यं कृतमिति वक्तव्यम् । विप्रांश्च सम्यगभ्यर्च्य पुण्याहवाचने । विधिवदिति । तेभ्यो वस्त्रालङ्करणादिदानेन । नृप इति सामर्थ्यम् । तेषां सन्तोषः भोजनप्रधान इति भोजयित्वा यथान्यायमित्युक्तम् । नान्दीमुखे विधानपूर्वकं भोजयित्वा सुमङ्गलं पुण्याहवाचनम् ।।१०।।

व्याख्यार्थ—पितर और देवता जो नान्दीमुखदेव हैं उनका अच्छे प्रकार से पूजन किया । यों नहीं करते तो, पहले ही कन्या हरण करने में, विवाह गुण रहित हो जाता । इसी कारण से जो विवाह में प्रथम कर्तव्य है वह किया । पुण्याह वाचन में प्रथम ब्राह्मणों का विधि पूर्वक वस्त्र अलंकृत आदि दान के साथ पूजन किया । "नृप" कहने से यों करने का सामर्थ्य प्रकट किया है । ब्राह्मणों का सन्तोष भोजन से होता है, अतः नान्दीमुख में विधि का उचित रीति से भोजन कराके मंगलरूप पुण्याह वाचन कराया ।।१०।।

आभास—यदर्थं भगवानागतः तां देयत्वेन भूषितां चक्रुरित्याह सुस्नातामिति ।

आभासार्थ—जिसको लेने के लिए भगवान् आए हैं, उसको देने के हेतु सुशोभित करने लगे, जिसका वर्णन "सुस्नातां" श्लोक से करते है ।

श्लोक—सुस्नातां सुदतीं कन्यां कृतकौतुकमङ्गलाम् ।
अहतांशुकयुग्मेन भूषितां भूषणोत्तमैः ।।११।।

श्लोकार्थ—अच्छी तरह स्नान की हुई, सुन्दर दांतों वाली, किए हुए विवाह के चिन्ह वाली और नवीन हलदी के रंग वाले दो वस्त्र धारण की हुई उत्तम आभूषणों से भूषित कन्या को ।।११।।

सुबोधिनी—मङ्गलस्नानं कारितवन्तः, ततो दन्तसंस्कारमपि । शुभ्रदन्ता न द्रष्टव्येति केषाञ्चिद्देशाचारः । कन्यामित्यदत्ताम् । प्रायेण सूचित एव शिशुपालः । वाङ्निश्चयोऽप्यग्र एव भविष्यति । दाक्षिणात्यास्त इति विवाहपूर्वक्षण एव कन्यावरणम् । कृतं कौतुकरूपं मङ्गलं यस्याम् । हरिद्रया कपोलयोः रेखादिनिर्माणम् । तद्विवाह एव भवति, नान्यदा । वस्त्रमपि तादृशमेव परिधापितवन्त इत्याह अहतांशुकयुग्मेन भूषितामिति । अहतं तन्तूत्तारितं अच्छिन्नम् ।

नूतनमिति केचित् । तेषां मते पाषाणे प्रहारः न हतत्वं सम्पादयतीति । अनुपभुक्तमित्यन्ये अंशुकं पट्टवस्त्रम् । एकं परिधापितम्, अपरं प्रावृतमिति । भूषणैरपि भूषिताम् । सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुद इति कूकुदत्वार्थमलङ्करणमुक्तम् । कू द्यावापृथिव्यौ । कु कुत्सिते यस्याः । रोदसीदानापेक्षयापि तादृक् कन्यादानं विशिष्टमिति द्योतितम् ॥११॥

व्याख्यार्थ—प्रथम मंगल स्नान कराया, पश्चात् दाँतों को भी साफ किया साफ किए हुए कन्या के दाँत नहीं देखने चाहिए, यह कहीं का देशाचार है। उस कन्या को जो अब तक दी हुई नहीं है, बहुत करके यह शिशुपाल को सूचना भी की थी। वाणी से देने का निश्चय भी आगे हो होगा वे दाक्षिणात्य हैं, इसलिए विवाह से आगे क्षण में ही कन्या का वाणी से वरण करते हैं। जिसके कौतुक रूप मंगल चिन्ह किए हुए हैं, वे चिन्ह कपोलों पर हलदो से रेखाओं से किए जाते हैं। वे चिन्ह विवाह में ही किए जाते हैं दूसरे समय नहीं। वस्त्र भी वैसे पीले पहनाए गए हैं, वे कपड़े पट्ट के हों और फटे हुए नहीं हों। कोई कहते हैं कि "अहत" का अर्थ है नवीन वस्त्र उनके मत में वस्त्र को पाषाण पर जो प्रहार होता है जिससे उसकी नवीनता नहीं जाती है। दूसरे कहते हैं कि वह कपड़ा जो काम में नहीं लाया गया हो, दो वस्त्रों से एक पहिने और दूसरा ऊपर से ओढ़ ले, आभूषणों से भूषित, इस प्रकार कन्या का सत्कार कर जो देता है वह "कूकुद" है। कूकुद होने के लिए कन्या को अलंकृत करना है। इस प्रकार कन्या का दान पृथ्वी और स्वर्ग के दान से भी उत्तम है, यों प्रकट किया है। "कू" स्वर्ग और पृथ्वी "का होना" "कु" कुत्सितं यस्याः ? जिससे कम है ॥११॥

आभास—तस्यां विवाहदेवतासान्निध्यमाह चक्रुरिति ।

आभासार्थ— उसका "रुक्मिणी का" विवाह देवता की समीपता का वर्णन "चक्रुः" श्लोक से करते हैं।

श्लोक— चक्रुः सामर्ग्यजुर्मन्त्रैर्वध्वा रक्षां द्विजोत्तमाः ।
पुरोहितोऽथर्वविद्वै जुहाव ग्रहशान्तये ॥१२॥

श्लोकार्थ—उत्तम ब्राह्मण साम, ऋग् और यजुर्वेद के मन्त्रों से वधू की रक्षा करने लगे, और अथर्व वेद जानने वाला पुरोहित ग्रह शान्ति के लिए होम करने लगा ॥१२॥

सुबोधिनी—वेदत्रयमन्त्रैः रक्षासूत्रं बद्ध्वा द्विजोत्तमा मन्त्रद्रष्टारः ऋषयः भगवदर्थमेव । यथा कोऽपि न स्पृशति दृष्टादृष्टप्रकारेण, तथा रक्षां चक्रुः । देवा हि द्विविधाः, केचन हुतादः, अन्ये अहुतादः, तत्र वाचनादिना ये अहुतादः ते प्रीणिताः । होमेनान्येषां प्रीतिमाह पुरोहितोऽथर्वविदिति । होमे पुरोहितो मुख्यः । स हि हितमेव विचारयति । अथर्वणवेदे नक्षत्रकल्पः शान्तिकल्पश्चोक्तः । अतोऽथर्ववित् शान्तिं जानाति । ये कन्यायाः भगवन्तं त्याजयित्वा नीचसम्बन्धं कारयितुमुद्युक्ताः, तेषां ग्रहाणां शान्त्यर्थं जुहाव । अन्यथा ग्रहैर्वा प्रतिबन्धो भवेत् । भगवांश्च नालौकिकं प्रकटीकरोति ॥१२॥

व्याख्यार्थ—मन्त्रद्रष्टा ऋषियों के समान ब्राह्मणोत्तम साम, ऋग् और यजुः इन तीनों वेदों के मन्त्रों से वधू के रक्षासूत्र बाँध भगवान् के लिए ही इसी प्रकार रक्षा करने लगे । जैसे कोई भी दृष्ट अथवा अदृष्ट प्रकार से स्पर्श न कर सके । देव दो प्रकार के हैं, एक होम द्वारा प्रसन्न होकर तृप्त होने वाले हुताद हैं और दूसरे केवल मन्त्रों के श्रवण से ही तृप्त हो जाते हैं वे अहुताद हैं । वे मन्त्रों से प्रसन्न होके तृप्त हो गए, अब दूसरों को होम द्वारा प्रसन्नता का वर्णन करते हैं । होम में पुरोहित मुख्य है, वह हित का ही विचार करता है । वेद में कर्म कराने की दो प्रकार की विधि है । एक नक्षत्र कल्प, दूसरा शान्ति कल्प । अथर्ववेद जानने वाला शान्ति कल्प ही जानता है, जो होम द्वारा होता है । ग्रह कन्या का भगवान् से सम्बन्ध छुड़ा के नीच से सम्बन्ध कराने के लिए तैयार हुए थे, उन ग्रहों की शान्ति के लिए वे अथर्ववेद पुरोहित होम कराने लगे । नहीं तो ग्रहों द्वारा रुकावट हो जाय और भगवान् तो इस कार्य में अपना अलौकिक प्रकट करना नहीं चाहते हैं ॥१२॥

आभास—**दानेन सर्वदोषनिवृत्तिरिति दानान्यपि कृतवानित्याह हिरण्येति ।**

आभासार्थ—दान करने से सब दोष मिट जाते हैं, इसलिए दान भी किए, जिसका वर्णन "हिरण्य" श्लोक में करते हैं ।

श्लोक—हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् ।
प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिविदांवरः ॥१३॥

श्लोकार्थ—विधिज्ञों में श्रेष्ठ राजा ने सुवर्ण, चाँदी और वस्त्र तथा गुड़ मिलाए हुए तिल एवं धेनु ब्राह्मणों को दान कर दिए ॥१३॥

सुबोधिनी—हिरण्यं सुवर्णं तत्सार्वकामिकमग्निदैवत्यम् । रूप्यं सोमदैवत्यम् । वासश्च सर्वदेवतमिति । गन्धर्वदैवतं वा । तेन त्रयो भागिनः कन्याया व्यावर्तिताः । तिलमोदकदानं तु सर्व-

दोषहरमिति गुडमिश्रितान् तिलांश्च ददौ । चकारात्केवलानपि । कन्यायाः सर्वसमृद्धयर्थं धेनूश्च प्रादात् विप्रेभ्यश्च । त एव हि विशेषेण पूरकाः । राजा समृद्धः । विधानेन दत्तं फलपर्यवसायि भवतीति तदर्थमाह । विधिविदां मध्ये श्रेष्ठ इति ॥ १३ ॥

व्याख्यार्थ—सुवर्ण अग्नि देव वाला है, अतः वह दान करने से सर्व कामनाएँ पूर्ण करता है। चाँदी का देवता सोम है वस्त्रों के सर्वदेव हैं अथवा गन्धर्व देव है। इस प्रकार दान की वस्तुओं का स्वरूप कहने से यह बताया है कि कन्या के भोग के भाग वाले जो तीन देव हैं, वे इसका भोग नहीं कर सकेंगे। तिलों के मोदकों का दान सर्व दोषों का हरण करने वाला है। "च" पद से यह भाव भी प्रकट किया है, कि केवल तिलों का दान भी सर्व दोषों को मिटाना है। कन्या के पास सर्व प्रकार की समृद्धि होवे, इसलिए ब्राह्मणों का गाय दान में दीं। वे ही विशेष कर पूर्णता देने वाले हैं, राजा बहुत सम्पदा वाला है, विधि से दिया हुआ दान ही सफल होता है, इस कारण से कहा कि राजा स्वयं विधिज्ञों में उत्तम है, अर्थात् उसने जो दान दिए वे विधि के अनुसार ही दिए ॥१३॥

आभास—एवं पुरं कन्यां च निर्दुष्टतया निरूप्य मध्ये निराकार्याणां वृत्तान्तमाह षड्भिः ।

आभासार्थ—इस मकार नगर और कन्या निर्दोष है ऐसा निरूपण कर बीच में सामने पक्ष वालों का वृत्तान्त ६ श्लोकों से करते हैं ।

श्लोक—एवं चेदिपती राजा दमघोषः सुताय वै ।
कारयामास मन्त्रज्ञैः सर्वमभ्युदयोचितम् ॥१४॥

श्लोकार्थ—इसी भाँति चेदि देश के राजा दमघोष ने अपने पुत्र शिशुपाल के लिए मन्त्र जानने वाले ब्राह्मणों से अभ्युदय के उचित मंगल कर्म करवाए ॥१४॥

सुबोधिनी—भगवद्धर्मैरेव तेषां निराकरणार्थम् । प्रथमं विवाहः संस्कार इति पित्रैव तस्य संस्काराः क्रियन्त इति निरूपयति । यथा रुक्मिण्याः तत्पित्रा कृतम् । एवं चेदिपतिरपि दमघोषः सुताय शिशुपालाय विवाहो भविष्यतीति वै निश्चयेन कारयामास । तस्यापि सामर्थ्यं राजेति । दमघोष इति दमस्य शान्तेः घोष एव, नतु तस्य दमः । न हि अदान्तेन कृतं सफलं भवति । अक्षरव्यत्यासो वा, मदघोष इत्यर्थः । सिंहवत् । अत उन्मादात् भगवन्तमविचार्य तथा कृतवान् । अभ्युदये उचितमेव, नत्वभ्युदयम् ॥१४॥

व्याख्यार्थ—उनका निराकरण भगवद्धर्मों से ही किया। पहले विवाह के संस्कार पिता ही कराता है, जैसे रुक्मिणी के विवाह के सर्व संस्कार उसके पिता ने ही किए। इसी तरह चेदिदेश के राजा दमघोष ने भी मेरे पुत्र शिशुपाल का विवाह होगा, यह मन में निश्चय कर वह सर्व संस्कार कराने लगा। इस प्रकार करने की शक्ति उसमें भी था, क्योंकि वह भी राजा था तथा उसका नाम ही "शान्ति का गर्जन" "दमघोष" था न कि उसका दमन अशान्त जो करता है वह सफल नहीं होता है अथवा इसके नाम में एक अक्षर बदल गया है वास्तव में यह मदघोष है। सिंह के समान इसकी गर्जना मद से भरी हुई है, अतः अभिमान से भगवान् का विचार न कर इस प्रकार करने लगा। वह अभ्युदय में उचित है, किन्तु उसमें अभ्युदय हुआ नहीं ॥१४॥

आभास—**एतादृशस्य उन्मत्तसेनायुक्तस्य पुरं प्रति गमनमाह मदच्युद्भिरिति ।**

आभासार्थ—मदवाली सेना से युक्त ऐसे का नगर में गमन "मदच्युद्भि" श्लोक से कहते हैं।

श्लोक—मदच्युद्भिर्गजानीकैः स्यन्दनैर्हेममालिभिः ।
पत्त्यश्वसंकुलैः सैन्यैः परीतः कुण्डिनं ययौ ॥१५॥

श्लोकार्थ—मद झरने वाले हस्ती सुवर्ण माला से सजे हुए रथों से पैदल और सिपाही घुड़ सवारों की सेना से घिरे हुए (वर राजा) कुण्डिनपुर पधारे ॥१५॥

सुबोधिनी—षष्टिहायनैः मत्तगजैः सह। गजानामनीकरूपत्वार्थं तथोक्तम्। सुवर्णमालायुक्तानि च स्यन्दनानि। भटाः अश्वाश्च। एवं चतुरङ्गसेनायुक्तः युद्धार्थमेव कुण्डिनपुरं ययौ, न तु विवाहार्थम्, अन्यथा विवाहसामग्रीमपि नयेत् ॥१५॥

व्याख्यार्थ—साठ घोड़े, मदमत्त हाथियों के साथ, यों कहने का भाव यह है कि साथ में हाथियों की सेना ले ली थी। सोने की मालाओं से सुशोभित रथ थे, प्यादे और घोड़े, इस प्रकार चतुरंग सेना को लेकर युद्ध के लिए ही कुण्डिनपुर जाने लगे न कि विवाह के लिए। यदि विवाह के लिए जाते तो साथ में विवाह की सामग्री भी होती किन्तु वह नहीं थी ॥१५॥

आभास—**तस्याग्रे निराकरणार्थमादौ सन्माननामाह तं वै विदर्भाधिपतिरिति ।**

आभाषार्थ—उसका आगे तिरस्कार करने के लिए पहिले सन्मान का वर्णन "तं वै विदर्भाधिपति" श्लोक से कहते हैं।

श्लोक—तं वै विदर्भाधिपतिः समभ्येत्याभिपूज्य च ।
निवेशयामास मुदा कल्पिते वाधिवेशने ॥१६॥

श्लोकार्थ—विदर्भ का राजा भीष्मक सामने लेने के लिए आया और उसका पूजन सत्कार कर हर्ष से बनाए हुए जनवासे में स्थापित किया ॥१६॥

सुबोधिनी-विदर्भदेशस्याधिपतिः विशेषानभिज्ञः, तं निश्चयेन, समभ्येत्याग्रे गत्वा, अभिपूज्य, गृहागताय यथा पूजा विधेया। चकारात् विशेषाभावं च कृत्वा, मुदा हर्षेण कल्पिते अधिवेशने, नतु सहजे उत्कृष्टे। आ ईषत्कल्पिते वा अकल्पिते वा वाटिकादौ स्थापितवान् ॥ १६ ॥

व्याख्यार्थ-विदर्भ देश का राजा विशेष अनभिज्ञ है, अर्थात् साधारण जानकार है उसको लेने के लिए सामने जाकर पूजादि से वैसे सत्कार किया, जैसे घर में आए हुए की पूजा की जाती है। शास्त्रों में कहा है कि घर में जो आवे उसको पूजा करनी चाहिए। "च" का भाव यह है कि साधारण रीति से सत्कार किया। प्रसन्न चित्त से तैयार किए हुए रहने के स्थान पर उनको ठहराया वह सहज वा उत्तम नहीं था, थोड़ा सा सजाया अथवा न भी सजाया हुआ, वा बाग आदि में ठहराया ॥१६॥

आभास—तत्रैव सर्वे दुरात्मान एकीभूता इत्याह तत्र शाल्व इति ।

आभासार्थ—वहाँ सर्व दुष्ट ही इकट्ठे हुए थे, जिनका वर्णन "तत्र शाल्वो" आदि तीन श्लोकों में करते हैं।

श्लोक—तत्र शाल्वो जरासन्धो दन्तवक्रो विदूरथः ।
आजग्मुश्चैद्यपक्षीयाः पौण्ड्रकाद्याः सहस्रशः ॥१७॥
कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुम् ।
यद्यागत्य हरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः ॥१८॥

योत्स्यामः संहतास्तेन इतिनिश्चितमानसाः ।
आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः ॥१९॥

श्लोकार्थ—वहाँ शाल्व, जरासन्ध, दन्तवक्र, विदूरथ, पांड्रक आदि हजारों शिशुपाल के पक्ष के राजा आये। ये राम कृष्ण के बैरी शिशुपाल को कन्या दिलवाने के लिए सज कर आये थे। इन्होंने मनमें निश्चय कर लिया था कि यदि बलभद्र आदि यादवों को साथ लेकर कृष्ण यहाँ आके कन्या हरण करेंगे तो हम सब इकट्ठे हो उनसे लड़ेंगे। इसीलिए वे सब राजा अपनी समग्र सेना और बाहन आदि लेकर आए थे ॥१७-१८-१९॥

सुबोधिनी—विदूरथः दन्तवक्रभ्राता। चत्वारो मुख्या गणिताः। अन्येऽपि चैद्यपक्षीयाः आययुः। पौण्ड्रकाद्याश्च मिथ्यावासुदेवादयोऽपि तत्रैव निविष्टाः। तेषामेकत्र स्थितौ एकं धर्ममाह कृष्णरामद्विष इति। नहि तेषामागमने किञ्चिदन्यत्कृत्यमस्ति। एकाकिनो वयमसमर्थाः, केनचिन्मिषेण भगवान् जेतव्य इति, चैद्ये स्वोपकारं च ख्यापयितुमरिमित्रन्यायेन समागता इत्याह। यत्ताः सन्तः कन्यां चैद्याय साधितुं समागताः। नन्वाहूय कन्या दीयते, कः सन्देह इति चेत्, तत्राह यद्यागत्येति। तेषां हृदये भगवान् तथैव ज्ञापितवान्। कृष्णो हि स्त्रीणां हितकर्तेति। रामाद्यैर्यदुभिः सहागतः यदि हरेत्, तदा योत्स्याम एव, नत्वन्यत् सामर्थ्यमस्तीतिभावः। इत्येवं निश्चितं मानसं येषाम्। अत एव सर्वे समर्थबलवाहनाः सन्तः आजग्मुः। भूभुज इति तेषां सा सम्पत्तिः सहजा ॥१७-१८-१९॥

व्याख्यार्थ—विदुरथ, दन्तवक्र का भाई था, मुख्य जो चार थे, उनकी गणना की है। दूसरे भी शिशुपाल के पक्ष के आए थे। अपने को मिथ्या वासुदेव कहलाने वाले पौण्ड्रक आदि भी वहाँ आए थे। उनके यहाँ आने का कारण यह था, कि वे सब रामकृष्ण के शत्रु थे। उनके आने का अन्य कोई कारण नहीं था, क्योंकि उनको वहाँ कोई दूसरा काम नहीं था। हम सब अकेले तो कृष्ण को जीतने में शक्तिमान नहीं हैं। किसी भी मित्र से मिलकर कृष्ण को जीतना ही है, यों करने से चैद्य पर अपना उपकार भी प्रकट होगा, अतः "अरिमित्रन्याय" से वहाँ आकर पहुँचे। शिशुपाल को कन्या दिलाने के लिए सजकर आए थे। बुलाकर कन्या दी जाती है, इसमें सन्देह क्यों? इसके उत्तर में कहते हैं कि "यदि आगत्य", उनके हृदय में भगवान् ने इसी भाँति जनाया कि यदि राम आदि यादवों से मिलकर कन्या को हरण करने के लिए स्त्रियों का हितकारी श्रीकृष्ण आवे तो हम सब मिल कर उससे लड़ेगे। इसके सिवाय दूसरा कोई सामर्थ्य उनमें नहीं है इसलिए

उन्होंने यही मनमें निश्चय कर रखा था। अतएव सब राजा अपनी सेना और वाहन लेकर आए थे। "भूभुज" विशेषण से बताया कि उनकी यह स्वाभाविक सम्पत्ति है ।।१७, १८।।

आभास—एषा वार्ता सर्वजनीना जातेति ज्ञापयितुं बलभद्रादयो भगवता अनुक्ता अपि समागता इत्याह श्रुत्वैतदिति द्वाभ्याम् ।

आभासार्थ—यह खबर सर्वत्र फैल गई जिसको सुनकर बलभद्र आदि भगवान् के कहे बिना भी आ गए जिसका वर्णन "श्रुत्वा" दो श्लोकों में करते हैं।

श्रुत्वैतद्भगवान् रामो विपक्षीयबलोद्यमम् ।
कृष्णं चैकं गतं हर्तुं कन्यां कलहशङ्कितः ।।२०।।
बलेन महता सार्धं भ्रातृस्नेहपरिप्लुतः ।
त्वरितः कुण्डिनं प्रागाद्गजाश्वरथपत्तिभिः ।।२१।।

श्लोकार्थ—भगवान् राम, चैदी राजाओं का यह उद्यम सुनकर, और श्रीकृष्ण अकेले कन्या को हरण के लिए पधारे हैं यह जानकर कलह होने की शंका से भाई के स्नेह से आर्द्र चित्त हो, बड़ी सेना संग ले हाथी, घोड़े, रथ और पैदलों के साथ तुरन्त कुण्डिनपुर पधारे ।।२०, २१।।

सुबोधिनी—श्रुतस्य सत्यत्वाय भगवानिति। राम इति साधनरूपः विपक्षायाः विपक्षस्य शिशुपालस्य सम्बन्धिनः। तेषां बलस्योद्यमं श्रुत्वा। एक एव च भगवान् कन्यां हर्तुं गत इति कलहे शङ्कां प्राप्तः। कलहो भविष्यतीति निश्चित्य महता बलेन सार्धं त्वरितः कुण्डिनं ययौ। ननु भगवति कः सन्देहो भवेत्, किमिति गत इत्याशङ्क्याह भ्रातृस्नेहेन परिप्लुत इति। लौकिकदृष्ट्या स्नेहेन च गत इत्यर्थः ।।२०।।२१।।

व्याख्यार्थ—"राम" नाम कहने से यह बताया कि वे साधन रूप हैं और "भगवान्" विशेष से जताया कि जो सुना है वह सत्य है, क्योंकि आप भगवान् होने से सत्य और झूठ को जान सकते हैं, शिशुपाल के सम्बन्धी होने से वे विपक्षी अर्थात् शत्रु हैं। उनकी सेना का उद्यम सुनकर भगवान् अकेले कन्या को लेने के लिए गए हैं, इसलिए वहाँ निश्चय युद्ध होने की शंका समझ जबर्दस्त सेना

लेकर तुरन्त कुण्डिनपुर गए। कृष्ण भगवान् हैं, उसके लिए सन्देह क्यों ? जो सन्देह से गए, इसके उत्तर में कहते हैं कि भ्राता के स्नेह से हृदय आर्द्र हो गया था, यह सब लौकिक दृष्टि से और स्नेह प्रकट करने के लिए गए ॥२०, २१॥

आभास—**एवं सर्वसंविधानमुक्त्वा अत्यन्ताकाङ्क्षायामेव भगवान् समायातीति रुक्मिण्याः आकाङ्क्षा निरूपयति भीष्मकन्येति सप्तभिः सार्धैः ।**

आभासार्थ—इसी तरह सब प्रकारसे कह कर, बताते हैं कि भगवान् तव पधारते हैं कि जब अत्यन्त आकांक्षा होती है, इसलिए रुक्मिणी को आकांक्षा का "भीष्मकन्या" श्लोक से साड़े सात श्लोकों से वर्णन करते हैं।

श्लोक—**भीष्मकन्या वरारोहा काङ्क्षन्त्यागमनं हरेः ।**
प्रत्यापत्तिमपश्यन्ती द्विजस्याचिन्तयत्तदा ॥२२॥

श्लोकार्थ—वरारोह भीष्मक राजा की कन्या हरि के आगमन की राह देखती थी, भेजे हुए ब्राह्मण को जब लौटता हुआ न देखा तब चिन्ता करने लगी ॥२३॥

सुबोधिनी—भीष्मकन्येति न स्वातन्त्र्येण स्थातुं शक्नोति। स हि पिता भयानकः, कन्या चास्वतन्त्रा, कन्यात्वादेव लोकाविगानम्। वरारोहेति भोगयोग्यावस्था निरूपिता। तेन दानसमनन्तरमेव सर्वनाशः सूचितः। अतोऽतिदुःखिता उपायान्तरमलभमाना हरेरेव सर्वदुःखहर्तुः आगमनं काङ्क्षन्ती जाता। ततः स्वस्य प्रत्यापत्तिमपश्यन्ती तदा द्विजस्य, द्विजमचिन्तयत्। द्विजस्य वा प्रत्यापत्तिम्। प्रत्यापत्तिर्नाम स्थानात्प्रच्युतस्य पुनः स्वस्थानागमनम्। स्वयमपि भगवतः सकाशात् प्रच्युता, पुनर्भगवत्प्राप्तिमलभमाना, प्रापकं द्विजमेवाचिन्तयत् ॥२२॥

व्याख्यार्थ—रुक्मिणी भीष्मक राजा की कन्या है, इससे स्वतन्त्र रह नहीं सकती है। कारण कि वह पिता भयानक है और कन्या स्वतन्त्र हो नहीं सकती है। कन्यापन से ही लोक में निन्दा नहीं है, "वरारोहा" विशेषण से रुक्मिणी अवश्य भोग योग्य बताई है, अतः यदि शिशुपाल को मैं दी गई तो उसी समय मेरा सर्वनाश हो जायगा। इससे बहुत दुःखी हुई, दुःख मिटाने का कोई दूसरा उपाय न देखकर सर्व दुःखों के हरण करने वाले हरि का आगमन ही चाहने लगी। पश्चात् भेजे हुए अपने ब्राह्मण को लौटता न देख, उसका ही चिन्तन करने लगी कि वह अब तक क्यों नहीं लौटा

है ? स्वयं भी भगवान् के पास झुकी फिर भगवान् को प्राप्ति न होने से भगवान् के पास पहुँचने वाले ब्राह्मण का चिन्तन करने लगी ॥२२॥

आभास—तस्याश्चिन्तामाह अहो इति सार्धैस्त्रिभिः गुणेभ्योऽप्यधिकेति ख्यापयितुम् ।

आभासार्थ—उसकी चिन्ता गुणों से भी अधिक है यों प्रसिद्ध करने के लिए "अहो" इति इन साढ़े तीन श्लोकों में कहते हैं ।

श्लोक—**अहो त्रियामान्तरित उद्वाहो मेऽल्पराधसः ।**
नागच्छत्यरविन्दाक्षो नाहं वेद्म्यत्र कारणम् ।
सोऽपि नावर्ततेऽद्यापि मत्सन्देशहरो द्विजः ॥२३॥
अपि मय्यनवद्यात्मा दृष्ट्वा किञ्चिज्जुगुप्सितम् ।
मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः ॥२४॥

श्लोकार्थ—मुझ मन्द भागिन के विवाह में केवल एक रात्रि ही बाकी है । कमल-नयन भगवान् तो अब तक नहीं पधारे है इसका क्या कारण है, यह मैं समझ नहीं सकती हूँ, जो ब्राह्मण मेरा सन्देश लेकर गया था वह भी अब तक लौट कर नहीं आ रहा, जिनने मेरे लिए पहिले उद्यम किए वे निर्दोष भगवान् क्या मुझ में कोई दोष देख कर मेरा पाणिग्रहण करने के लिए नहीं आते हैं ? ॥२३-२४॥

सुबोधिनी—त्रियामा रात्रिः, तयैवान्तरित उद्वाहः एकैव रात्रिर्मध्ये वर्तत इत्यर्थः । त्रियामात्वेनाल्पकालता सूचिता । अतोऽग्रिमदिवसे महाप्रलय एवेति चिन्ता । अल्पराधस इति अल्पसिद्धियुक्तायाः । भाग्यसिद्धिश्चेत् महती भवेत्, तदा शीघ्रमेवेष्टसिद्धिः । सन्देहादल्पवचनम् । चिन्तायां द्वितीयां कोटिमाह नागच्छत्यरविन्दाक्ष इति । दृष्ट्यैव तापनाशकः । अत्र कारणमहं न वेद्मि । नन्वागमनसमयो न जातः किमिति चिन्त्यत इति चेत्, तत्राह सोऽपि नावर्तत इति । आगच्छतीति ज्ञाते चिन्ता न भवेत् । आगमनकालश्च सन्निहितः । तत एकतरनिश्चये अस्वास्थ्यं वा उत्पाद्यं भवति । येन श्वो विवाहो न भवेत् । अपिशब्दादन्यो वा भगवता प्रेषितः स्यात्तेनापि वा । अद्यापीति सन्निहितः समयः । ननु ब्राह्मणाः क्वचित्तपः करिष्यन्ति, को नियमस्तेषामागमन इति चेत्, तत्राह मत्सन्देशहर इति । सन्देशं यो नयति, तत्रापि द्विजः

सत्यवादी। द्वितीयं जन्म सत्यार्थमेवेति। तत्र स्वयमेव हेतुं कल्पयति। अपीति सम्भावनायाम्। भगवाननवद्यात्मा किञ्चिद्भ्रातृपक्षपातलक्षणं जुगुप्सितं दृष्ट्वा, तत्कारणभूतं पूर्वजन्मस्थितं वा मत्पाणिग्रहणे प्रथमत उद्यमं कृत्वापि, ब्राह्मणमपि स्थापयित्वा सङ्गेनेष्यामीति पश्चान्नागतः। ततो ब्राह्मणोऽपि शीघ्रमागन्तुमसमर्थः नागत इति तदाह। मत्पाणिग्रहणे कृतोद्यमोऽपि नूनं नायाति ॥२३-२४॥

व्याख्यार्थ—रात्रि तीन पहर रहती है, विवाह में बाकी इतना ही समय रहा है, अर्थात् विवाह होने के बीच में एक ही रात्रि शेष है। रात्रि तीन पहर की कहने से यह बताया कि विवाह में बाकी थोड़ा समय है, अतः कलके दिन मेरे लिए महाप्रलय ही होने वाला है, इससे चिन्ता हो रही है। मैं अभागिन हूँ, यदि अच्छा भाग्य होता या बड़भागिनि ही होती तो शीघ्र ही मेरे मन की कामना पूर्ण होती। निश्चय न होने से थोड़े ही वचन कहे हैं। चिन्ता होने का दूसरा कारण बताती है कि कमल नेत्र भगवान् नहीं आए हैं, वे तो दृष्टि मात्र से ताप को नाश करने वाले हैं। उनके न आने का कारण मैं समझ नहीं सकती हूँ। जब तक आने का समय नहीं हुआ है तो चिन्ता क्यों करती है? इसके उत्तर में कहती है, कि भेजा हुआ ब्राह्मण भी नहीं लौटा है, यदि यह मालूम हो जाय कि आ रहे हैं तो चिन्ता न हो आने का समय तो निकट ही है, इससे एक बात का निश्चय हो जाय तो अस्वस्थता वा निश्चितता हो जाय कि कल विवाह न होगा। "अपि" शब्द के आशय को प्रकट करते हुए कहते हैं, कि भगवान् ने कोई दूसरा भेज दिया हो, उससे भी विवाह रुक जावे। "अद्यापि" अब तक शब्द कहने का भाव है कि समय निकट है ब्राह्मण है, वे कदाचित् तपस्या करते होंगे, अतः उनके आने का कोई नियम नहीं है यदि यों कहे तो इस पर कहती है कि वह ब्राह्मण 'मत्सन्देशहर" मेरा सन्देश ले जाने वाला है। जो केवल सन्देश ले जाता है वह भी सत्यवक्ता होता है। यह तो ब्राह्मण है, इससे निश्चय सत्यवादी है। सत्य के लिए ही द्वितीय जन्म है, उस विषय में स्वयं ही हेतु की कल्पना करता है कि हो सकता है कि शुद्ध अन्तःकरण वाले निर्दोष भगवान् ने यहाँ कुछ भ्राता के पक्षपात वाला निन्दित कार्य देखा है, जिस कारण से वा पूर्व जन्म का कोई कारण है उससे मेरे पाणिग्रहण का पहले उद्यम करके भी और ब्राह्मण को भी रोक कर कि साथ में ले जाऊँगा, इस प्रकार निश्चय कर फिर नहीं आए। इस कारण से ब्राह्मण भी शीघ्र आने में असमर्थ आ है, अतः ब्राह्मण भी नहीं आया है, यह भाव "कृतोद्यम" पद से प्रकट किया है ॥२३-२४॥

आभास—ननु सदुष्टा अपि केचन परिगृह्यन्ते, न हि सर्वथा निर्दुष्टा भवन्ति। तथा सति कस्यापि परिग्रहो न स्यात्, इति चेत्। सत्यम्। तत्र अदृष्टादिकं प्रेरकं सम्पद्यते। मम तु तस्याप्यभाव इत्याह दुर्भगाया इति।

आभासार्थ—कई कन्याओं से दोष वाले पति भी ग्रहण किए जाते हैं। कोई सर्व प्रकार दोष रहित नहीं होता है। यदि निर्दोष ही पति चाहिए तो किसी का भी पाणिग्रहण हो नहीं सकता है। यदि यों कहते हो तो सत्य है, किन्तु इस प्रकार सदोष पति की प्राप्ति में अदृष्ट आदि प्रेरक होते हैं, मेरे लिए उसका भी अभाव है, यों "दुर्भगाया" श्लोक में कहती है।

श्लोक—**दुर्भगाया न मे धाता नानुकूलो महेश्वरः।**
देवी वा विमुखा गौरी रुद्राणी गिरिशा सती ॥२५॥

श्लोकार्थ—अभागिन मुझ पर क्या ब्रह्मा, महादेव मेरे अनुकूल नहीं है? गिरिजा, सती, रुद्राणी और देवी पार्वती भी रूठी है ॥२५॥

सुबोधिनी—पतिस्तु कृष्ण एव। अनागमने यथाकथञ्चित् भ्रान्तापि भूत्वा तत्र गमिष्यामि, यतो ब्रह्मा, पतित्वेन भगवन्तमेव विचारितवान्, परं दुर्भगा भविष्यामि। अतो दुर्भगात्वसम्पादकभाग्यस्य विद्यमानत्वात् धातापि नानुकूलो जातः। आनुकूल्ये तु इदानीमेव भगवानागच्छेत्। अतो दुर्भगात्वमपि न भवेत्। ननु सौभाग्य शिवाधीन पार्वत्यधीनं वा, तत्राह नानुकूलो महेश्वर इति। देवतारूपा दुर्गा वा विमुख। अनाराधनात्। सा हि गौरी गुरो पत्नी, गुरुरुपदिशति, तच्छक्तिर्भाग्यं सम्पादयतीति, तमेव सम्बन्धं प्रकयटति रुद्राणीति। रुद्रो हि गुरुः, स्वयमपि गिरिशा। सतीति पातिव्रत्यबलमपि तस्याः सूचितम् ॥२५॥

व्याख्यार्थ—पति तो कृष्ण ही है, वे नहीं पधारे है इस विषय में जैसे तैसे भ्रान्त भी होकर वहाँ जाऊँगी, क्योंकि ब्रह्मा ने मेरा पति भगवान् ही हो वैसा विचार किया है किन्तु अभागिन बनूंगी, जो कृष्ण पति न होंगे, अतः दुर्भागिनी बनाने वाले भाग्य के होने से ब्रह्मा भी अनुकूल नहीं है, यों भासता है यदि ब्रह्मा अनुकूल हो तो भगवान् अब ही पधारने चाहिए, यदि यों अब पधारे तो दुर्भागिनी देखने में न आये। यदि कहो कि सौभाग्य तो महादेव और पार्वती के हाथ में है, तो महादेव और देवता रूप दुर्गा भी अनुकूल नहीं है, क्योंकि मैंने उनकी आराधना नहीं की है, इसलिए वे भी अनुकूल नहीं है। वह दुर्गा गौरी है, अर्थात् गुरु की पत्नी है गुरु उपदेश देते हैं, उनकी शक्ति भाग्य का सम्पादन करती है अर्थात् भाग्य बनाती है। उसी सम्बन्ध को रुद्राणी प्रकट करती है, रुद्र गुरु हैं, आप भी गिरिशा "जा" है और सती हैं, सती कहने से यह बताया है कि इसमें पतिव्रत बल भी है ॥२५॥

आभास—एवं चिन्तया कियति काले अतीते चिन्ताधिक्ये उत्पत्स्यमाने मध्ये तद्विघातकं शकुनं जातमित्याह एवं चिन्तयतीति ।

आभासार्थ—इस प्रकार जब चिन्ता करते हुए कुछ काल बीता और चिन्ता बढ़ने लगी, तब बीच में चिन्ता को नाश करने वाले शकुन हुए, जिनका वर्णन किया जाता है !

श्लोक—एवं चिन्तयती बाला गोविन्दहृतमानसा ।
न्यमीलयत कालज्ञा नेत्रे चाश्रुकलाकुले ॥२६॥

श्लोकार्थ—भगवान् ने जिसका मन हर लिया है, वैसी समय को पहिचानने वाली बाला इस प्रकार चिन्ता करने से आँसुओं से पूर्णनेत्रा हो गई और उसने नेत्र मूंद लिए ॥२६॥

सुबोधिनी—बाला मुग्धा । तत्रापि गोविन्देन हृतमानसा । विह्वला सती, रोदने प्रादुर्भूते कृतमङ्गलायाः तदनुचितमिति अश्रुकलाकुले नेत्रे अमीलयत् । नन्वेतादृशेर्थे रोदनमुचितं तत्कथं निमीलनमिति चेत्, तत्राह कालज्ञेति । सा ह्ययं शुभकाल इति जानाति, ग्रहानुगुण्यात् । अतो भगवानेवायास्यतीति निश्चित्य तथा कृतवतीत्यर्थः ॥२६॥

व्याख्यार्थ—बाला कहने का भावार्थ यह है कि रुक्मिणी उस समय १६ वर्ष की हो गई थी, अतः मुग्धा[1] है । ऐसी अवस्था में फिर भगवान् ने मन हरण कर लिया है, जिससे व्याकुल हो गई, अतः रोदन आने लगा, किन्तु मंगल कृत्य हुआ है, उसको रोना उचित नहीं है । इसलिए आँसुओं से पूर्ण नेत्रों को मूंद लिए, वैसी अवस्था में तो रोना ही आना चाहिए सो नेत्र कैसे बन्द कर दिए ? जो कहो तो उसका उत्तर यह है कि "कालज्ञा" समय को पहचानती है । यह शुभ समय है, इसमें रुदन नहीं करना चाहिए । ग्रहों के अनुकूल होने से भगवान् अवश्य पधारेंगे, यह निश्चय कर वैसे किया अर्थात् नेत्र मूंद लिए ॥२६॥

आभास—किञ्च ।न केवलं कालज्ञानेनैव तूष्णी स्थिता, किन्त्ववयवस्फुरणेन शकुनमपि प्राप्तवतीत्याह एवं बध्वा इति ।

१—जो युवा अवस्था को प्राप्त हो गई है ।

आभासार्थ—और विशेष केवल कालज्ञान से ही नेत्र मूंद कर मौन नहीं हुई किन्तु अवयवों के फरकने से सकुन भी हुए जिससे मौन हो गई जिसका वर्णन "एवं वध्वा" श्लोक में किया है ।

श्लोक—एवं वध्वा: प्रतीक्षन्त्या गोविन्दागमनं नृप ।
वाम ऊरुर्भुजो नेत्रमस्फुरन्प्रियभाषिण: ॥२७॥

श्लोकार्थ—हे नृप ! इस प्रकार गोविन्द के आने की प्रतीक्षा[1] करती हुई वधू के शुभ सूचक बायें तीन अंग उरु[2], भुजा और नेत्र फरकने लगे ॥२७॥

सुबोधिनी—वधूर्विवाहसमयस्था, सर्वतो रक्षायुक्ता वा । गोविन्दागमन प्रतीक्षन्त्या: । वाम ऊरुर्भुज इति । वामे ऊरु: भुज: नेत्रं चास्फुरन् । वामे अङ्गे ऊर्वादित्रयस्फुरणं स्त्रीणां शुभसूचकम् । प्रियभाषिण इति त्रयाणां विशेषणम् । शुभसूचका इत्यर्थ: । अन्यतरस्यामिति नपुंस (कै) कशेषो न भवति । अथवा । प्रियभाषिण: सम्बन्धीनि एतानीति प्रियं श्रोष्यामीति भाव: ॥२७॥

व्यायाख्यं—"वधू" शब्द से यह प्रकट किया है कि विवाह करने के योग्य है एवं यह विवाह का शुभ समय है अथवा चारों ओर से उसकी रक्षा हो रही है । वैसी गोविन्द के आने की बाटजोही कर रही थी, तो उस समय ही उसके बाँए तीन अंग उरु, भुजा और नेत्र फरकने लगे । यह शकुन स्त्रियों के लिए शुभसूचक है । जिसके लिए "प्रिय भाषिण:' पद दिया है । यह प्रत्येक अंग का विशेषण समझना चाहिए । व्याकरण के अनुसार नपुंसक में "अन्यतरस्याम्" इस वाक्य से एक शेष समास नहीं हुआ है, अथवा ये शुभ की सूचना देने वाले सम्बन्धी हैं, अत: "शुभ" सुनूँगी ॥२७॥

आभास—**ततस्तदनन्तरमेव ब्राह्मण: समागत इत्याह अथेति ।**

आभासार्थ—यों होने के पश्चात् शीघ्र ही ब्राह्मण आ गया, जिसका वर्णन "अथ" श्लोक में करते हैं ।

श्लोक—**अथ कृष्णविनिर्दिष्ट: स एव द्विजसत्तम: ।**
अन्त:पुरचरीं देवीं राजपुत्रीं ददर्श ह ॥२८॥

१—बाटजोही २—घुटनों से ऊपर का भाग-जंघा

श्लोकार्थ—इतने में ही तो श्रीकृष्ण का भेजा हुआ वही ब्राह्मण आ पहुँचा और अन्तःपुर में विराजती हुई देवी राजपुत्री को देखा ।।२८।।

सुबोधिनी—तस्य तत्समय एव समागमनं काकतालीयं चेत्, तदा भगवदर्थमेव तस्या आकाङ्क्षा निरूपितेति न स्यात्, अतस्तद्व्यावृत्त्यर्थं भगवानेव तस्मिन्समये 'ये त्यक्तलोकधर्माश्च मदथ' इति वाक्यात् प्रेषितवानित्याह कृष्णविनिर्दिष्ट इति । तद्विनिश्चयादुभयविधादपि विशेषेण समागत इति । भिन्नप्रक्रमोऽप्यथशब्दः भगवतैव तथा कृत इति ज्ञापनार्थः । द्विजसत्तम इति । अत्यन्तमन्तरङ्गो भगवद्भक्तः । अतस्तेन सवतापनिवृत्तिर्युक्तैव । द्विज एव मित्रम्, तत्रापि सन्देशहारी विशिष्टः, तत्रापि तत्र गतो भगवत्सख्यं प्राप्तः सत्तमो भवति । अत एवान्तःपुरचरीमपि राजपुत्रीमपि स्वयमेव ददर्श । भगवच्चिन्तनाद्देवतैव तदावेशनाज्जाता । यथा ब्राह्मणे धर्मत्रयम्, तथा तस्यामपि । आध्यात्मिकादिधर्मत्रयं वक्तुं विशेषणत्रयम् । हेत्याश्चर्ये ।।२८।।

व्याख्यार्थ—उसका उस समय ही आ पहुँचना जो काकतालीय न्याय की तरह हुआ हो तो उस समय भगवान् के लिए ही उसकी जो आकांक्षा वर्णन की जाती है, अतः उसके निवारण के लिए कहते हैं कि भगवान् ने ही "ये त्यक्तलोकधर्मश्च मदर्थे" इस वाक्य के अनुसार उस ब्राह्मण को भेजा है, इसलिए श्लोक में "कृष्णविनिर्दिष्टः" कृष्ण का भेजा हुआ कहकर यह सिद्ध किया है कि ब्राह्मण का उस समय आना काकतालीय न्याय से नहीं हुआ है, दोनों प्रकार के उनके निश्चय हो जाने से ही विशेष प्रकार से आया । "अथ" शब्द यह प्रसंग पृथक् है, यह दिखाने के लिए भी है अर्थात् भगवान् ने ही वैसे किया है यह जताने के लिए "द्विजसत्तमः" ब्राह्मण को द्विज न कह कर "द्विजसत्तमः" कहा, जिसका आशय स्पष्ट करते है कि अत्यन्त अन्तरंग भक्त है, अतः वैसे ब्राह्मण से ताप की निवृति होनी योग्य ही है । केवल "द्विज" भी मित्र होता है, उसमें भी यदि संदेश ले जाने वाला हो तो विशेष हितकारी होता है । उसमें भी द्वारका गया, वहाँ भगवान् की प्रीति प्राप्त की, इसलिए यह सत्तम है । सारांश कि अब यह "द्विजसत्तम" है, इस कारण से ही अन्तःपुर में ही विचरने वाली राज पुत्री को स्वयं ही देखा । "देवी" क्यों हुई ? भगवान् के चिन्तन करने से भगवदावेश से "देवी" बन गई । जैसे ब्राह्मण में तीन धर्म हैं वैसे इसमें भी, आध्यात्मिक, आधिभौतिक और आधिदैविक इन तीन धर्मों को करने के लिए ही तीन विशेषण कहे हैं । "ह" शब्द आश्चर्य वाचक है ।।२८।।

आभास—ततो यज्जातं तदाह सा तमिति ।

आभासार्थ—इसके बाद जो कुछ हुआ वह "सा तं" श्लोक में कहते हैं ।

श्लोक—सा तं प्रहृष्टवदनमव्यग्रात्मगतिं सती ।
आलक्ष्य लक्षणाभिज्ञा समपृच्छच्छुचिस्मिता ॥२९॥

श्लोकार्थ—धीरे धीरे चले आते प्रसन्न मुख ब्राह्मण को देख, लक्षण से ही समझने वाली मन्द हसती हुई वह सती रुक्मिणी उससे पूछने लगी ॥२९॥

सुबोधिनी—कुत्र मानसचिन्तनम्, कुत्र पदार्थोपस्थितिरिति, तादृशं दुर्लभमिव सा तं दृष्ट्वा समपृच्छत् । नन्विङ्गितज्ञानेनैव कथं न निश्चयः, तत्राह प्रहृष्टवदनमिति । ब्राह्मणे धर्मद्वयं दृष्ट्वा विवाहस्वीकारः समागमनं च लक्षितवती । मुखहर्षात्स्वीकारः, शनैरागमनात्कर्तव्यान्तराभावसूचकं समागमनमिति । तस्या अपि लक्षणज्ञाने हेतुद्वयमाह सती लक्षणाभिज्ञेति । पातिव्रत्यधर्मेण शास्त्रानुसारेणापि ज्ञानम् । तर्कितमेतन्न प्रमितमिति प्रमानिरूपणार्थे आलक्ष्यापि समपृच्छत् । शुद्धं स्मितमिति हर्षात् मन्दहासः । स च ब्राह्मणं प्रति शुद्ध एव । अथवा । इष्टपूरणात् लौकिकवत् स्मितं भविष्यतीति तद्व्यावृत्त्यर्थं शुद्धता निरूपिता ॥२९॥

व्याख्यार्थ – कहाँ मन से पदार्थ का चिन्तन करना और कहाँ उस पदार्थ का वहाँ प्राप्त हो जाना । यों होना दुर्लभ जैसा समझ और वह हो गया है उसको देख कर पूछने लगी, इंगित के (सकेत के) ज्ञान से ही क्यों न निश्चय कर लिया ? इसके उत्तर में कहा गया है कि ब्राह्मण के इंगितों से उसमें दो धर्म देखे । एक प्रसन्न मुख था, जिससे जान लिया कि विवाह की स्वीकृति भगवान् ने दे दी है, और दूसरा वह स्वस्थ होकर धीरे धीरे आ रहा था, जिससे समझ लिया कि भगवान् भी पधार रहे हैं । केवल इंगित से इसने कैसे समझ लिया इसका समाधान यह किया है कि इसमें भी दो धर्म हैं । १–सती अर्थात् पतिव्रता है । पातिव्रत्यधर्म और दूसरा शास्त्रों से लक्षणों का ज्ञान इन दो धर्मों से इसने जान लिया है । यह तर्क से जाना है, तर्क से जाना हुआ पूरा प्रामाणिक ज्ञान नहीं माना जाता है, अतः इस प्रकार जान कर भी फिर पूछने लगी, मन्द हास कर ब्राह्मण में अपना शुद्ध भाव प्रकट करने लगी अथवा केवल (स्मित) मन्दहास वाचक शब्द न देकर जो साथ में (शुचि) शुद्धता वाचक विशेषण दिया है, जिसका आशय है कि इसका यह मन्द हास अपने मनोरथ पूर्ण होने से लौकिक की तरह नहीं है ॥२९॥

आभास—**ततो ब्राह्मणस्य वचनद्वयमाह तस्या आवेदयदिति ।**

आभासार्थ—इसके बाद ब्राह्मण के दो वचन 'तस्या' श्लोक से कहते हैं ।

श्लोक—तस्या आवेदयत्प्राप्तं सरामं यदुनन्दनम् ।
उक्तं च सत्यवचनमात्मोपनयनं प्रति ॥३०॥

श्लोकार्थ--ब्राह्मण ने उसको पूरी तरह जतलाया कि भगवान् बलरामजी सहित आ पहुँचे हैं, और आपका पाणिग्रहण करेंगे तथा अपने साथ ले जाएँगे, ये वचन परिहास से नहीं कहे हैं, किन्तु सत्य कहे हैं ॥३०॥

सुबोधिनी—प्राप्तं भगवन्तमावेदयत् । अन्यार्थमप्यागमनं सम्भवतीति तन्निवृत्त्यर्थं उक्तं च आवेदयत् । सराममिति कलहेऽपि शङ्काभावाय तन्मनोरथपूर्त्यै च । यदुनन्दनमिति तथा करणे भक्तकृपालुत्वं हेतुरुक्तः । यो हि पितुराज्ञोल्लङ्घनकर्तारं भक्तत्वाद्यदुमानन्दयति, तेनैव भावेन त्वामप्यानन्दयति । 'स्त्रीषु नर्मविवाहे चे'ति वाक्यात् कदाचिदसत्यमपि वदेत्, तद्व्यावृत्त्यर्थमाह सत्यवचनमिति । चकारात्स्वाभिप्रायनिवेदनमपि यद्भगवता कृतं तदप्युक्तवान्, न केवलमुद्वाहार्थम्, किन्तु उपनयनं प्रति समीपे नेष्यामीति यथाभिलषितसिद्धिः । उपगमनपदेऽपि स एवार्थः ॥३०॥

व्याख्यार्थ—भगवान् पधार गए हैं, ऐसा निवेदन किया, पधारना तो दूसरे काम के लिए भी हो सकता है ? इस भ्रम को मिटाने के लिए केवल "प्राप्त" न कह कर "आवेदयत्" शब्द भी दिया है । जिसका भावार्थ है कि तुम्हारे लिए ही पधारे हैं और अकेले भी नहीं हैं, बलरामजी भी आ गए हैं । जिससे यह बताया कि कलह होगा ऐसी शका भी मत करो, क्योंकि रामजी उसको टाल देंगे, जिससे आपका कार्य हो जायगा । भगवान् का मनोरथ भी पूर्ण हो जायगा । भगवान् का नाम "यदुनन्दन" दिया है, जिसका आशय है कि जो भगवान् पिता की आज्ञा का उल्लघन करने वाले यदु को भक्त होने के कारण आनन्द देते हैं वे उसी भाव से आपको भी आनन्द देते हैं । उसी प्रकार करने में भक्त पर कृपालुपन का कारण है । "स्त्रीषु नर्मविवाहे" इस उक्ति के अनुसार किसी समय ऐसी बात में झूठ भी बोल जाता है, इसलिए कहता है कि यह परिहास[1] वा झूठ नहीं है, किन्तु सत्य वचन है । "च" शब्द से भगवान् ने जो अभिप्राय प्रकट किया था वह कह कर बता दिया । भगवान् केवल विवाह के लिए नहीं आए हैं, किन्तु अपने साथ उसको ले जाऊँगा जिससे उसकी अभिलाषा पूर्ण हो, इसलिए भी पधारे हैं । "उपगमन"[2] पद में भी यही अर्थ समाया हुआ है ॥३०॥

आभास—ततः पूर्णमनोरथा तस्मै वरं दत्तवतीत्याह तमागतमिति ।

आभासार्थ—मनोरथ पूर्ण देख उस ब्राह्मण को "तमागतं" श्लोक में वर्णन किया हुआ "अभीष्ट" देने लगी ।

१—मज़ाक वा ठठ्ठा, २—मूल में "उपनयन" पद है टीका में उपगमन है ।

श्लोक—तमागतं समाज्ञाय वैदर्भी हृष्टमानसा ।
न पश्यन्ती ब्राह्मणाय प्रियमन्यन्ननाम सा ॥३१॥

श्लोकार्थ—उनको ले आया है यह जानकर रुक्मिणी प्रसन्न हुई ब्राह्मण को देने के लिए नमन से प्रिय अन्य कोइ वस्तु नहीं देखी, अतः नमस्कार ही किया ॥३१॥

सुबोधिनी—भगवति समागते स्वयं भगवदीयैवेति सर्वं भगवते समर्पितमिति वैदर्भीत्वादेव न कर्म ब्राह्मणस्य सफलं करिष्यति । हृष्टमानसेति स्वार्थं न किञ्चित्प्रार्थितवती, येन किञ्चिद्दत्वापि तुष्टो भवेत् । मोक्षदातारमपि यो दत्तवान्, तस्मै किं देयमिति वैभवमपि न देयमित्यहा ब्राह्मणायेति । अत एवान्यत्प्रियं नास्तीति सा ननाम । नमोनम इत्येतावत्सदुपशिक्षितमिति । यत्र न कोऽपि प्रतीकारः, तत्र नमस्कार इति । भगवांश्च ब्रह्मण्यदेव इति ब्राह्मणनमस्कारो भगवद्भार्यया युक्त एव । अनेन देयाभावे सर्वत्रैवमेव कर्तव्यमिति साधनं निरूपितम्॥३१

व्याख्यार्थ—रुक्मिणी स्वयं भगवान् को ही है, इसलिए भगवान् के पधार जाने पर जो कुछ उसके पास था वह सब भगवान् को अपण कर दिया । विदर्भदेश में उत्पन्न होने से ब्राह्मण का कर्म सफल न कर सकेगी, भगवान् के पधारने से प्रसन्न चित्त हो गई, जिससे अपने लिए कुछ भी प्रार्थना नहीं की जो चाहती थी वह परमानन्द सत्य द्रव्य प्राप्त हो गया । उसके मिलने वाले ब्राह्मण को कुछ दे कर प्रसन्न करे, ऐसो कोई वस्तु नहीं देखो, कारण कि जिस ब्राह्मण ने मोक्ष देने वाले को दिए हैं, उसको क्या दिया जावे ? वैभव दो, तो कहती है कि वैभव भी नहीं दिया जा सकता है, कारण कि यह ब्राह्मण है, इसको वैभव की आवश्यकता नहीं है, क्योंकि ब्राह्मणों का वैभव तप है । उसमें भो यह द्विज सत्तम होने से भक्त भी है, इसलिए धनादि देना व्यर्थ है । इस कारण से नमस्कार के सिवाय दूसरा कोई भी पदार्थ ब्राह्मण को प्रिय नहीं है इसलिए उसने ब्राह्मण को नमस्कार ही किया । "नमो नमः" से सदुपदेश दिया । जहां कोई भी बदला नहीं दिया जा सकता हो वहाँ "नमस्कार" ही प्रतीकार है । भगवान् स्वयं ब्राह्मण्य देव हैं, इसलिए भगवान् की पत्नी ब्राह्मण को नमस्कार करे, यह योग्य ही है, इससे यह शिक्षा दी कि जब देने की वस्तु का अभाव होवे तब सर्वत्र इस प्रकार ही "नमो नमः" करना योग्य है, यह साधन निरूपण किया है ॥३१॥

आभास—**भगवान् नगरमध्ये समागतः, ब्राह्मणोऽन्तःपुरे । ततस्समागतयोः विवाहात्पूर्वकर्तव्यं वक्तव्यमिति, पितुरदाने हरणं वा युक्तमिति, प्रसह्य हरणेऽपि मातापित्रोर्दानमावश्यकमिति, अन्यथा न धर्म्यः स्यादिति पितुर्दानार्थं गोप्यार्थं च तादृशीं कथामाह प्राप्तो श्रुत्वेति त्रिभिः ।**

आभासार्थ--भगवान् तो नगर में पधारे और ब्राह्मण अन्तःपुर में भीतर गया। उसके पश्चात् आए हुए दोनों का विवाह से प्रथम कर्तव्य है वह कहना चाहिए। पिता विवाह कराके न देवे तो हरण करना योग्य हैं, किन्तु बलात्कार से हरण करने में भी माता पिता का दान करना आवश्यक है नहीं तो वह विवाह धर्म युक्त नहीं माना जाएगा, इसलिए पिता के दान को गुप्त रखने के लिए वैसी कथा 'प्राप्तौ श्रुत्वा'' श्लोक से तीन श्लोकों में वर्णन करते हैं।

श्लोक—प्राप्तौ श्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ।
अभ्ययात्तूर्यघोषेण रामकृष्णौ समर्हणः ॥३२॥
मधुपर्कमुपानीय वासांसि विरजानि सः।
उपायनान्यभीष्टानि विधिवत्समपूजयत् ॥३३॥

श्लोकार्थ—अपनी कन्या के विवाहोत्सव देखने के उत्सुक होने से दोनों भ्राताओं का आना सुनकर राजा भीष्म पूजा की सामग्री लेकर बाजे-गाजे के साथ सामने सत्कार करने के लिए आए और साथ में मधुपर्क, शुद्ध वस्त्र भी ले आये थे। विधि के अनुसार पूजन कर वस्त्रादि दे कर उन्हें सुशोभित किये॥३२-३३॥

सुबोधिनी—स्वदुहितुरुद्वाप्रेक्षणे सम्बन्धित्वादुत्सुकौ समागताविति लोके भ्रममुत्पाद्य स्वयं दातुमेवागतः। स्वदुहितुः एतौ प्रकर्षेणाप्तौ, एकः पतिरपरो भावुक इति। एकस्तूद्वाहोत्सुकः, अपरः प्रेक्षणोत्सुक इति। अत एव अनाकारितावप्यागतौ। लोकेऽप्युत्सुकानां नाकारणम्। तथाप्यग्रिमकृत्यं कर्तव्यमिति तूर्यघोषेण समर्हणः सह आभिमुख्येन गतः। शिशुपाले तु 'तं वै विदर्भाधिपति'रिति अग्रे सर्वेषामेव वक्ष्यति। मध्ये तु भगवतो विशेषाकारेण यथा वराय क्रियते। गमन एव वाद्यसहितः वरपूजार्थं सम्पादितद्रव्यैः सह। ततो मधुपर्कानयनम्। ततो विरजानि वासांसि। विरजानीति शोभार्थं दानव्यतिरेक उक्तः। अन्येभ्यस्तु स्वख्यापनार्थं राजसगुणाद्दीयत इति वस्त्राण्यविरजान्येव भवन्ति। नूतनानि तु प्रक्षालितानि सर्वेभ्य एव दीयन्त इति विशेषणं व्यर्थं स्यात्। अथवा। कन्यां दातुं आदौ अखण्डानि शुद्धान्येव वस्त्राणि दत्तवान्। यदप्यग्रे देयम्, तदपि दत्तवानित्याह उपायनानीति। अभीष्टानि वरवध्वोः। विधिवदिति यथाविवाहविधि ॥३३॥

व्याख्यार्थ—अपनी पुत्री के विवाहोत्सव के सम्बन्धी होने से देखने के लिए उत्सुक थे, अतः आये हैं। इस प्रकार लोक में भ्रम पैदा कर स्वयं भीष्मक कन्या देने के लिये आया। ये दो राम कृष्ण जो आये हैं, उनमें से एक श्रीकृष्ण पति हैं और दूसरा राम भावुक है। कृष्ण विवाह का उत्सुक होने से पति है और राम उत्सव देखने का उत्सुक होने भावुक से है। इस कारण से ही बिना

बुलाये भी आये हैं। लोक में भी जिनको प्यारी वस्तु को पाने या देखने की लालसा होती है, तो भी आगे जो कार्य करना है वह करना ही चाहिए। यह चित्त में निश्चय कर बाजे–गाजे के साथ पूजा का सामान लेकर सामने आया। शिशुपाल के आने पर तो "तं वै विदर्भाधिपति" इस श्लोक में कहे अनुसार सामने गया। पश्चात् सामना करने पर सम्मुख आये हुए की जैसी पूजा जिस प्रकार ठहराना आदि वैसे आगे सबों का ही कहेगा, बीच में तो भगवान् की विशेष रूप से जैसे वर (दुलहा) की की जाती है, वैसे करने लगा। भीष्मक सत्कार करने के लिए जब जाने लगा तब बाजे वगेरे (वाद्य साज) साथ में ले चला तथा वर को पूजा के लिए जिन द्रव्यों को आवश्यकता उस समय होती हैं, वे सब तैयार कर साथ में लिए थे। वहाँ पहुँचने के बाद पूजा के प्रारम्भ में मधुपर्क मंगाया। पश्चात् भगवान् को वस्त्रों से सुशोभित करने के लिए शुद्ध सात्कि वस्त्र अर्पण किए। वस्त्रों का विशेषण जो "विरज" दिया है, जिसका भाव है कि ये वस्त्र दानार्थ नहीं है, किन्तु शृङ्गार के लिए सात्विक वस्त्र हैं। दूसरों को तो जो वस्त्र दिए जाते हैं वे अपने यश के लिए राजसगुण (भाव) से दिए जाते हैं, वे अविरज ही होते हैं। यदि विरज का भाव नवीन वा स्वच्छ किया जाय तो नवीन वा स्वच्छ तो सर्व को दिए जाते है जिससे 'विरज' विशेषण देना व्यर्थ हो जाता है, इसलिए विरज का भाव है "सात्विक वस्त्र" अथवा कन्या को जो आमे वस्त्र देने पड़ते हैं, वे पहिले ही अखण्ड और शुद्ध वस्त्र दे दिए और उपायन (उपहार) भी वर और वधू को जो देना था, वह दे दिया। वह भी यों ही नहीं दिया, किन्तु जैसे विवाह में देने की विधि है, वैसे दिए ॥ ३२, ३३ ॥

श्लोक—ततो निवेशनं श्रीमदुपकल्प्य महामतिः ।
ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ॥३४॥

श्लोकार्थ—महामति भीष्मक ने समीप ही सुन्दर ठहरने का स्थान तैयार रखा था, वह ठहरने के लिए दिया और लश्कर सहित तथा जो अन्य साथ आये थे उनका भी यथा योग्य भोजन आदि से आतिथ्य सत्कार किया ॥३४॥

सुबोधिनी—ततो निवेशनमपि यथा जामात्रे दीयते तादृशं श्रीमदिति। उप समीप एव कल्पयित्वा। यथा भगवान् निकट एव रुक्मिणीसहितो भवतीति। ननु कथमेवं ज्ञातवान्, तत्राह महामतिरिति। ततो वरयात्रिकाणां भोजनमपि दत्तवानित्याह ससैन्ययोरिति। सैन्यमसहभोजि, अनुगास्तु सहभोजिन इति। आतिथ्यं प्रत्येकं धर्मं बुद्धया आवश्यकबुद्धया वा ॥३४॥

व्याख्यार्थ—पूजा के पश्चात् जैसे वर को ठहरने के लिए सुन्दर स्थान दिया जाता है, वैसे निकट ही उत्तम घर रहने के लिए दिया, जिससे भगवान् रुक्मिणी के समीप होने से उससे हिल-

मिल जावे, भीष्मक ने यों कैसे जान लिया ? इसके उत्तर में कहा, कि वह बड़ा बुद्धिमान् है जिससे सब समझ गया था, पश्चात् वर के साथ जो आए थे उन को भोजन भी दिया। उनके साथ जो सेना आई थी वह पक्ति में साथ भोजन करने वाली नहीं थी, अतः उसको अलग भोजन करवाया और जो दूसरे अनुग थे वे सहभोजी थे, अतः उनको साथ में भोजन करवाया। अतिथि सत्कार तो हर एक का धर्म बुद्धि से करना आवश्यक है, अथवा इस बुद्धि से किया है ।।३४।।

आभास—तदनन्तरं तदर्थमन्येषामपि पूजां कृतवानित्याह एवं राजेति ।

आभासार्थ—उसके पश्चात् दूसरों की भी आतिथ्य सत्कार के लिए पूजा की जिसका वर्णन "एवं राजा" इस श्लोक में कहते हैं।

श्लोक—एवं राजा समेतानां यथावीर्यं यथावयः ।
यथाबलं यथावित्तं सर्वैः कामैः समर्हयत् ।।३५।।

श्लोकार्थ—इस प्रकार जो राजा आदि आये थे, उन सबका उनके पराक्रम, आयु, बल तथा वित्त के अनुसार सर्व प्रकार की कामनाओं से सत्कार किया ।।३५।।

सुबोधिनी—यादृशे रूपे यादृशानि वस्त्राणि यादृशं वयः तादृशवेशसम्पादकम् । यावच्च बलं सेना तावत्सभृत्याधिक्यम् । यावच्च स्वस्य वित्तम् । एवं यथायोग्यं चतुर्धा पूजयामास ।।३५।।

व्याख्यार्थ—रूप तथा वय के समान जैसे-जैसे वस्त्र योग्य थे, वे तैयार करवाए थे, वे दिए। जितनी सेना थी उसके योग्य विशेष पोषण भी किया और जैसा अपने पास धन था उसके अनुसार, यथायोग्य चार प्रकार से सब की पूजा की ।।३५।।

आभास— राजपत्न्या अभिरुचिरस्ति नवेति सन्देहे, तन्निराकरणार्थं सामान्यतः स्त्रीणामभीष्टता निरूप्यते कृष्णमागतमिति त्रिभिः, कायिकवाचिकमानसिकानुवृत्तिभेदात् । तत्र कायिकमाह ।

आभासार्थ—रानी का भी राजा की तरह इसमें पूरा प्रेम है वा नहीं, इस सन्देह के निवारण के लिए सामान्य रीति से स्त्रियों को भी यह पसन्द है, इसका वर्णन

"कृष्णमागतं" से तीन श्लोकों में करते हैं। कायिक, वाचिक और मानसिक तीन प्रकार का उनका प्रेम है, इसलिए तीन श्लोकों में वर्णन करते हैं। उनमें से इस श्लोक में 'कायिक' का वर्णन करते हैं।

श्लोक— **कृष्णमागतमाकर्ण्य विदर्भपुरवासिनः ।**
आगत्य नेत्राञ्जलिभिः पपुस्तन्मुखपङ्कजम् ॥३६॥

श्लोकार्थ—विदर्भ पुरवासियों ने कृष्ण का आना सुनकर सब वहां आकर अपने नेत्र रूप अंजलिओं से उनके मुख रूप कमल मकरन्द का पान किया ॥३६॥

सुबोधिनी—कृष्णं स्वभावत एव स्त्रीप्रियम्, तद्गृहेऽपि गत्वा द्रष्टव्यम्। स्वगृहे समागतं कथं न पश्येदिति विदर्भपुरवासिनः सर्व एव समागत्य नेत्राञ्जलिभिस्तन्मुखपङ्कजं पपुः ॥३६॥

व्याख्यार्थ—स्वभाव से स्त्रियों को प्यारा श्रीकृष्ण है इसलिए उसके घर जा कर भी जब वे देखने योग्य है तब अपने घर आए हुए को कैसे न देखें, इसलिए विदर्भ पुरवासी सब आकर नेत्र रूप अंजलियों से उनके मुख रूप कमल के मकरन्द का पान करने लगे ॥३६॥

आभास—**तेषां वाक्यमाह अस्यैवेति ।**

आभासार्थ—दर्शन कर उन्होंने जो वचन कहे वे "अस्यैव" श्लोक में कहते हैं।

श्लोक—**अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा ।**
असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥३७॥

श्लोकार्थ—रुक्मिणी इसकी ही भार्या बनने योग्य है न कि दूसरे की, यह निर्दोष है इसलिए यह ही इसका योग्य पति है ॥३६॥

सुबोधिनी कोऽपि कस्मैचित्प्रयच्छतु, भार्या त्वस्यैव भवितुमर्हति। अनेन स्वरूपयोग्यता निरूपिता। योग्यं योग्येन सम्बध्यत इति तेषामभिप्रायः। ननु दत्तेयमन्यस्मै, अन्या भगवते तथा सति देयेत्याशङ्क्याह नापरेति। अन्या तु न योग्यैव। न हि लक्ष्मीव्यतिरिक्ता भगवद्योग्या भवति। लोकश्च प्रमाणमिति। यथा दैवो वाक्, तथा वदति। अयमपि

रुक्मिण्या एवार्हति । यतः अनद्यात्मा । पुरुषोत्तमत्वात् निरवद्यरूपः । सा हि निर्दुष्टमेव पति मन्यते । भगवानीश्वरत्वेन सर्वेषामेवोचितः, पतित्वेन त्वस्या एवोचितः । यत इयं भक्तिप्रधाना ॥३७॥

व्याख्यार्थ—कोई भी किसीको भले देवें, किन्तु रुक्मिणी तो इसको भार्या बनने योग्य है इन शब्दों से स्वरूप की योग्यता बताई है, इस प्रकार के शब्द कहने का भाव यह है कि योग्य कन्या योग्य वर से ही सम्बन्ध कराने के योग्य है, यह तो भाई ने दूसरे को दी है इसलिए भगवान् को दूसरी दी जाय ? इसका निराकरण नगर वासी करते हैं कि 'नापरा" दूसरी नहीं, कारण कि दूसरी तो भगवान् के योग्य नहीं होगी, लक्ष्मी के सिवाय दूसरी कोई भी भगवान् की भार्या बनने योग्य नहीं है लोक इसमें प्रमाण है जैसे देवी वाणी वैसे लोक कह रहे हैं यह भी रुक्मिणी के योग्य है क्योंकि निर्दोष आत्मा है पुरुषोत्तम होने से हो निर्दोष पूर्ण गुण विग्रह है वह भी निर्दोष को ही अपना पति मानती है, भगवान् ईश्वर होने से समस्तों के पूज्य होने योग्य है, किन्तु पतिपन से तो इसके ही योग्य हैं, क्योंकि यह "भक्ति प्रधान" है अर्थात् इसमें प्रेम मुख्य है ॥ ३७ ॥

आभास—एवं वाचनिकमुक्त्वा बाधकमत्र प्रवर्त्तमित्याशङ्क्य तन्निवारणार्थं भगवन्तं प्रार्थयन्ति किञ्चिदिति ।

आभासार्थ—ईस प्रकार वाचनिक भाव प्रकट कर इसमें कोई विघ्न न पड़े, ऐसी आशंका होने से उसके निवारण के लिए "किंचित्" श्लोक से भगवान् को प्रार्थना करते हैं-

श्लोक—किञ्चित्सुचरितं यन्नस्तेन तुष्टस्त्रिलोककृत् ।
अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिमच्युतः ॥३८॥
एवं प्रेमकलाबद्धा वदन्ति स्म पुरौकसः ।

श्लोकार्थ—जो कुछ हमारे पुण्य हैं उनसे त्रिलोकी को रचने वाले यह अच्युत भगवान् प्रसन्न होकर हम पर अनुग्रह करके इस वैदर्भीका पाणिग्रहण करें । प्रेम की बेड़ी में बन्धे हुए पुरवासी इस प्रकार कहने लगे ॥३८॥

सुबोधिनी—यद्यस्माकं किञ्चित्सुचरितमस्ति, तेनादौ भगवान् तुष्टो भवतु । ततस्त्रिलोककर्ता स एवेति । अन्येषामपेक्षाभावात् स्वयमेवानुगृह्णात्वस्मान् । अनुग्रहानन्तरं

यत्कर्तव्यं तदाहुः गृह्णातु वैदर्भ्याः पाणिमिति । अत्र एवमेवेति निर्बन्धहेतुमाह अच्युत इति । आदौ भर्ता स्वरूपतो धर्मतश्च्युतिरहितो मृग्यते, तथा भोगेऽपि । एवं तेषां प्रेमातिशयमुक्त्वा सर्वसम्मतौ मातुरपि सम्मतिर्जातेत्यभिप्रायेणोपसंहरति । एवं प्रेमकलाबद्धाः नानाविधस्नेहप्रकारैर्वशीकृताः वदन्ति । स्मेति प्रसिद्धिः प्रमाणत्वेनोक्ता । पुरवासित्वान्न मुखमुद्रणं केनापि शक्यम् । ॥३८॥

व्याख्यार्थ—जो हमारे कुछ पुण्य हैं तो उनसे पहले तो भगवान् प्रसन्न होवें, और वह आप ही त्रिलोकी के कर्ता हैं दूसरों की अपेक्षा से आप स्वयं ही हम पर अनुग्रह करें, अनुग्रह करने के बाद जो कुछ करना योग्य है वह कहते हैं कि वैदर्भी का पाणि ग्रहण करें, यह यों ही कहने का भाव है कि आप "अच्युत" हैं पहले उस पति की खोज की जाती है जो स्वरूप और धर्म से कभी भी, लेशमात्र भी डिगे नहीं, वैसे ही भोग से भी, इस प्रकार उन का अतिशय प्रेम प्रकट कर सबको सम्मति होने पर माता की भी यही राय हो गई, इस अभिप्राय से अब उपसंहार किया जाता है इस प्रेम की बेड़ी में बन्धे हुए अर्थात् अनेक विध स्नेह के तरीकों से वशीभूत हो कहने लगे, "स्म" पद कहने का भाव है कि यों छिपकर नहीं कहने लगे किन्तु जैसे प्रसिद्धि हो वैसे प्रमाणपन से कहने लगे, कहने वाले नगर वासो थे अतः कोई भी उनका मुख बन्द नहीं कर सकता था ॥३८½॥

आभास—**एवं सर्वामेव हरणे संभृतिमुक्त्वा पूजार्थं तस्या बहिर्निर्गमनमाह कन्या चेति ।**

आभासार्थ—इस प्रकार सब की हरण करने में सम्मति कह देवी की पूजा के लिए उसका बाहर निकलना "कन्या च" श्लोक से कहते हैं ।

श्लोक—**कन्या चान्तःपुरात्प्रागाद्भटैर्गुप्ताम्बिकालयम् ॥३६॥**

श्लोकार्थ—योधाओं से रक्षित कन्या देवी के मन्दिर को जाने के लिए अन्तःपुर से बाहर निकली ॥३६॥

सुबोधिनी—यथा पुरवासिभिः स्वसर्वकर्मसमर्पणेन रुक्मिणीविवाहार्थं भगवान् प्रार्थितः, एवं रुक्मिण्यपि भगवान् गृह्णात्विति महादेवं प्रार्थयितुं निर्गतेति चकारार्थः । अन्तःपुरादिति । गुप्तस्थानात् प्रकटस्थाने निर्गता यथा बन्धुपीडामकृत्वा भगवान् विश्रामतया गृह्णाति । प्रकर्षेणागादिति मनःसन्तोषः प्रदर्शितः । भटैर्गुप्तेति । यथा तावदन्यो न स्पृशति । अम्बिकालयमिति । स्त्री देवता, गृहे स्त्रिय एवाध्यक्षा इति, तत्र पुरुषसम्बन्धाभावो निरूपितः । अम्बिकापदेन मातृत्वं चोक्तम् ॥३६॥

व्याख्यार्थ—जैसे नगर निवासियों ने अपने सर्व पुण्य कर्म समर्पण कर रुक्मिणी से विवाह करने के लिए भगवान् को प्रार्थना की, वैसे ही रुक्मिणी भी भगवान् मुझे स्वीकार करें ऐसी प्रार्थना महादेव को करने के लिए अन्तःपुर से निकली यह आशय श्लोक में दिए हुए 'च" शब्द का है, अन्तःपुर से बाहर आने का यह भी कारण है कि भगवान् बान्धवों को पीड़ा न कर आराम से मुझे ग्रहण कर सकें, उत्कर्ष से बाहर निकलने से अपने मन का सन्तोष दिखाया, योद्धों से रक्षित होकर इसलिए निकली कि भगवान् ग्रहण करें तब तक कोई दूसरा स्पर्श न करे, "अम्बिकालयम्" स्त्री देवता घर में, स्त्रियाँ ही मुख्य होती हैं वहाँ पुरुषों के सम्बन्ध का अभाव रहता है "अम्बिका" मातृत्व भाव भी बताया है ।।३६।।

आभास—रथस्थाया ग्रहणं रथान्तरे स्थितस्य दुष्करं भवतीति पद्भ्यामेव निर्गतेत्याह पद्भ्यमिति ।

आभासार्थ-रुक्मिणी, देवी के मन्दिर में जाने के लिए, अन्तःपुर से पैदल हो निकली थी, कारण कि जो रथ में बैठ कर जावे तो रथ में बैठे हुए को दूसरे रथ में, बैठी हुई को ग्रहण करने में कठिनाई न होगी, भगवान् मुझे आसानी से, ले सकें अतः रुक्मिणी ने पैदल जाना ही योग्य समझा, जिसका वर्णन "पद्भ्यां" श्लोक में करते हैं ।

श्लोक—पद्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवम् ।
सा चानुध्यायती सम्यङ् मुकुन्दचरणाम्बुजम् ।।४०।।

श्लोकार्थ—यह पाँवों से अम्बिका के चरणारविन्द के दर्शन के लिए जाने लगी उस समय भी भली भाँति भगवान् के चरण कमलों का ही ध्यान कर रही थी ।।४०।।

सुबोधिनी—भवान्याः पादपल्लवमिति । लोके तद्भक्तत्वं स्वस्य ख्यापयति । अभिप्रेतार्थस्त्वन्य एव तमेवान्तर्गतमाह सा चानुध्यायतीति । तत्सम्बन्धिन्यः स्त्रियः । सा च मुकुन्दचरणाम्बुजमेव अनुध्यायती जाता । मुकुन्दस्य मोक्षदातुरेव चरणाम्बुजम् । अनेन विशेषतो भगवदाकाङ्क्षायां हेतुरुक्तः । पितृगृहेऽपि बन्धनम्, अन्यत्रापि अवरोध एव स्थितिरिति मुकुन्दावरोधस्य मोक्षरूपत्वात्तन्न हेयम् ।।४०।।

व्याख्यार्थ—देवी के चरणारविन्द के दर्शन के लिए जाने के कारण केवल लोक में अपने को उसकी भक्त प्रसिद्ध कराना था, चित्त का भीतरी भाव तो दूसरा ही था वह भीतरी भाव जो था वह श्लोक के उत्तरार्ध में प्रकट किया है, वह तो वहाँ जाते समय भी मुक्ति दाता के चरणाम्बुज का ही भली भाँति प्रतिक्षण ध्यान कर रही थी, उसकी सम्बन्ध वाली स्त्रियाँ भी, भगवान् का ही ध्यान कर रही थीं, कारण यह है, कि रुक्मिणीजी को भगवान् की ही केवल आकांक्षा है पिता के घर में भी बन्धन और दूसरे स्थान पर भी रुकावट, इसलिए मुकुन्द भगवान् में निरोध मोक्ष है अतः उसका त्याग करना योग्य नहीं है ॥४०॥

आभास—एवं कायमनोव्यापारौ निरूप्य वाचि व्यापाराभावमाह यतवागिति।

आभासार्थ—इस प्रकार काया और मन के कार्यों को कह कर वाणी में कार्य ला अभाव "यत्वाङ् श्लोक में कहते हैं।

श्लोक—यतवाङ् मातृभिः सार्धं सखीभिः परिवारिता।
गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥४१॥

श्लोकार्थ—सखियों से घिरी हुई, माताओं के साथ मौन धारण कर दर्शन को जा रही थी उस समय कवच धारण किए हुए, शस्त्र धारी राजा के शूरवीर योद्धे रक्षा कर रहे थे ॥४१॥

सुबोधिनी—मातृभिः सार्धमिति। भगवतो मनसि यथा अनौचित्य न भवति, तदर्थमेवं कृतवती। सखीभिश्च परिवारिता। अनुमत्यर्थं हरणे पश्चात्तापाभावार्थं शोभार्थं च। बहिर्भटैर्गुप्ता। शूरैरित्यन्तःसामर्थ्यम्। सन्नद्धैरुद्यतायुधैरिति। स्वरक्षापरपीडार्थं साधनसम्पत्तिः। एवमावरणचतुष्टयं तस्या निरूपितम्। सर्वतो दोषाभावाय ॥४१॥

व्याख्यार्थ—माताओ के साथ जा रही थी, इनके साथ जाने का अभिप्राय यह था कि भगवान् के मन में मेरे लिए किसी प्रकार अयोग्यता की शंका उत्पन्न न होनी चाहिए, सहेलियों से घिरी हुई

थी माताओं और सहेलियों का साथ में होने का भाव यह था कि भगवान् मुझे हरण कर ले जाव इसमें इनकी भी राय है, इसलिए इनको वा मुझे पश्चाताप न होगा, बाहर से इनके साथ में आने से शोभा भी है, बाहर भटों से रक्षित थी वे शूरवीर थे इससे भीतर का सामर्थ्य दिखाया, शस्त्र लेकर तैयार थे इससे यह बताया कि अपनी रक्षा और शत्रुओं की पीड़ा के लिए साधनों की सम्मति बताई है इस प्रकार इसकी रक्षा के लिए चार पड़दे कहे, सर्व प्रकार दोषों का अभाव बताने के लिए ॥४१॥

आभास—ततो मङ्गलवाद्यानामपि वादनम्, शुभनिमित्तं शकुनमपि जातमित्याह ।

आभासार्थ— पश्चात् मंगल सूचक बाजे भी बजने लगे और शुभ के निमित्त कारण शकुन भी हुए जिनका वर्णन "मृदङ्ग" श्लोक में करते हैं ।

श्लोक— **मृदङ्गशङ्खपणवास्तूर्यभेर्यश्च जघ्निरे ।**
नानोपहारबलिभिर्वारमुख्याः सहस्रशः ॥४२॥
स्रग्गन्धवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः ।
(गायन्तश्च स्तुवन्तश्च गायका वाद्यवादकाः ।)
परिवार्य वधूं जग्मुः सूतमागधबन्दिनः ॥४३॥

व्याख्यार्थ—भगवद्गुणों के श्रवण से ही शान्ति आती है, इससे उसका जो रुक्मिणी में अभिमान है अर्थात् रुक्मिणी मेरी है, वह भी मिट जावेगा, यों निरूपण किया, पहले स्वस्थता का सम्पादन करते हैं अर्थात् मूर्च्छित हुए शिशुपाल को सावधान करते हैं "भो भो" पद से यह ज्ञान कराते हैं कि वह मूर्च्छित है, "पुरुषशार्दूल" विशेषण देने से यह प्रकट किया है कि अपनी स्तुति श्रवण से हृदय मेंन अपने माहात्म्य का ज्ञान होगा, यह कहना विवाह न होने का लक्षण बताना है, विवाह न होने से तेरा कुछ गया तो नहीं है, जो कहो कि विवाह होने से मेरा कुछ प्रिय होता, तो उसके उत्तर में कहते हैं कि "प्रियाप्रिययोः" जीव को सदैव प्रिय हो अथवा सर्वदा अप्रिय हो वैसा कोई निर्णय नहीं है, उसमें देहित्व ही कारण है "दिह् उपचये" धातु से यह शब्द बना है अतः जब बढ़ता है अथवा उन्नति होती है तब प्रिय होता है अर्थात् प्रसन्नता होती है और जो हानि होती है तो दुःख होता है ॥११॥

आभास—हेत्वन्तरमाह यथा दारुमयीति ।

आभासार्थ—"यथा दारुमयो" श्लोक में दूसरे हेतु कहते हैं ।

श्लोक—यथा दारुमयी योषिन्नृत्यते कुहकेच्छया ।
एवमीश्वरतन्त्रोऽयमीहते सुखदुःखयोः ॥१२॥

श्लोकार्थ—जैसे काठ की पुतली नचाने वाले जादूगर की इच्छा के अनुसार नाचती है इसी प्रकार यह जीव भी सुख दुःख भोगने में ईश्वर के आधीन है ॥१२॥

सुबोधिनी—अलौकिको बोधनहेतुरयम् । दारुमयी योषित् विवृताङ्ग्यपि सभायां विरुद्धरसापि । कुहकस्य वञ्चकस्य । कस्याश्चिद्देवताया रूपं कृत्वा तां नर्तयित्वा स्वोदरभरणं करोति । एवमीश्वरेण सर्वोऽपि नर्त्यते स्वक्रीडार्थम् । अत ईश्वराधीन एवायं लोकः भ्रमात्सुखदुःखयोरीहते । सुखं भवतु, दुःख मा भवत्विति । यथाकथञ्चित् प्रवृत्त्यर्थं भगवति दोषज्ञानाभावाय तथा बुद्धिमुत्पादयति ॥१२॥

व्याख्यार्थ—यह बोधन का हेतु अलौकिक है विस्तृत अंगवाली भी पुतली सभा में जो स्वयं रस पैदा नहीं कर सकती है रसहीन है अथवा विरुद्ध रसवाली है, तो भी, कोई धूर्त जादूगर किसी देवता का रूप धारण कर, उसको नचाके अपना पेट भरता है, इसी प्रकार भगवान् भी अपनी क्रीड़ा के लिए समस्त जगत् को नचाता है, अतः यह लोक ईश्वर के आधीन ही है भ्रम से ही सुख दुःख की स्वयं इच्छा करता है, भ्रम के कारण ही कहता है कि मुझे सुख प्राप्त हो दुःख की प्राप्ति न होवे भगवान् जैसे तैने प्रवृत्ति चक्र चलाने के लिए अपने में दोष का ज्ञान न होवे इसलिए वैसी बुद्धि उत्पन्न करते हैं ॥१२॥

आभास—एवं शास्त्रीयमुक्त्वा लौकिकं स्वकीयमाह शौरेः सप्तदशाहमिति ।

आभासार्थ—इस प्रकार शास्त्रीय सान्त्वना देकर अब अपना लौकिक प्रकार "शौरेः सप्तदशाहं" श्लोक में कहते हैं ।

श्लोक—शौरेः सप्तदशाहं वै संयुगानि पराजितः ।
त्रयोविंशतिभिः सैन्यैर्जिग्य एकमहं परम् ॥१३॥

श्लोकार्थ—श्रीकृष्णजी से सत्रहवार तो तेईस अक्षोहिणीयों के साथ होते हुए भी मैं हार गया हूँ किन्तु एक बार मैं जीत गया जिससे मैंने दोनों प्रकार अर्थात् जय

(प्रिय) एवं पराजय (अप्रिय) का अनुभव किया है इससे सुख तथा दुःख की सदैव स्थिति नहीं रहती है यह प्रत्यक्ष है ॥१३॥

सुबोधिनी—सप्तदशदिवसेषु वै निश्चयेन शौरेः सम्बन्धिसंयुगानि पराजितः। द्विकर्मकोऽयं जिधातुः अत्र। संयुगेषु वा। त्रयोविंशतिभिः सैन्यैरक्षौहिणीभिः सहित इति साधनसहितोऽपि सकृज्जयं मन्यते। तेन द्वयमपि मयानुभूतमिति निष्ठाभावः प्रत्यक्षः ॥१३॥

व्याख्यार्थ—सत्रह दिनों में जो कृष्ण से १७ युद्ध हुए उनमें मैं हार गया हालांकि मेरे पास तेवीस अक्षौहिणी सेनाओं का साधन भी था, किन्तु अन्त में १८ वीं बार मैंने जीत पाई है, इससे मुझे दानों प्रकार (जय-विजय) का अनुभव है यों निष्ठा भाव प्रत्यक्ष है, यहाँ 'जि' धातु द्विकर्मक है, श्लोक में संयुगानि के स्थान पर 'संयुगेषु' पद होता तो भो वही भावार्थ होता है ॥१३॥

आभास—अत एव मम शोको नास्तीत्याह तथा तथापीति।

आभासार्थ—इस कारण से ही मुझे शोक नहीं है, यह "तथापि" श्लोक में कहते हैं।

श्लोक—तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित्।
कालेन द्रव्ययुक्तेन जानन्विद्रावितं जगत् ॥१४॥

श्लोकार्थ—तो भी मैं न तो इस का शोक करता हूँ और न हर्ष करता हूँ क्योंकि मैं जानता हूँ कि इस जगत् को द्रव्य युक्त काल ही नाश करता है ॥१४॥

सुबोधिनी—कर्हिचित् तत्स्मरणेऽपि दुहित्रादिदर्शनेऽपि। सर्वदा हर्षविषादाभावे एकमनुसन्धेयमिति। तत्स्वनिर्धारितं तस्मा उपदिशति कालेनेति। यदि स्वसमानैः पराजयो जयो वा भवेत्, तदा हर्षो विषादो वा कतव्यो भवेत्। कालस्तु तत्कर्ता, स सर्वेषामधिपतिः। किञ्च। सोऽपि द्रव्ययुक्त एव शरीरादिसहितः। विद्रावणं शरीरद्वारैव करोति। नत्वात्मनां स्वतः। तेन च जगद्विद्रावितं जानन् न शोचामीति सम्बन्धः। दैवयुक्तेनेति पाठे कर्मवशात् सोऽपि तथा करोति। न तु तस्यापि कश्चन दोषोऽस्तीति भावः ॥१४॥

व्याख्यार्थ–कभी, उसके स्मरण होने पर वा कन्या आदि के देखने पर भी यदि दुःख होवे तो विचारता हूँ कि सर्वदा न हर्ष का विषय और न दुःख का विषय रहता है, एक का अनु-

सन्धान करना चाहिए अर्थात् सुख वा दुःख का अन्वेषण करना चाहिए कि ये क्यों और कैसे वा किसके भेजे हुए आते हैं, अथवा स्वतः आते हैं इसका विचार करो तो स्वयं निर्णय किया है उसका उसको उपदेश देता हैं, "कालेन" जो अपने बराबरी करने वालों से पराजय वा जय होवे तो तब हर्ष वा खेद करना चाहिए, किन्तु यहाँ तो उसका करने वाला "काल" है वह सब का अधिपति है, वह भी शरीर आदि सहित हो है, पराभव आदि शरीर द्वारा ही करता है, न कि आत्माओं का स्वतः होता है इस से काल द्वारा इस जगत् का यह प्रकार देखने में कुछ भी शोक नहीं करता हूँ यदि "द्रव्ययुक्तेन" के स्थान पर 'दैवयुक्तेन" पाठ माना जाय तो उसका अर्थ यों करना चाहिए कि कर्म के वश से काल भी वैसे करता है, इसलिए उसका भी कोई दोष नहीं है ॥१४॥

आभास—अस्तु कालान्तरवार्ता, इदानीमेव वयं सर्वे जिताः । अतः पञ्चभिा सह दुःखं दुःखं न भवतीति न शोकः कर्तव्य इत्यभिप्रायेणाह अधुनापीति ।

आभासार्थ—दूसरे काल की वार्ता यों होवे, अब भी हम सब पराजित हुए हैं, अतः बहुतों के साथ जो दुःख होता है, वह दुःख नहीं माना जाता है इसलिए शोक नहीं करना चाहिए इस अभिप्राय को "अधुनापि" श्लोक से प्रकट करते हैं ।

श्लोक—अधुनापि वयं सर्वे वीरयूथपयूथपाः ।
पराजिताः फल्गुतन्त्रैर्यदुभिः कृष्णपालितैः ॥१५॥

श्लोकार्थ---अब भी हम सब जो योधाओं के यूथपति के पति हैं, वे थोड़ी सेना वाले कृष्ण से पालित यादवों से हार गए हैं ॥१५॥

सुबोधिनी—वयमिति श्लाघायाम् । सर्व एवेति सम्मत्यर्थम् । तह्यं प्रयोजका भविष्यन्तीति न मन्तव्यम् । वीरयूथपानामपि यूथरक्षका वयम् । सर्वदैव वयमेवंभूताः । अधुना परं पराजिताः । तेषां च न महद्बलम्, किन्तु फल्गुतन्त्रैरेव यदुभिः पराजिताः । तर्हि तेऽपि हता भविष्यन्तीत्याशङ्क्य तं मनोरथं दूरीकरोति कृष्णपालितैरिति । कृष्णेन पालिताः, न मारयितुं शक्या इत्यर्थः । अनेन कृष्णात् कन्याहरणसम्भावनापि निवारिता ॥१५

व्याख्यार्थ—"वयं" बहुवचन देने से अपनी प्रशंसा की है अर्थात् अपना बड़प्पन प्रकट किया है "सर्व" शब्द सब को सम्मति है यां बताने के लिए कहा है तो प्रेरक न होंगे यों न समझना हम वीरों के समूहों के जो पति हैं अर्थात् जो सेनापति हैं उनके भी हम स्वामी हैं, सदा ही हम ऐसे होते आए हैं लेकिन अब हार गए हैं जिनसे हारे हैं, उन यादवों के पास सेना भी थोड़ी है,

तब तो वे भी मरे होंगे ? इस उनके मनोरथ रूप शंका को मिटाने के लिए कहते हैं कि वे मरे नहीं क्योंकि वे कृष्ण से पालित हैं, अतः उनको कोई भी मार नहीं सकता है यों कहने से कृष्ण ने कन्या का हरण किया है इस सम्भावना का भी निवारण किया है ॥१५॥

आभास—ननु किमेतदाश्चर्यमिति चेत्, तत्र हेतुमाह रिपवो जिग्युरिति ।

आभासार्थ—इसमें कौनसा आश्चर्य है ? यदि यों कहो तो उसमें "रिपवो जिग्यु" श्लोक से कारण कहते हैं ।

श्लोक—रिपवो जिग्युरधुना काल आत्मानुसारिणि ।
तदा वयं विजेष्यामो यदा कालः प्रदक्षिणः ॥१६॥

श्लोकार्थ—अब समय शत्रुओं के अनुकूल हैं इसलिए उनकी जीत हुई है, जब काल अपने अनुकूल बनेगा तब अपन जीतेंगे ॥१६॥

सुबोधिनी—अधुना आत्मानुसारिणि काले देवानां हितकर्तरि रिपवो वैष्णवा जिग्युः । अस्माकं च हितकारी यदा तामसः कालो भविष्यति, राजसो वा, तदा वयं दैत्याः, चकराद्राक्षसा अपि विजेष्यन्ति । दैत्यानां सिद्धान्ते कालः परमः, तदतिरिक्तानङ्गीकारात्तत्र प्रतिष्ठिताः ॥१६॥

व्याख्यार्थ—अब सात्विक काल देवों का हितकारी है, अतः हमारे शत्रु जो वैष्णव हैं उनकी जीत हुई है, हम दैत्य हैं तमोगुणी हैं, अतः हमारा हितकारी तामस काल का राजस आवेगा तब हम जीतेंगे श्लोक में "च" शब्द दिया है, जिससे बताया है, कि उस समय राजस राक्षस भी जीतेंगे, दैत्यों का यह सिद्धान्त है कि काल ही सबसे बड़ा है, उसके सिवाय वे बड़ा कुछ भी नहीं मानते हैं अतः वे उसके ही आश्रित हैं ॥ ६॥

श्लोक—एवं प्रबोधितो मित्रैश्चैद्योऽगात्सानुगः पुरम् ।
हतशेषाः पुनस्तेऽपि ययुः स्वं स्वं पुरं नृपाः ॥१७॥

श्लोकार्थ—इस प्रकार जब मित्रों ने समझाया तब शिशुपाल अनुचरों के साथ अपने नगर को गया और मरने से जो राजा बच गए थे वे भी अपने अपने नगर को गए ॥१७॥

सुबोधिनी—एवं स्वसिद्धान्तनिरूपणेन प्रबोधितः। मित्रैरवञ्चकैः समानव्यसनैः सह चैद्यः ससेवकः स्वपुरमगात्। तेऽपि हतशेषाः तद्गृहपर्यन्तं तत्सङ्गे गत्वा पुनः स्वं स्वं पुरं ययु ॥१७॥

व्याख्यार्थ—इसी प्रकार अपने सिद्धान्त के निरूपण करने से समझाया हुआ शिशुपाल, धोखा न देने वाले, एक जैसी प्रवृत्ति वाले अपने मित्र एवं अनुयायियों को साथ ले अपने नगर गया और जो राजा शेष बच गए थे, वे भी उसके घर तक साथ गए अनन्तर अपने अपने शहर को गए ॥१७॥

आभास—एवं सप्तदशभिः एकमुपाख्यानं साधारणानां ममताभावाय निरूपितम्। अधुना सार्धैः सप्तदशभिः रुक्मिप्रभृतीनां ममताभावाय रुक्मिण्याश्च तेषु ममताभावाय सार्धैरेव सप्तदशभिर्निरूप्यते। मध्यमं तामसम्। अन्तिमं राजसमिति। ततो दोषत्रयापगमने भगवानष्टैश्वर्यरूपां रुक्मिणीं स्वीकरिष्यत्यष्टभिः। तत्र प्रथमं तामसस्योद्योगमाह रुक्मी त्विति।

आभासार्थ—यों सत्रह श्लोकों से साधारणों की ममता मिटाने के लिए एक वृत्तान्त कहा, अब रुक्मी प्रभृतियों को ममता मिटाने के लिए तथा रुक्मिणी की उनमें ममता न होवे इसलिए साढ़े सत्रह श्लोकों में निरूपण करते हैं, मध्यम तामस है अन्तिम राजस है, उससे तीन दोषों के नष्ट हो जाने पर भगवान् आठ ऐश्वर्यों के रूप वाली रुक्मिणी को स्वीकार करेंगे, जिसका वर्णन आठ श्लोकों से होगा, इसमें पहले तामस के उद्यम का वर्णन "रुक्मी" श्लोक से कहते हैं ॥१७॥

श्लोक—रुक्मी तु राक्षसोद्वाहं कृष्णद्विडसहन्स्वसुः।
पृष्ठतोऽन्वगमत्कृष्णमक्षौहिण्या वृतो बली ॥१८॥

श्लोकार्थ—श्रीकृष्ण से द्वेष करने वाला अक्षोहिणी सेना से घिरा हुआ बली रुक्म अपनी बहिन के राक्षस विवाह को सहन न कर सका अतः श्रीकृष्ण के पीछे दौड़ा ॥१८॥

सुबोधिनी—यद्यपि तत्त्वोपदेशे रुक्मी स्थितः, तत्त्वेन च सर्वे निवृत्तव्यापारा जाताः, रुक्मी तु न जात इति तुशब्दार्थः। ननु कोपराधः, य एव क्षत्रियः बलवान्नयति तस्यैव भार्या भवतीति क्षत्रियाणां स्थितिः। तत्राह स्वसुः राक्षसोद्वाहमसहन्निति। ये हि कुलीनाः सन्तो दुर्बलाः, तत्कन्या राक्षसविधिना नीयते। स्वयं तु शूरः, अतो राक्षसविवाहोऽनुचितः। किञ्च। कृष्णद्विडयम्। अन्यश्चेन्नयेत्, न वदेदपि। द्विष्टेन नीतं न क्वाप्युपकाराय भविष्यति। स्थापनीयं

च शत्रुत्वम् । तत्सम्बन्धे सत्यशक्यमिति सम्बन्धदूरीकरणार्थं तस्य प्रवृत्तिः । कन्याहविषोस्तुल्यत्वात् । 'द्विषता हि हविर्भुक्तं नेह नान्यत्र तद्भवे'दिति वाक्यात् । कन्यापि द्विषता भुक्ता न लोकद्वयोपकारिणीति तस्या भोगं वा निवारयितुं तत्प्रवृत्तिः । अत एव पृष्ठतोन्वगमत् । येनैव मार्गेण कृष्णो गतः, तेनैव मार्गेण स्वयमपि गतः । अथवा । अयं यदैव भगवान् निर्गतः, तदैव प्रचलितः, परमन्ये निवृत्ताः, अयं तु न निवृत्त इति वैलक्षण्यम् । एकयाक्षौहिण्या परिवृतः सन् गतः । ननु बहव एव गता हतोद्यमा जाताः, कथमयमेकाको गच्छतीत्याशङ्क्याह बलीति । अयमत्यन्तं बलिष्ठः ॥१८॥

व्यायार्ख्थ—यद्यपि जब तत्व का उपदेश हो रहा था, वहाँ रुक्मी भी था, उस तत्व उपदेश से अन्य सब समझ गए जिससे वे चले गए, किन्तु रुक्मी को ज्ञान न हुआ यह "तु" पद का भावार्थ है, कृष्ण रुक्मिणी को ले गए इसमें कौनसा अपराध है, जो बलवान् क्षत्रिय ले जाते हैं वह उसी की स्त्री होती है यह क्षत्रियों की मर्यादा है, इस पर कहते हैं कि रुक्मी अपनी वहन का राक्षस विधि से हुए विवाह को सहन नहीं कर सका जो कुलीन हो, किन्तु दुर्बल भी हो, तो उनकी कन्या राक्षस विधि से ली जा सकती है मैं कुलीन के साथ स्वयं शूरवीर हूँ अतः राक्षस विवाह होना अयोग्य है यों रुक्मी ने समझा, तथा रुक्मी कृष्ण का शत्रु भी है यदि दूसरा यों कोई ले जावे तो, सहन भी करले और कुछ न कहे, यह तो शत्रु है शत्रु ले जावे वह कहीं भी, वा कभी भी, उपकार के लिए नहीं होता है रुक्मी को तो भगवान् से शत्रुता ही स्थापित करनी है, वह यदि रुक्मिणी का विवाह सम्बन्ध हो जाएगा तो हो न सकेगी, इसलिए सम्बन्ध को तोड़ने के लिए रुक्मी की यह प्रवृत्ति है, क्योंकि शास्त्र में कहा है कि "कन्याहविषोस्तुल्यत्वात्" जैसे शत्रु भोज पदार्थ (भोजन) करले तो, उससे इस लोक तथा परलोक में कोई लाभ नहीं होता है, वैसे ही कन्या का भी यदि शत्रु भोग करले, तो उससे भी दोनों लोकों में उपकार नहीं होता हैं, इसलिए उपभोग को रोकने के लिए ही इसकी यह प्रवृत्ति है, अतः श्रीकृष्ण के पीछे दौड़ा, जिस मार्ग से कृष्ण जा रहे थे उसी मार्ग यह भी जाने लगा अथवा जब भगवान् वहाँ से पधारे उसी समय यह भी वहाँ से निकल कर चलने लगा, किन्तु दूसरे लौट गए, यह तो निवृत्त नहीं हुआ यह ही इसमें विलक्षणता है, एक ही अक्षोहिणी सेना लेकर गया, जब बहुत चले गए क्योंकि उनका उत्साह नष्ट हो गया था, यह अकेला होकर भी कैसे गया ? इसके उत्तर में कहते हैं, कि "बली" यह बहुत बलवान है इसलिए अकेला होते हुए भी गया ॥ १८ ॥

आभास—अत एव महतीं प्रतिज्ञां चक्रे इत्याह रुक्मीति ।

आभासार्थ—इस कारण से ही बड़ी प्रतिज्ञा करने लगा जिसका वर्णन "रुकम्यमर्षी" श्लोक में करते हैं ।

श्लोक—रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजाम् ।
प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ॥१६॥

श्लोकार्थ—क्रोध में भरा हुआ महाबाहु, कमर कसा हुआ, कवच धारण कर, धनुष ले, युद्ध के लिए तैयार हुआ, रुक्मी सब राजाओ से प्रतिज्ञा करने लगा ॥१६॥

सुबोधिनी—अमर्षी अप्रतीकारक्रोधवान् । सुष्ठु संरब्धः युद्धार्थं कृतोद्यमः । सर्वभूभुजां शृण्वतां मध्ये प्रतिजज्ञे, प्रतिज्ञां कृतवान् । क्रोधसंरम्भान्न ज्ञातवान् । सामग्री गृहीतेति निर्भयः, निवारकाश्च न जाताः सर्वे । सहायापेक्षा तु नास्तीत्याह महाबाहुरिति । महती क्रियाशक्तिः यस्येत्यर्थः । ततो दंशितः बद्धकवचः सशरासनश्च ॥१६॥

व्याख्यार्थ—बदला न ले सकने से क्रोधित, युद्ध के लिए उद्यम वाला, रुक्मी सुनते हुए सन्त राजाओं के मध्य में प्रतिज्ञा करने लगा, क्रोध में पूर्ण होने से मैं क्या कर रहा हूँ, उसको समझ न सका, लड़ाई की सब सामग्री ले ली थी इसलिए निर्भय वना था, सब रोकने वाले भी नहीं हुए, सहायता की भी इसको आवश्यकता नहीं थी, क्योंकि इसमें क्रिया शक्ति बहुत है, जिसका चिन्ह यह है, कि "महाबाहु" है इसलिए कवच पहना है और धनुष भी लिया है ॥१६॥

आभास—प्रतिज्ञामाह अहत्वेति ।

आभासार्थ—"अहत्वा" श्लोक से प्रतिज्ञा का वर्णन करते हैं ।

श्लोक--अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीम् ।
कुण्डिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः ॥२०॥

श्लोकार्थ—युद्ध में कृष्ण को मार डालने के और रुक्मिणी को लौटाकर लाने के सिवाय कुण्डिन में प्रवेश नहीं करूंगा, मैं यह सत्य कह रहा हूं अर्थात् मेरा यह कहना मेरी प्रतिज्ञा समझो ॥२०॥

सुबोधिनी-अप्रत्यूह्येति । रुक्मिणीमग्नितुल्यां मन्यते । यथा आयतनादग्निः बहिश्चेगच्छति । तत्पुनरायतने व्यूह्यते, ततः कुलादपगता पुनः कुले व्यूह्येति भावः । नन्वेतदशक्यमिति चेत्, तत्राह कुण्डिनं न प्रवेक्ष्यामीति । अयमेव नियमः, यदुभयमकृत्वा कुण्डिनाप्रवेश इति । अतः कुण्डिनाप्रवेश एव तस्य फलिष्यति । अत एव विगानाभावात् निर्धारितस्यानुक्तत्वात् न पादानामन्यथार्थो वक्तव्यः । एतदहं सत्यं ब्रवीमीति शपथः ॥२०॥

व्याख्यार्थ—रुक्मिणी अग्नि जैसी है, यों रुक्मी मानता है, अतः जैसे आश्रय स्थान से बाहर निकली हुई अग्नि पुनः आश्रय स्थान पर ही लौट आती है, वैसे ही कुल में से गई हुई रुक्मिणी कुल में ही आनी चाहिए अग्नि के दृष्टान्त कहने का यह ही भाव है, यह जो आप कह रहे हो वह होना कठिन है यदि यों है तो अर्थात् यों मैंने नहीं किया, तो कुण्डिन में प्रवेश नहीं करूँगा यह ही मेरी प्रतिज्ञा है, कि ये दोनों कार्य न कर कुण्डन में लौटकर प्रवेश नहीं करूँगा। रुक्मी ने जो प्रतिज्ञा की वह ही फलीभूत होगी अर्थात् दोनों कार्य पूर्ण न होंगे, जिससे वह कुण्डिव लौटकर प्रवेश न करेगा अतः निन्दा के अभाव से और निर्णय के न कहने से पदों का अर्थ अन्य प्रकार से नहीं कहना चाहिए, यह मैं सत्य कह रहा हूँ, इन शब्दों से वह शपथ ले रहा है ॥२०॥

श्लोक—इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्व म् ।
चोदयाश्वान्यतः कृष्णस्तस्य मे संयुगं भवेत् ॥२१॥

श्लोकार्थ—यों प्रतिज्ञा के वचन कह कर रथ पर चढ़, सारथि को कहने लगा कि घोड़ों को इस प्रकार तेज चलाओ, जैसे मेरा और कृष्ण का मिलाप हो जाय ॥२१॥

सुबोधिनी—ततः पित्राद्यभ्यनुज्ञाव्यतिरेकेणैव एवमुक्त्वा रथमारुह्य स्वसारथिं प्रति प्राह । अन्यथा स न तथा कुर्यात् । सहजद्वेषाभावत् । सत्वरमित्युभयत्र । अश्वान् प्रेरय । यतस्तस्य मे च संयुगो भवेत् । प्रार्थनायां लिङ् । यथा मम तस्य संयुगो भवति, तथा चोदयेति । भवेदिति विध्यर्थो वा । अपूर्वत्वात् । यतोऽयं कृष्णः स्त्रीप्रियः, अतः स्त्रियं हृतवानिति ॥२१॥

व्याख्यार्थ—पश्चात्, पिता आदि बड़ों की आज्ञा लिए बिना ऐसी प्रतिज्ञा कर अपने सारथि को यों न कहे तो वह ऐसा न करे क्योंकि उसका कृष्ण के साथ किसी प्रकार सहज द्वेष नहीं था "सत्वर" शब्द दोनों से सम्बन्धित है (१) घोड़ों को शीघ्र तेज चलाओ, और (२) कृष्ण के साथ मैं जैसे जल्दी मिलूँ यह "भवेत्" लिङ्लकार, प्रार्थना अर्थ में है, अर्थात् घोड़ों को वैसे प्रेरणा दे जैसे मेरा कृष्ण के साथ मिलन हो जाय अर्थात् कृष्ण द्वारका पहुँच न जाय, अथवा पहले वैसा काम न पड़ने से यह पहला ही अवसर है अतः यह "भवेत्" लिङ्लकार आज्ञा के अर्थ में है, अर्थात् सारथि को ऐसी शीघ्र रथ चलाने की आज्ञा दी है, क्यों कि, यह कृष्ण स्त्री प्रिय है अतः स्त्री को हरकर ले गए हैं ॥२१॥

आभास—गत्वा यत्कर्तव्यं तदाह अद्याहमिति ।

आभासार्थ—रुक्मि को जो करना है वह "अद्याहं" श्लोक में कहते हैं ।

श्लोक—अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः ।
नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ।।२२।।

श्लोकार्थ—आज मैं जिसने मेरी बहन बलपूर्वक हरण की है, उस दुर्बुद्धि ग्वाले का वीर्यमद तीक्षण बाणों से हरण करूँगा ।।२२।।

सुबोधिनी—निशितैरिति । सहार्थे तृतीया । सुदुष्टेष्वपि मतिर्यस्येति । गोपालत्वं शब्दतो न दोषः, अभिप्रायतस्तथा भवति, तत्प्रकृतेनाङ्गीक्रियत इति, नान्यथा वक्तव्यम् । वीर्यजनितो यो मदः तमहं नेष्ये ग्रहीष्यामि, येन भगवता कृत्वा मदं प्राप्स्यामीत्यर्थः । पूर्वं नास्माकं गर्वः स्थितः, अधुना भगवत्सम्बन्धात् नास्मत्सदृशा वीराः सन्तीति गर्वो भविष्यति । क्षत्रियाणां वीर्यमेव महत्त्वसूचकमिति न मदमात्रं निरूपितम् । ननु भगवतो हेतुत्वं कथमित्याह येन मे स्वसा प्रसभं हृतेति । बलात्कारेण हरन् वीर्यं शिक्षां चोपदिष्टवान् । बाणानपि प्राप्स्यामि वीर्यमपीति । ससाधनबलप्राप्तिर्भगवदाभिमुख्यगमने फलमित्यर्थः । तत्सम्मुखमेव गन्तव्यमिति नियोगः ।।२२।।

व्याख्यार्थ—निशितैः बाणैः पदों में जो तृतीया विभक्ति है वह 'साथ' के अर्थ में दी हुई है, सुदुष्ट कार्यों में जिसकी बुद्धि लगी हुई है, वैसे गोपाल के "गोपालपन" शब्द से दोष वाला नहीं है, किन्तु अभिप्राय से वैसा होता है, वह अभिप्राय चालू प्रसंग से अंगीकार किया जाता है, अन्य प्रकार से नहीं कहना चाहिए, उसको जो वीर्य से मद उत्पन्न हुआ है वह मैं ले लूंगा, जिससे उस भगवान् के मद लेने से मैं मद को प्राप्त होऊँगा पहले हम लोगों में मद नहीं था अब भगवत्सम्बन्ध से प्राप्त 'वीर' मद से ऐसा गर्व होगा, कि हमारे समान कोई वीर नहीं है यो कहने से न केवल मद का निरूपण किया, किन्तु यह बताया कि क्षत्रियों का महत्व प्रकट करने वाला साधन वीर्य ही है भगवान् का इसमें हेतुपन कैसे ? इस पर कहता है कि जिसने मेरी बहन बलात्कार से हरण कर वीर्य और शिक्षा का उपदेश दिया है इस कार्य करने से हमको जताया है कि वीर बनो, नहीं तो तुम्हारी स्त्रियाँ यों हरी जाएगी, जिससे बाणों को प्राप्त करूँगा और वीर्य को भी, साधन और बल इन दोनों की प्राप्ति भगवान् के सम्मुख होने का फल है अतः उसके सम्मुख हो जाना चाहिए, इसलिए नियोग कहा है ।।२२।।

आभास—विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् ।
रथेनैकेन गोविन्दं तिष्ठ तिष्ठेत्यथाब्रवीत् ।।२३।।

श्लोकार्थ—ईश्वर के सामर्थ्य को न जानने वाला, वह कुमति रुक्मी बकवाद करता हुआ एक ही रथ से भगवान् को कहने लगा कि "ठहर ठहर" ॥२३॥

सुबोधिनी—विशेषेण कत्थमानः असम्बद्धमिव भाषमाणः। भगवान् हि महत्या प्रार्थनया तां हृतवान्, न तु बलादिति असम्बद्धता। नन्वचिन्त्यैश्वर्यं भगवतः श्रुत्वा दृष्ट्वा च कथमेवं वदतीत्याशङ्क्याह कुमतिरिति। ऊहादौ न तस्य सामर्थ्यम्। स हि सर्वमेव यथाकथञ्चिज्ज्ञातमिति भगवच्चरितं मन्यते। तत्र प्रमाणमाह ईश्वरस्याप्रमाणविदिति। ईश्वरस्य प्रमाणं सामर्थ्यं न जानाति। प्रमाणशब्दः आदरणीयपरोऽपि कचित्परिमाणवाच्यपि, प्रमाणं परिमाणमिति। यथा अत्रैव। 'विदुः प्रमाणं बलवीर्ययोर्वे'त्यत्र च। उपसर्गस्य अन्योपसर्गार्थत्वात् न नानार्थत्वं समुदायस्य। एवं दुर्बुद्धिरेकेनैव रथेन भगवत्समीपं गत्वा गोविन्दं भक्तकृपालुं सन्मात्रस्यैवेन्द्रम्, अत एव रुक्मिणीं हृत्वा गच्छन्तं तिष्ठ तिष्ठेत्यब्रवीत्। द्विरुक्तिः आदरे अधिक्षेपे वा। चकारात् स्तुतिवाक्यान्यन्यानि वा ॥२३॥

व्याख्यार्थ—रुक्मी असम्बद्ध जैसे शब्द कहने लगा, उसके शब्द असम्बद्ध क्यों थे ? जिसका कारण बताते हैं, कि भगवान् ने तो बहुत प्रार्थना करने से उसका हरण किया था, न कि बलात्कार से हरण किया था इसलिए उसके शब्द असम्बद्ध थे, भगवान् का अचिन्त्य ऐश्वर्य सुनकर तथा देखकर भी इस प्रकार बकवाद क्यों कर रहा है ? इसके उत्तर में कहा है कि "कुमति" हीन बुद्धिवाला है, जिससे पूर्वापर का विचार नहीं कर सकता है वह यह, सर्व भगवत्चरित्र जैसे तैसे अकस्मात हो गया है यों मानता है, क्योंकि भगवान् के सामर्थ्य को नहीं जानता है, "प्रमाण" शब्द आदरणीय अर्थ में भी आता है और कहीं 'परिणाम" में आता है, जैसे यहाँ ही "विदुः प्रमाणं वीर्ययोर्वा" इस श्लोक में आया है, उपसर्ग का अन्य उपसर्ग का अर्थ होने से समुदाय का नाना अर्थ पन नहीं होता है, इस प्रकार वह दुर्बुद्धि एक ही रथ में भगवान् के समीप जा कर भक्तों पर कृपा करने वाले सन्मात्र के इन्द्र गोविन्द को, जो कि इस कारण से ही रुक्मिणी को हरण कर ले जा रहे हैं उनका ठहर ठहर, यों दो बार कहने लगा, दो बार आदर में, या तिरस्कार में कहा जाता है, "च" पद से स्तुति वाक्य वा अन्य है ॥२३॥

आभास—तथोक्ते भगवान् स्थितः। तदा यत्कृतवांस्तदाह धनुर्विकृष्येति।

आभासार्थ—इस प्रकार कहने से भगवान् ठहर गए तब जो किया उसका वर्णन 'धनुर्विकृष्य" श्लोक में कहते हैं।

श्लोक— धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः ।
आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन ।।२४।।

श्लोकार्थ—धनुष को दृढ़ खेंचकर तीन तीर श्रीकृष्ण को मारे और बोला कि यदुकुल कलंक क्षण भर यहां ठहर ।।२४।।

सुबोधिनी—स्तुतिपक्षे मदुद्धारमकृत्वैव केवलं रुक्मिणीहरणमयुक्तमिति वाक्यानामर्थः । नन्वनधिकारी कथं कृतार्थीकर्तव्य इत्याशङ्क्य स्वाधिकारनिरूपणार्थं युद्धं प्रदर्शयतीति धनुर्विकृष्येति । सुदृढमिति सुष्ठु प्रतिज्ञायां दृढम् । भगवन्तमालक्ष्य स्वशौर्यं प्रदर्शयन् । त्रिभिः शरैः अर्थाल्लोकत्रयं जघ्ने । शरो ह्युपर्यावरणभूतो रसानाम्, तत्र जलस्य पृथिवी शरो भवति, अन्तरिक्षमपि वायोः, स्वरपि ब्रह्माण्डस्य, सर्वं भगवते निवेदितवानिति वा । हस्तो हि हन्तीति हस्तेन दत्तवानित्यर्थः । न केवलं सर्वस्वनिवेदनमेव कृतवान्, किन्तु वाक्यमप्युक्तवान्, अन्यथा वाचनिकं न दत्तवानिति स्यात् । आह चात्र इति । भगवन्तं प्रति विज्ञापनार्थमाह । चात्रे चरणयोग्ये हृदये सात्त्विके क्षण तिष्ठ । ननु किं स्यात् स्थित इत्याशङ्क्याह यदूनामिति । यदूनां कुलं पान्तीति कुलपाः, कुलपा वा माया, तान् तां वा अंसेन क्रियाशक्त्या नयतीति तथा । ये केचन यादवानां रक्षकाः, तान् सर्वानेव वैकुण्ठं प्रापयति । अत एव भक्तवत्सलः अस्मद्धृदयेऽपि क्षणं स्थितः अस्मदीयान् अस्मदुपकारिणश्च वैकुण्ठं नेष्यतीति तदर्थं प्रार्थना ।।२४।।

व्याख्यार्थ—ऊपर के श्लोक में "च" का आशय स्तुति वाचक भी कहा है उसका आशय स्पष्ट करते हैं, कि "मेरा उद्धार न कर, केवल रुक्मिणी को ले जाना युक्त नहीं है यों वाक्यों का भाव है", यदि कहो कि जो अधिकारी नहीं है उसको कृतार्थ कैसे किया जाय ? अतः अपना अधिकार दिखाने के लिए युद्ध कर, अपनी शूरवीरता रूप अधिकार से परिचित करते हैं । पहले तो जो प्रतिज्ञा की, उस पर दृढ़ हूँ इसको सिद्ध करने के लिए धनुष का एंचा, भगवान् को लक्ष्य कर अपनी शूरवीरता दिखाने लगा, तीन शरों से मानों तीन लोकों का हथियाने लगे, शर रसों के ऊपर का आवरण रूप है, जैसे कि जल का शर पृथिवी है, वायु का शर अन्तरिक्ष है, और ब्रह्माण्ड का स्वर्ग शर है अथवा इस प्रकार सर्व भगवान् को निवेदन किया, हस्त ही गति करता है, इसलिए हाथ से निवेदन किया अर्थात् दिया यों भाव है, केवल सर्वस्व ही नहीं दिया किन्तु वाणी भी निवेदित की है यदि वे निवेदन नहीं करते तो कार्य अधूरा हो जाता है अतः "आह चात्रे" इस वाक्य से भगवान् को वाणी का निवेदन करते हुए प्रार्थना करता है मेरे चरण धरने के योग्य सात्विक हृदय में क्षणमात्र ठहरने की कृपा करो, यों ठहरने से कौनसा लाभ होगा ? आप यादवों के कुल के रक्षक हो तथा यादवों की माया

को अपनी क्रिया शक्ति से खेंचते हो जिससे जो कोई भी यादवों के रक्षक हैं उन सब को भी बैकुण्ठ पहुँचाते हैं, अतः वैसे आप भक्तवत्सल हमारे हृदय में भी क्षण मात्र स्थित होंगे तो हम लोगों को तथा हमारे उपकारियों को भी बैकुण्ठ ले चलोगे, इसलिए यह प्रार्थना है ॥२४॥

श्लोक—कुत्र यासि स्वसारं मे मुषित्वा ध्वाङ्क्षवद्धविः ।
हरिष्येऽद्य मदं मन्द मायिनः कूटयोधिनः ॥२५॥

श्लोकार्थ—हे मन्द ! जैसे कौए को छोड़ हवि ली जाती है, वैसे आप मेरी बहिन को मेरे परोक्ष में चुराकर कहाँ ले जा रहे हो, छली, कपट युद्ध करने वाले आपका गर्व आज मैं हरण करूँगा ॥२५॥

सुबोधिनी—किञ्च, कुत्र यासीति । जीवानां स्वसा ब्रह्मानन्दो भवति । सम्बन्धमात्रं स्वांशि न आनन्द इति । नतु कदाचिदप्यनुभवः, अतः स्वसैव भवति । तां गृहीत्वा अस्मदुद्धारमकृत्वा उद्धृतानेव यादवान् उद्धर्तुं किमर्थं गच्छसीत्यर्थः । मुषित्वेति । परोक्षं हृत्वा । जीवानां निकटेऽपि ब्रह्मानन्दः स्थितः जीवैर्न दृश्यते, अनुभवति भगवानेव । ध्वाङ्क्षवदिति । यथा ध्वाङ्क्षं विहाय हविर्नीयते । ध्वाङ्क्षो हविर्न भवति । अन्यत्सर्वं जगत्युत्पन्नं हविर्भवति, भगवान् सर्वयज्ञभोक्ता, तत्र सर्वे पशवः, काकं विहाय । तथा सर्वजगदुद्धारार्थमागतः मामेव विहाय कथं गच्छसीत्यात्मनो धिक्कारः । हविरपि परोक्षमेव गृह्यते । 'परोक्षप्रिया (इव हि) देवाः प्रत्यक्षद्विष'इति । तर्हि त्वयैव काकदृष्टान्त उक्त इति त्वमग्राह्य एवेति चेत्, तत्राह हरिष्येऽद्य मदं मन्देति । मन्द मदं स्वस्मिन् दोषात्मकं यद्वशात् त्वया कृपा न विधीयते । मन्दमायिनो वा मन्दा माया अस्यास्तीति । अनेन माया मन्दैव क्रियते, नकार्यक्षमा भवति, कूटयोधिनो मायिनो भगवतः स कपटेनैव युद्धं करोति, वस्तुतो मुक्तिं प्रयच्छति । एतादृशे भगवति स्थिते प्रतिबन्धकत्वेन समागत स्वधर्मं दूरीकरिष्यामीति वचनं युक्तमेव ॥२५॥

व्याख्यार्थ—कहाँ जा रहे हो ? जीवों की बहन ब्रह्मानन्द है, जहाँ भी कुछ सम्बन्ध होता है, वहाँ अंशो का अपना आनन्द ही है, कभी भी उसका अनुभव तो नहीं किया जा सकता है, अतः उसको बहन ही माना जाता है । हम लोगों का उद्धार न कर उसको लेकर जिन यादवों का पहले ही उद्धार कर दिया है पुनः उनके उद्धार के लिए क्यों जा रहे हो ? उसको हमारे परोक्ष में ले जा रहे हो जीवों के पास ब्रह्मानन्द है जिसको जीव देख नहीं सकते हैं भगवान् ही उस ब्रह्मानन्द का अनुभव

कर रहे है, जैसे कौवे के सिवाय जगत में उत्पन्न पदार्थ हवि है, उन को हवि के लिए लाया जाता है कौवे को छोड़ दिया जाता है भगवान् ही सर्व यज्ञ भोक्ता हैं, वहाँ सर्व काक के सिवाय, हवि हो सकते हैं, वैसे जगत् के उद्धार के लिए प्रकट हुए आप मुझे ही छोड़ कर कैसे जा रहे हो ? यों कहने से अपने को धिक्कारा है, हवि भी परोक्ष ही ग्रहण की जाती है "देवता प्रत्यक्ष के द्वेषी हैं, परोक्ष के प्रिय हैं, यदि कहो कि तूने ही अपना दृष्टान्त देकर काक बनाया है, इसलिए तू ग्रहण करने योग्य नहीं है, तो वैसा जो आपका मद है आज मैं उसको नाश कर दूंगा, हे मन्द ! आप में यह मद रूप दोष है जिससे आप मुझ पर कृपा नहीं करते हो, अथवा "मन्दमायिन" समासान्त पद कर अर्थ करता है, कि आपकी माया को मन्द कर देता हूँ। जिससे वह कार्य कर नहीं सके, भगवान् युद्ध तो कपट से ही करते हैं, वास्तव में वे उससे मोक्ष देते हैं, ऐसे भगवान् के प्राप्त होने के समय, प्रतिबन्ध करने वाले अपने धर्म को दूर करूँगा, यों कहना योग्य ही है ।।२५।।

आभास— तर्हि कथं त्वमुद्धर्तव्य इत्याकाङ्क्षायां ब्रह्मानन्दमस्मभ्यं प्रयच्छेत्याह यावन्न मे हतो बाणैरिति ।

आभासार्थ —यदि कहो, कि तेरा उद्धार तूं किस प्रकार चाहता है ? इसके उत्तर में कहता है, कि "ब्रह्मानन्द" हमको दो, यों "यावन्न मे हतो" श्लोक में वर्णन करता है ।

श्लोक — **यावन्न मे हतो बाणैः शयीथा मुञ्च दारिकाम् ।**
स्मयन् कृष्णो धनुश्छित्त्वा षड्भिर्विव्याध रुक्मिणम् ।।२६।।

श्लोकार्थ—जब तक मेरे बाणों से मरे हुए तुमको पृथ्वी पर नहीं सुलाता हूँ उससे पूर्व, रुक्मिणी को छोड़ दे, ये वचन सुन, कृष्ण मुस्कराते हुए, उसके धनुष को तोड़ कर, छः बाणों से रुक्मी को वेधित किया ।।२६।।

सुबोधिनी—मे बाणाः मन्मारकत्वेन समागतानीन्द्रियाणि तैर्यावन्न हतः, यदीन्द्रियाणि त्वद्रसं प्राप्स्यन्ति, तदा ब्रह्मानन्दं नापेक्षन्ते, तदा भक्तिमेव ग्रहीष्यन्ति, तावत्पर्यन्तं ब्रह्मानन्दो देय इत्यर्थः । यतः सा दारिका मुक्तिः संसारं विदारयिष्यति । भक्तेः पूर्वं मुक्तिप्रार्थना युक्तैव । ननु कोऽयमाग्रह इदानीमेव फलं देयमिति, तत्राह शयीथा इति । यावत्प्रलये सर्वं संहृत्य शयनं करिष्यसि, ततः पूर्वं माचयेत्यर्थः । एवमुक्तो भगवान् हास्येन तं व्यामोहयन् दुरात्मायं मर्तुकामः समायातीति, स्वयं भगवान् स्त्रीणां हितकर्ता, रुक्मिणी न त्याज्येति, तस्य धनुः छित्त्वा येन शरान् प्रक्षिप्तवान् तत् दूरीकृत्य, षड्भिः शरैः रुक्मिणं विव्याध । षोढा विहितो हि पुरुषः । ततः सर्वाङ्गेषु ताडितवान् ।।२६।।

व्याख्यार्थ—मेरे बाण, मुझे मारने के लिए आई हुई ये इन्द्रियाँ, उनसे जब तक मैं न मारा गया हूँ, अर्थात् यदि ये इन्द्रियाँ आपका रस पान करेगी, तो ब्रह्मानन्द की इच्छा न करेगी, किन्तु तब भक्ति को ही ग्रहण करेगी, जब तक हो तब तक तो ब्रह्मानन्द देना चाहिए, क्योंकि वह द्वारिका अर्थात् मुक्ति संसार को नष्ट कर देगी, भक्ति से पहिले मुक्ति की प्रार्थना करनी योग्य ही है, अब ही फल देना चाहिए यह आग्रह कैसा वा क्यों है ? इस पर कहता है कि "शयीथा" प्रलय में सब को लपेट कर आप शयन करो, उससे पूर्व ही, मेरी मुक्ति करो, इस प्रकार जब भगवान् को कहा, तब भगवान् मुसकराने लगे, जिससे उसको मोह में डाल दिया, भगवान् ने मन में सोचा कि यह तो दुरात्मा है, मरने के लिए ही आ रहा है स्वयं भगवान् तो स्त्री हितकारी हैं, इसलिए रुक्मिणी को छोड़ना योग्य नहीं है, उसके धनुष को तोड़ कर उसके फेंके हुए तीरों को दूर हटा कर छः शरों से रुक्मी को बींधा "पुरुष छः प्रकार का है" इसलिए छः शरों से सब अंगों में ताड़ना की ॥ २६ ॥

श्लोक—अष्टभिश्चतुरो वाहान् द्वाभ्यां सूतं ध्वजं त्रिभिः ।
सचान्यद्धनुरादाय कृष्णं विव्याध पञ्चभिः ॥२७॥
तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः ।
स चान्यद्धनुरात्त तदप्यच्छिनदच्युतः ।
पुनरन्यदुपादत्त तदप्यच्छिनदच्युतः ॥२८॥

श्लोकार्थ—और आठ बाण चार घोड़ों को, दो सारथी को तथा तीन से ध्वजा को वेधित किया, तब रुक्मी ने दूसरा धनुष लेकर पांच तीर कृष्ण के पास फेंके, उन शरों से ताड़ित कृष्ण ने वह भी तोड़ दिया, फिर भी उसने दूसरा धनुष उठाया तो उसको भी भगवान् ने तोड़ दिया ॥२७-२८॥

सुबोधिनी—ततः अष्टभिः द्वाभ्यां द्वाभ्यां एकैकं चतुरो वाहान् अश्वान् विव्याध ।द्वाभ्यां च सूतम् ।एते त्रिधा छिन्नाः पञ्चापि । ध्वजश्चतुर्धा छिन्नः । एवं साक्षात्परंपराङ्गानि सर्वाण्येव भिन्नानि । तच्छेदनार्थं प्रवृत्तेनैव बाणेन धनुश्छिन्नमिति न धनुषो भेदे पृथक् शरा उक्ताः । तदा सोऽप्यन्यत् धनुरादत्त । भगवानपि प्राणिघातकं धनुर्विहाय अन्यद्धनुर्गृहीतवानिति चकारेण ज्ञायते । तदपि आच्छिनत् ग्रहणमात्रेणैव, तत्र हेतुः अच्युत इति । स्वयमच्युतः, देववरप्राप्तं च धनुः । अतस्तच्छरस्य वैयर्थ्यसम्पादनात् पूर्वमेव तच्छिन्नम्, ततोऽन्यदपि गृहीतवानित्याह पुनरन्यदुपादत्तेति । 'त्रिसत्या हि देवा' इति धनुषः त्रिर्ग्रहणम् ॥२७-२८॥

व्याख्यार्थ—रुक्मी के रथ के चार घोड़े थे, एक एक घोड़े को दो दो शरों से बोधित किया, दो शरों से सूत को, ये पांच, चार घोड़े और एक सूत तीन प्रकार कट गए, ध्वजा के चार टुकड़े हो गए, इस प्रकार साक्षात् वा परम्परा से सब अंग जुदे-जुदेहो गए, उसको तोड़ने के लिए प्रवृत्त बाणसे ही धनुष टूट गया इसलिए धनुष तोड़ने के लिए जुदे तीरों को नहीं कहा है, तब उसने भी दूसरा धनुष लिया भगवान् ने भी प्राणियों के घातक धनुष को त्याग, दूसरा धनुष उठाया, यह आशय 'च' शब्द से ज्ञात होता है रुक्मी ने जो दूसरा धनुष उठाया था वह लेते ही भगवान् ने तोड़ दिया, क्योंकि आप अच्युत है और धनुष को देवताओं का वर मिला हुआ है, अतः उस शर की व्यर्थता होने से, पहले वह धनुष तोड़ दिया, पश्चात् दूसरा भी ग्रहण किया, शास्त्र में कहा है कि 'त्रिसत्या हि देवाः' इसलिए धनुष का तीन बार ग्रहण हुआ है ।।२-७२८।।

श्लोक—परिघं पट्टिशं शूलं चर्मासीशक्तितोमरम् ।

यद्यदायुधमादत्त तत्सर्वं सोऽच्छिनद्विभुः ।।२६।।

श्लोकार्थ—उसने लोहे के मुद्गर, पट्टिस, त्रिशूल, ढाल, तलवार, बरछी, भाला आदि जो जो शस्त्र हाथ में लिए उन सबको प्रभु ने तोड़ दिया ।।२६।।

सुबोधिनी—ततः परिघादीन् गृहीतवान् । चर्मासी इति दीर्घः छन्दसः । चर्मादिपदमेकं तामरान्तम् । किंबहुना । यद्यदायुधमादधात्, देवतादिप्रेरणया, स्वतो वा, तत्सर्वमेवाच्छिनत् । एवं करणे सामर्थ्यं विभुरिति ।।२६।।

व्याख्यार्थ—पश्चात् उसने परिघ आदि शस्त्र ग्रहण किए मूल में "चर्मासी" पद दीर्घ है, वह वैदिक है, चर्म से लेकर तोमर तक एक ही पद है, बहुत कहने से क्या लाभ ? वह देवता आदि की प्रेरणा से वा स्वतः जो जो शस्त्र उठाए वे सब तोड़े गए, इस प्रकार करने में सामर्थ्य इसलिए थी जो आपका नाम ही "विभु" है अर्थात् सब कुछ करने में शक्तिमान है ।।२६।।

आभास—ततोऽतियत्नेन सर्वभावेनागत इत्याह ततो रथादवप्लुत्येति ।

आभाष- पश्चात् बहुत जतन से सर्व भाव से आया, जिसका वर्णन "ततो रथाद" श्लाक में करते हैं ।

श्लोक—ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया ।

कृष्णमभ्यद्रवत्क्रुद्धः पतङ्ग इव पावकम् ।।३०।।

श्लोकार्थ—पश्चात् क्रोध युक्त हस्त में तलवार लेकर रथ से नीचे उतरकर मारने की इच्छा से कृष्ण के पास यों आने लगा ज्यो पतंग अग्नि के पास आता है ॥३०॥

सुबोधिनी—केवलं खड्गपाणिः, न तु चर्मापि । जिघांसयेति जीवननिरपेक्षः आत्मानमेव भगवद्द्वारा मारयितुं कृष्णंपरमानन्दमभ्यद्रवत् । युक्तमेव हि प्राकृतं परित्यज्य परमानन्दो ग्राह्य इति । तथापि शरीरं प्रियं सर्वस्यापोति कथं तथा समागत इति चेत्, तत्राह पतङ्ग इव पावकमिति । ते हि सूक्ष्माः अग्नावात्मानं पातयित्वा परमार्थदृष्ट्या कृतार्था भविष्यन्ति, बहिर्दृष्ट्या तु अग्निं मारयिष्याम इति बुद्ध्या प्रवृत्ताः स्वयं म्रियन्ते । तथायमपि प्रवृत्त इत्यर्थः ॥३०॥

व्याख्यार्थ—हाथ में केवल तलवार थी, ढाल नहीं थी, मरने की इच्छा से अथवा भगवान् से अपने को मरवाने के लिए, परमानन्द स्वरूप कृष्ण के निकट आने लगा, प्राकृत को छोड़ परमानन्द ग्रहण करना योग्य ही है, यदि कहो कि जब शरीर सब को प्यारा है तब इस प्रकार कैसे आया ? इसका उत्तर देते हैं कि जैसे पतंग अग्नि की तरफ आता है, क्योंकि वे सूक्ष्म अपने को अग्नि में डाल कर परमार्थ दृष्टि से कृतार्थ बन जावेंगे बहिर्दृष्टि से अग्नि को हम बुझा देंगे इस बुद्धि से प्रवृत्त होते हैं, किन्तु अग्नि को न बुझाकर स्वयं मर जाते हैं वैसे यह भी, प्रवृत्त हुआ है यह अर्थ है ॥३०॥

आभास—ततो भगवानक्लिष्टकर्मा तस्याभिलषित कुर्वन्, 'ये यथा मां प्रपद्यन्त' इति च वाक्यं सत्यं कुर्वन्, तन्मारणार्थं प्रवृत्त इत्याह तस्य चापतत इति ।

आभासार्थ—अनन्तर अक्लिष्ट कर्मा भगवान् उस की अभिलाषा पूर्ण करते हुए और "ये यथामां प्रपद्यन्ते" इस वाक्य को सत्यता सिद्ध करते हुए, उसको मारने के लिए प्रवृत्त हुए, जिसका वर्णन "तस्य चापततः" श्लोक में करते हैं ।

श्लोक—तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः ।
छित्वासिमादधे तिग्मं रुक्मिणं हन्तुमुद्यतः ॥३१॥

श्लोकार्थ—आते हुए उस रुक्म के ढाल तथा तलवार के, बाणों से तिल जितने टुकड़े कर दिए, और तेज तलवार लेकर रुक्म को मारने के लिए उद्यत हुए ॥३१॥

सुबोधिनी—तादृशस्यापि खड्गं चर्म च इषुभिः चिच्छेद। चर्मापि गृहीतं खड्गकोशो वा। तिलशश्छेदनं स्वशौर्यख्यापनार्थम् । तद्रुधिरमेव वा तत्र प्रवहज्जलात्मकं सत् तस्य परलोक उपतिष्ठेतेति तत्सतिलं कृतवानित्यर्थः । एवं धनुरघातकमति निर्जीवान् छित्वा तद्वधार्थं खड्गं गृहीतवानित्याह असिमादध इति । एतस्मिन् हते जगति स्वरूपाज्ञानं निवर्तेतैव । यतोऽयं रुक्मी मुख्यो भगवद्द्विट् । अतो भगवान् तं हन्तुमुद्यतो जातः, न तु मारितवान् ।।३१।।

व्याख्यार्थ—ऐसे को भी तलवार और ढाल अथवा म्यान को तीरों से तोड़ दिए, ढाल भी ग्रहण की थी अथवा म्यान ग्रहण की थी, अपनी शूरवीरता को प्रसिद्ध करने के लिए तिल के समान टुकड़े किए हैं, यों करने से जो रुधिर बहने लगा वह जल रूप होकर, परलोक में मिलने वाला हो गया वह तिल सहित करने के लिए हो असि (तलवार) आदि के टुकड़े तिल के समान किए हैं जिससे पितृपन को पितृलोक में तर्पण के लिए तिलोदक का सम्पादन हो गया. धनुष तो घात करने वाला नहीं है, जिससे जड़ पदार्थों को काटकर उसके मारने के लिए तलवार ग्रहण की है, इसके मरने पर जगत् में स्वरूप का अज्ञान मिटेगा हो, क्योंकि यह रुक्मी भगवान् का मुख्य शत्रु है, अतः भगवान् उसको मारने के लिए उद्यत हुए. न कि मारा ।।३१।।

आभास— एवं स्वरुपाज्ञाननाशो मायाया हितकारी न भवतीति रुक्मिणी तन्निषेधार्थं प्रवृत्तेत्याह दृष्ट्वेति ।

आभासार्थ—इस प्रकार स्वरूप के अज्ञान का नाश, माया का हित करने वाला नहीं होता है, इसलिए "रुक्मिणी" उसका निषेध करने के लिए प्रवृत्त हुई जिसका वर्णन "दृष्ट्वा" श्लोक में करते है ।

श्लोक दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला
पतित्वा पादयोर्भर्तुरुवाच करुणं सती ।।३२।।

श्लोकार्थ—भ्राता को मारने का कृष्ण का उद्यम देख, सती रुक्मिणी भय से विह्वल हो, पति के चरणों में पड़कर करुण वचन कहने लगी ।।३२।।

सुबोधिनी—रुक्मिणी प्रार्थयितुमुवाच । यद्यपि दुष्टो भवति, तथापि स्वार्थं तावत्करोतीति । यदर्थं यो यतते, तेन प्रतिकर्तव्यमिति तस्या उद्योगः । तत्रापि भ्राता, तस्यापि वधोद्योगः, । तत्रापि वधात्पूर्वं स्वयं दृष्टः, स्वयं च रुक्मिणी तत्सम्बन्धिनी । पश्चाद्भयेन विह्वला

जाता । क्रोधे कदाचिदात्मानमपि मारयेत्, लोके चापकीर्तिर्भवेत्, बलाद्भगवन्तमाहूय भ्रातरं मारितवतीति बह्व एव पक्षाः भयहेतवो वर्तन्ते । अतो भयैः कृत्वा विह्वला स्वयमपि शुष्कानना जाता । अत्यन्तं विज्ञा उपायान्तरमलभमाना मत्पतिरयमिति भर्तुः पादयोः पतित्वा उक्तवती । चरणपातेन देहेन निवारणम् । विह्वलतया मनसा निवारणम् । वाचा च निवारयति । नन्वीश्वरो भगवान्, कथमेतन्निवारितो निवर्ततेति चेत् तत्राह करुणमिति । करुणं यथा भवति, तथा उवाच, नतु प्रौढ्या । किञ्च । पतिव्रताया न ह्यन्य उपायोऽस्ति सर्वत्र भर्तृप्रार्थनाव्यतिरेकेण, तदाह सतीति ॥३२॥

व्याख्यार्थ—रुक्मिणी प्रार्थना करने के लिए ये वचन कहने लगी यद्यपि दुष्ट है, तो भी जो कर रहा है, वह स्वार्थ के लिए कर रहा है, जो जिस लिए प्रयत्न करता है, उसका यह कार्य पूरा करना चाहिए, इसलिए उसका उद्यम है, उसका भी भाई उसके भी वध का उद्योग ? उसमें भी बध से पहले स्वयं आपने देखा है, और रुक्मिणी उसको सम्बन्धी है, इसलिए उद्यम आदि देख विह्वल हो गई है, क्रोध आने पर कभी अपने को भी मार डाले, जिससे लोक में निन्दा अपयश होगा, अपयश के कारण को स्पष्ट किया जाता है कि रुक्मणी ने जबर्दस्तो से भगवान् को बुलाकर भ्राता को मरवाया है, इस प्रकार बहुत पक्ष भय के कारण के हो सकते हैं, अतः भयों के कारण बिह्वल होने से शुष्क मुखवाली हो गई है, बहुत चतुर होने से दूसरा कोई इसका उपाय नहीं है, यह निश्चय कर, ये मेरे स्वामी हैं इसलिए इनके चरणों में गिरकर कहने लगो, रुक्मी तो मेरा भाई है इसका वध न करो, यह प्रार्थना देह, मन और वाणी से करने लगी, चरणों में गिर कर देह से भ्राता के वध को रुकवाने लगी, विह्वलता दिखाकर मन से रुकवाने लगी, भगवान् ईश्वर हैं, वे इसके रोकने से कैसे रुकेंगे ? यदि यों कहो, तो कहते हैं कि करुण वाणी से प्रार्थना की, भगवान् दयालु हैं, करुणा के वचनों से द्रवित हो जाते हैं, फिर उसमें विशेषता यह है कि पतिव्रता के पास सर्वत्र पति को प्रार्थना करने के सिवाय अन्य कोई उपाय नहीं है, इसलिए रुक्मिणी को "सती' 'विशेषण दिया है ॥३२॥

आभास—तस्या वाक्यमाह योगेश्वरेति ।

आभासार्थ—'योगेश्वराप्रमे" श्लोक से उसके वचन कहते हैं ।

श्लोक—योगेश्वराप्रमेयात्मन्देवदेव जगत्पते ।
हन्तुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥३३॥

श्लोकार्थ—हे योगेश्वर ! अप्रमेयस्वरूप ! हे देवों के देव ! हे जगत् के पति ! हे कल्याण ! हे महाभुज ! यह मारने योग्य नहीं है क्यों कि यह मेरा भाई है ॥३३॥

सुबोधिनी—ननु मारणार्थं समागतः, कथं निवार्यत इति चेत्, तत्राह योगेश्वरेति । भगवान् योगस्य नियन्ता अनेकानेवोपायान् जानाति, किं वधेनेति भावः । अनेनैव वाक्येन भगवता वधानुकल्पो मुण्डनं कृतम् । तच्च रुक्मिण्या मदुक्तमेव कृतमिति ज्ञात्वा, मुण्डनमनिवार्य, वाचाप्यनुक्त्वा, अन्तरेव तापं कृतवती । तदर्थं बलभद्रस्य सान्त्वनमित्यनवद्यम् । अनेन मारयितुं समागतः भ्राता तव मारयेच्चेत्, तया तव सुखं भवेदित्युपालम्भोऽपि निवारितः । किञ्च । अप्रमेयात्मन्निति । प्रमातुमप्ययोग्य आत्मा स्वरूपं यस्य, किं पुनः क्रियाविषयो भविष्यतीति शङ्कापि निवारिता । क्रिययैवानिष्टशङ्केति । किञ्च । देवानामपि देवस्त्वम्, देवा एवामराः, तत्र तव समागतस्यापि का चिन्ता भवेत् । किञ्च । जगत्पत इति । तस्यापि त्वं पतिः रक्षकः, अतः शिक्षैव कर्तव्या । अत एव हन्तुं नार्हसि, सुतरामिदानीम् । कल्याण अद्यैव कृतविवाहः, तत्रापि मे भ्रातरम् । शालको हि विवाहदिवसे मान्य इति । पश्चादपकारं करिष्यतीति चेत्, तत्राह महाभुजेति । महान् भुजः क्रियाशक्तिर्यस्येति सम्बोधनेन समाधानार्थं सामर्थ्यं स्मारितम् ।।३३।।

व्याख्यार्थ—भगवान् मारने के लिए उद्यमशील हुए हैं क्योंकि भगवान् को मारने के लिए आया है, वैसे समय रुक्मिणी कैसे रोकती है, कि इसको मारो मत इसके उत्तर में कहा है, कि रुक्मिणी भगवान् को कहती है आप योगेश्वर हैं, इसलिए योग के नियन्ता हो, जिससे उसको दण्ड देने के अनेक उपायों को जानते हो, तो वध करने से क्या लाभ ? इस रुक्मिणी के वचनों से ही भगवान् ने मारने के बदले उसके शिर का मुण्डन किया, जिसको देख रुक्मिणी ने समझा कि मेरे कहने से ही भगवान् ने इसका वध न कर मुण्डन किया है, इस कारण से मुण्डन में रुकावट न की । वाणी से अप्रसन्नता भी प्रकट नहीं की, अन्तःकरण में दुःख करने लगी, इस मुण्डन के लिए भी बलभद्रजी ने सान्त्वना दी, यों सब सुन्दर हो गया । बलरामजी के इस प्रकार रुक्मिणी को समझाने से बलरामजी ने अपने को उपालम्भ से बचा लिया, यों न होता, तो रुक्मिणी कदाचित् अपने भाई को कृष्ण से मरा हुआ देख, बलरामजी को कहती, कि अब तो आप प्रसन्न हुए, इस प्रकार के उपालम्भ से बच गए ।

भगवान् क्रिया का विषय बनेंगे अर्थात् भगवान् ने इस प्रकार का मेरे भ्राता का मुण्डन आदि से मृत्यु किया है, ऐसी शंका मिटाने के लिए भगवान् को "अप्रमेयात्मन्" कहा है अर्थात् आपका स्वरूप कोई समझ नहीं सकता है, कि यह कार्य क्यों हुआ, तथा कैसे हुआ, इसमें कौनसा रहस्य है, क्रिया होने से ही अनिष्ट की शंका होती है जहाँ क्रिया ही नहीं वहाँ अनिष्ट कैसा ? आप देवों के भी देव हैं, देव ही अमर हैं तो उनके भी देव जो आप यहाँ पधारे हैं तो फिर चिन्ता क्यों की जाय ? विशेष में आप जगत् के रक्षक हैं, वे मारेंगे तो नहीं, किन्तु शिक्षा ही कर्तव्य है, अतः किसी को मारना आपको योग्य नहीं है फिर अब तो आप कल्याण स्वरूप हैं अर्थात् विवाह कर वर राजा बने हैं ऐसे आनन्द के समय में वध तो नहीं करेंगे उसमें भी विशेषता यह है, कि यह तो मेरा भाई है, आपका साला है, विवाह के दिनों में तो साले का आदर किया जाता है, यदि आप

उत्तर में कहो, कि मैं अब छोड़ दूं तो यह पीछे अपकार करेगा, इसके उत्तर में कहती है, कि महा-भुज होने से आप में महान् सामर्थ्य है: यदि कुछ भी अपकार करे तो उसको उस समय दण्ड देने में आप समर्थ हैं ॥३३॥

आभास—एवं विज्ञापितः वधान्निवृत्तो वधानुकल्पं कृतवानित्याह तया परित्रासेति ।

आभासार्थ—इस प्रकार रुक्मिणी की प्रार्थना करने पर भगवान् ने रुक्मी को मारा नहीं, वध के बदले में, उसका मुण्डन किया, जिसका वर्णन नीचे के श्लोक में करते हैं ।

श्रीशुक उवाच-

श्लोक—तया परित्रासविकम्पिताङ्गया शुचावशुष्यन्मुखरुद्धकण्ठया ।
कातर्यविस्रंसितकेशमालया गृहीतपादः करुणो न्यवर्तत ॥३४॥

श्लोकार्थ—श्री शुकदेवजी ने कहा कि डर के कारण कम्पित अंग वाली, शोक से शुष्क कण्ठ वाली तथा निरुद्ध कण्ठ वाली कायरता से गिरे हुए केश तथा माला वाली, रुक्मिणी ने भगवान् के पाद पकड़ लिए. जिससे करुणा युक्त हुए भगवान्, रुक्म के वध से निवृत्त हो गए ॥३४॥

सुबोधिनी—परित्रासेन विकम्पितमङ्गं यस्याः । शोकेन च शुष्यन्मुखं रुद्धश्च कण्ठो यस्याः । कातरतया विस्रंसिताः केशाः मालाश्च यस्याः । गुणत्रयकार्यं तस्यां पूर्णं जातमित्युक्तं भवति । परित्रासः सत्त्वस्य, शोकस्तमसः, कातरता रजस इति । एवं विद्यमानानां गुणानामपगमात् केवलं सा दीनेति तादृश्या गृहीतपादः करुणावानेवं न्यवर्तत ॥३४॥

व्याख्यार्थ—भय से जिसके अंग काम्प रहे हैं, शोक से जिसका मुख शुष्क हो गया है और कण्ठ रुक गया है, कायर होने से केश मालाएँ जिसके गिर रहे हैं, यों होने से तीन गुणों का कार्य उसमें पूर्ण हो गया जैसा कि सतोगुण का कार्य भयभीत होना, तमोगुण का कार्य शोक होना और रजोगुण का कार्य कायर होना, इस प्रकार, विद्यमान गुणों के दूर हो जाने से वह दीन ही हो गई, वैसा ने कोई अन्याश्रय न जान कर भगवान् के चरण पकड़ लिए जिससे भगवान् दया से आर्द्र हो रुक्मो के वध से निवृत्त हो गए ॥३४॥

३५

**श्लोक—चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन्व्यरूपयत् ।
तावन्मदुः परसैन्यमुद्धतं यदुप्रवीरा नलिनीं यथा गजाः ।।३५।।**

श्लोकार्थ—दुष्ट कर्म करने वाले उसको, वस्त्र से बान्धकर मूंछ सहित मूंड मूंड के विरूप किया, यहाँ भगवान् ने यह किया, वहाँ जैसे हाथी कमलिनी का मर्दन करते हैं, वैसे वीर यादवों ने अभिमानी शत्रुओं की सेना का मर्दन कर दिया ।।१५।।

सुबोधिनी—वधानुकल्पो हि वपनं मुख्यम् । द्रविणादानं च । स्थानान्निर्वापणं तु तेनैव प्रतिज्ञातम् । अतस्तस्यैव चैलेन चोरवत्तं बद्ध्वा । स हि रुक्मिणीं नेतुमागत इति चोरदण्डः । तं प्रसिद्धम् । प्रसिद्धस्य तावतैव महती पीडा भवतीति । ततः असाधुकारिणं घातकं सश्मश्रुकेशं श्मश्रुकेशसहितं तं प्रकर्षेण वपन्, सेवकेन प्रेरणया विकृतरूपं कृतवान् । क्वचित्केशाः श्मश्रूणि च रक्षिताः, क्वचिन्मुण्डिताः, यथैव विकृतो भवति । प्रायेण एवंरूपः स सर्वदैव स्थितो यावन्मरणम् । अन्यथा भगवानेवं न कुर्यात् । यावद्भगवान् विरूपं करोति, तावत्तस्य परस्य शत्रोरुद्धतं सैन्यम् । न केवलमेतद्दोषेणैव सैन्यं हतम् । किन्तु सैन्यमपि दुष्टमिति तथा कृतवन्तः । अत्रत्या अपि समर्था इत्याह यदुप्रवीरा इति । अनायासेन मारणे दृष्टान्तः नलिनीं यथेति । बहवो वीराः गदसङ्कर्षणादयः, एका चाक्षौहिणी, अतो नलिनीमित्येकवचनम् ।।३५।

व्याख्यार्थ—वध का मुख्य अनुकल्प मुण्डन है और द्रविणा दान स्थान से निकालने की तो उसने ही प्रतिज्ञा की थी, अत: उसके ही वस्त्र से चोर की भाँति उसको बान्धा, क्योंकि वह रुक्मिणी को लेने के लिए आया था, इसलिए चोर जैसा दण्ड दिया गया 'उसको' शब्द कहने का आशय है कि वह प्रसिद्ध अनिष्टकर्म करने वाला घातक होने से दुष्ट है, अत: प्रसिद्ध को, इतनी से ही बड़ी पीड़ा होती है, जिससे भगवान् ने सेवक द्वारा उसका मूंछ सहित शिर मूंडवा के विरूप रूपी वध कर दिया, विरूप शब्द का आशय है कि मुण्डन एक विचित्र प्रकार से हुआ, जैसे मूछों का कुछ भाग काट दिया कुछ रखा वैसे ही शिर के बाल भी कहीं काटे कहीं छोड़ दिए दाढ़ी के बाल भी यों ही किए, जिससे वह विरूप हो गया इसका यह विरूप मरण पर्यन्त रहा, क्योंकि भगवान् ने इसको वध के बदले यह सजा दी थी अतः इसी प्रकार बालों को समूल छेदन किया जिससे वे पुनः निकले ही नहीं, यदि वैसा न हो, तो भगवान् इस प्रकार केवल नाम मात्र मुण्डन करावे ही नहीं, जब तक भगवान् उसको विरूप करते हैं, तब तक उस शत्रु की अभिमानी सेना को वीर यादवों में कुछ भी परिश्रम के विना जैसे हस्ती कमलिनी को उखाड़ता है, वैसे ही नष्ट कर दिया सेना को केवल रुक्मी के दोष के कारण नाश नहीं किया, किन्तु यह सेना भी दुष्ट है, इसलिए नाश किया, यादवों में गद सकर्षण आदि बहुत वीर थे और एक अक्षोहिणी भी थी, अतः "नलिनी" एक वचन दिया है ।।३५।।

आभास—एवं भगवत्कृतं रुक्मिनिग्रहणं निरूप्य भगवतः सकाशात् ज्येष्ठस्य बलभद्रस्य कृतं सान्त्वनमाह सार्धैरेव सप्तदशभिः कृष्णान्तिकमिति ।

आभासार्थ—इस प्रकार भगवान् का किए हुए रुक्मी के निग्रह का निरूपण कर, भगवान् की तरफ से ज्येष्ठ बलरामजी ने जो सान्त्वना की, उसका वर्णन "कृष्णान्तिकं" से साढ़े सत्रह श्लोकों में करते हैं ।

श्लोक—**कृष्णान्तिकमुपव्रज्य ददृशुस्तत्र रुक्मिणम् ।**
तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः ।
विमुच्य बद्धं करुणो भगवान्कृष्णमब्रवीत् ।।३६।।

श्लोकार्थ—वे बलभद्र आदि श्रीकृष्ण के समीप आए, वहाँ रुक्मी को देखा तो वह विरूप मरे हुए के समान हो गया था, तब विभु संकर्षणजी ने दया कर बन्धन में पड़े हुए को छोड़ कर कृष्ण को कहने लगे ।।३६।।

सुबोधिनी—मुख्यात्र रुक्मिणी समाधेया । मध्यमो रुक्मी । प्राकृताः सहायराजानः । अतः सेनया भगवतोऽपि कनिष्ठया ते हताः, भगवता च मध्यमः, भगवज्ज्येष्ठेन च सान्त्वनमुक्तमिति युक्तमत्र प्रकरणत्रयम् । सर्व एव तद्बलं हत्वा समागताः कृष्णान्तिकमुपव्रज्य विकृतं रुक्मिणं ददृशुः । तथाभूतमिति । विशेषतो न वक्तव्यम्, सोऽपि मूर्च्छितप्रायस्तिष्ठतीति । वधानुकल्पं निरूपयितुमाह हतप्रायमिति । विशेषतो रामस्तं तथाभूतं दृष्ट्वा सम्यक् कर्षणकारित्वात् सशिखवपनं च कर्माधिकारं समापयतीति, तत्रापि सङ्कर्षण एव कर्तेति, भगवतः तत् कर्तव्यं न भवतीति, स्वयं सङ्कर्षणः हन्तुमपि विभुः समर्थः । भगवता बद्धं विमुच्य कृष्णमब्रवीत् । ननु कथमेवं भगवत्कृतमन्यथा कृतवान्, तत्राह करुण इति । करुणा हि भगवता दुःखं प्रापितेष्वेव पुरुषेषु कृपया प्रतीकारार्थं यतन्ते । ननु तथापि भगवन्तं पृष्ट्वा तथा विधेयम्, किमिति स्वयमेव मोचितवान्, तत्राह भगवानिति । बलभद्रे आविर्भूतो भगवानेव मोचितवानित्यर्थः । एतदन्ता मध्ये सङ्कर्षण कथा, विशिष्टा त्वग्रे वक्तव्या । अत एव कृष्णमब्रवीत् । अव कृष्णपदं 'कृष्णो द्वितियः केशवः संबभुवे'ति कृष्णपुरम्, अतो ज्येष्ठत्वान्नानौचित्यम् ।।३६।।

व्याख्यार्थ—यहाँ समाधान कर, सान्त्वना देने के जो योग्य है, उनमें मुख्य रुक्मिणी है, मध्यम रुक्मी है और शेष प्राकृत राजा लोग हैं, अतः उनको भगवान् से भी कनिष्ठ सेना ने ही मारा है, भगवान् मध्यम में रहे और रुक्मी को भगवान् के बड़े भ्राता ने सान्त्वना दी, ये तीनों ही प्रकरण

युक्त ही हैं, सब यादव, उस सेना को नष्ट कर आए, कृष्ण के पास जाकर विरूप रुक्मी को देखा, विशेष न कह कर केवल 'तथाभूत'' कहा अर्थात् वह मूर्च्छित जैसा वहाँ पड़ा था भगवान् ने वध के बदले में जो मुण्डन कर विरूप किया था, जिससे वह मरे हुए के समान हो गया था । राम विशेष प्रकार से उसको वैसा देख, शिखा सहित वपन का कार्य सम्यक् प्रकार से, कर्षण कार्य होने से, यह कर्म अधिकार बिना हुआ है । इस कर्म का कर्ता संकर्षण ही है, भगवान् का यह कार्य नहीं है, स्वयं संकर्षण मारने में भी समर्थ है तो मुण्डन आदि कर्म करने का भी उनका अधिकार है इसलिए भगवान् से बान्धे हुए को खोल, छोड़कर कृष्ण को कहने लगे । शंका करते हैं, कि जो भगवान् ने किया है उसको अन्य प्रकार बलराम ने कैसे किया ? इसका उत्तर देते हैं कि "दयालु" हैं जो दयालु होते हैं, वे भगवान् से जिनको दुःख मिला है कृपा कर उनका भी प्रतीकार के लिए प्रयत्न करते हैं, यदि कहो तो भी भगवान् से पूछकर यों करना चाहिए था आपने स्वयं ही कैसे बन्धन से मुक्त कर दिया ? इसके उत्तर में कहा है, कि "भगवान्", मुक्त करने वाले बलराम नहीं है, किन्तु वह बलराम में विराजमान भगवान् ने ही मुक्त किया है, बीच में संकर्षण की कथा इतनी हो है, विशेष तो आगे कही जाएगी इस कारण से ही कृष्ण को कहने लगे, यहाँ "कृष्ण" पद शास्त्र में कहे हुए "कृष्णो द्वितीयः केशवः संबभूव" इस वाक्यानुसार जो कृष्ण है वह समझना चाहिए अतः बलरामजी बड़े हैं जिससे योग्यता नहीं है ।।३६।।

आभास—भगवन्तं प्रति कृतस्याननुमोदनमाह असाध्विदमिति ।

आभासार्थ—"असाध्विं" श्लोक में बलरामजी भगवान् के किए हुए मुण्डन आदि का अनुमोदन नहीं करते हैं ।

श्लोक—असाध्विदं त्वया कृष्ण कृतमस्मज्जुगुप्सितम् ।
वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः ।।३७।।

श्लोकार्थ—हे कृष्ण आपने यह बुरा कार्य किया है इससे अपनी निन्दा होगी यह कार्य हम को नहीं करना चाहिए, क्योंकि दाड़ी मूँछ मुण्डवाकर सुहृदों का विरूप करना उनका वध है ।।३७।।

सुबोधिनी—यत् कृतं तदग्रे वक्तव्यम् । तदसाध्वेव । मरणानन्तरमेव हि सर्वक्षौरं विधीयते । किञ्च । यत्कृतं तदस्मत्कृतम्, अस्मत्तः कृतम्, वयमेव हेतवः सङ्कर्षणरूपाः । न तु वामनस्तव कार्यम्, यतो जुगुप्सितमेतत् । परमार्थतोऽयमर्थः । व्यवहारेऽपि यद्यप्यस्य वपनं कर्तुं युक्तम्, अयमेतदर्ह एव, तथाप्यस्मज्जुगुप्सितमस्माकं तु नोचितमित्यर्थः। अधमभक्षकाया-

प्युत्तमैर्नाधमं भक्ष्यं दीयते, तदेवाह वपनं श्मश्रुकेशानामिति । श्मश्रूणां केशानां च सुहृदः सकाशात् वैरूप्यं वध एव । अतः सुहृत्वात् वधोऽनुचितः । एतदपि रुक्मिणोसान्त्वनार्थमेवेति ज्ञायते । उपसंहारबलीयस्त्वात् । उभयस्याप्रकरणित्वात् ॥३७॥

व्याख्यार्थ – जो किया वह आगे कहना योग्य नहीं है, वह बुरा है मरने के पीछे ही सर्व मुण्डन करवाया जाता है. किन्च, जो किया वह हमारा किया हुआ है हम से ही हुआ है, हम संकर्षण रूप ही इसमें कारण है न कि आप जो स्वामी हैं उनका यह कार्य है क्योंकि यह कार्य निन्दनीय है परमार्थ रूप से यही अर्थ है, हालांकि,व्यवहार के अनुसार इसका मुंडन कराना योग्य है यह इसके ही योग्यहै, तोभी यह अपने करने योग्य नहीं है, यदि कोई मनुष्य मांसादि अधम भोजन करने वाला हो, उसको भी उत्तम पुरुष वैसा अयोग्य भोजन नहीं देता है क्योंकि वैसा भोजन देने से, उत्तम पुरुष की ही निन्दा होती है सम्बन्धियों की तरफ से दाढी मूंछ आदि केशों का मुण्डन कराकर विरूप करना सम्बन्ध वाले का वध ही है, अतः सम्बन्धी होने से इस प्रकार भी वध करना उचित नहीं है, ये शब्द जो बलरामजी ने कहे वे विशेष में रुक्मिणी की सान्त्वना कराने के लिए ही कहे, यों समझा जाता है, दोनों का प्रकरण नहीं होने से भो उपसंहार बलवान होता है ॥३७॥

आभास—अतस्तामेव साक्षात् सान्त्वयति मैवास्मानिति ।

आभासार्थ—इस कारण से, उसको ही "मैवास्मान्" श्लोक से साक्षात् सान्त्वना देते हैं ।

श्लोक—मैवास्मान्साध्व्यसूयेथा भ्रातुर्वैरूप्यचिन्तया ।
सुखदुःखदो न चान्योऽस्ति यतः स्वकृतभुक्पुमान् ॥३८॥

श्लोकार्थ—हे साध्वि ! तेरा भाई विरूप हुआ है, इस चिन्ता से हमें दोष मत देना, क्योंकि प्रत्येक पुरुष अपने किए का फल सुख वा दुःख भोगता है दूसरा कोई सुख दुःख देने वाला नहीं है ॥३८॥

सुबोधिनी—हे साध्वि । पतिव्रताया भर्तृकृतं मन्तव्यमिति धर्मः । अतएव अस्मान्सर्वानेव मासूयेथाः, दोषारोपेण मा विचारय । यद्यपि मावकचित्तमपि समोचीनम्, भाव्ये च न दोषः कोऽपि, तथापि भ्रातुर्वैरूप्यचिन्तया तद्धर्मारोपात् कदाचिदसूया भवेत्, तां निवारयति । ननु लौकिकदृष्ट्या कर्तव्यैवासूया, कथं जरासन्धो मुक्तः, केवलः कथमयं मुण्डित इति चेत्, तत्राह सुखदुःखद इति । स्वकर्मवशादेव सुखदुःखानुभवः । सङ्कर्षणो हि ज्ञानप्रधानः । अन्यथा

सर्वान् (न) मारयेत् । नायं हन्ति न हन्यत' इति तत्र सिद्धान्तः । तथा अत्रापि कर्मणैव सर्वमिति तदनुसारेणात्रापि बोधनम् । अतोऽयं साधारण इति, सोऽपि शृणोतीति कर्ममार्ग एव बोधितः । अत एव स्वयं स्वस्य सुखदुःखदः, अन्यो न भवति । तत्र वेतुमाह स्वकृतभुगिति । कर्मणि स्वस्य स्वातन्त्र्यात् तत् फलमपि कर्तृगाम्येव भवति । अन्यथा कृतहानाकृताभ्यागमप्रसङ्गः ॥३८॥

व्याख्यार्थ—पति के किए हुए कर्म को मान देना, पतिव्रता स्त्री का धर्म है, इस कारण से तूं हम सब पर क्रोध मत कर, हम पर दोष के आरोपण का विचार भी न कर. हालांकि, भावना करने वाला चित्त भी श्रेष्ठ है, भावना करने में कोई भी दोष नहीं है. तो भी भाई के विरूप होने की चिन्ता से, उस धर्म के आरोप करने पर कदाचित् क्रोध आ जाय ? तो उसका निवारण करते हैं, आप कहते हो, वह उचित है, तो भी लौकिक दृष्टि से क्रोध तो करना चाहिए, जरासन्ध को तो मुक्त कर दिया और इसका मुण्डन कैसे किया ? ये दो विपरीत कार्य कैसे हुए ? इस शंका के समाधान के लिए कहा, कि अपने धर्म के आधीन होने से, सुख और दुःख का अनुभव होता है, संकर्षण में ज्ञान मुख्य है, यदि ज्ञान प्रधान न होता तो सब को मार डालते "नायं हन्ति न हन्यते" वहाँ यह सिद्धान्त पक्ष लागू है । वैसे यहाँ सब कर्म से हुआ है, कर्म के सिद्धान्त के अनुसार ही ज्ञान कराया है अतः यह साधारण पक्ष है, वह भी सुन रहा है, इसलिए यहाँ कर्म मार्ग ही समझाया है, अतएव स्वयं ही अपने आपको सुखदुःख देने वाला है, दूसरा देने वाला नहीं है. नहीं तो कृत की हानि न किए हुए के आने का, प्रसंग उपस्थित हो जावे ॥३८॥

आभास—एवं प्रतिबोधिते केवलमस्मदपराधमेव स्थापयति बलभद्रो, न स्वापराधमिति अतुल्यता प्रतिभाता, अतः पुनस्तां बोधयितुं भगवन्तमाह बन्धुरिति ।

आभासार्थ—इस प्रकार समझाने से रुक्मिणी समझेगी कि बलभद्रजी केवल हमारे पर ही अपराध डालते हैं, अपना अपराध प्रकट नहीं करते हैं, इसलिए भेद हुआ, अतः पुनः अन्य प्रकार से उसको बोध कराने के लिए "बन्धुर्वधार्ह" श्लोक से भगवान् को कहने लगे ।

श्लोक—बन्धुर्वधार्हदोषोऽपि न बन्धोर्वधमर्हति ।
त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः ॥३९॥

श्लोकार्थ—हे कृष्ण यदि सम्बन्धी मारने के योग्य अपराध करे तो भी, सम्बन्धी को चाहिए कि अपने नातेदार को न मारे, वह तो अपने ही अपराध से मरा हुआ है फिर उस मरे हुए को मारने से क्या ? ॥३९॥

सुबोधिनी वधमर्हति येन दोषेण तादृशो दोषो यस्य स वधार्हदोषः पुरुषः। तादृशः बन्धोः साक्षाद्वध नार्हति। अन्यथा बन्धुत्वं न स्यात्। शत्रुरेव वधकर्ता। अयोग्यं कुर्वन् अयुक्त एव भवति। ननु यथा स्वधर्मः, स न मारणीय इति, तथा तस्यापि धर्मः, अतिक्रमो न कर्तव्य इति। स चेत् स्वधर्मं न कुर्यात्, कथमन्यः कुर्यादिति चेत्, तत्राह त्याज्य इति। वस्तुतस्तु तेन स्वधर्मस्त्यक्त इति न स्वेनापि स्वधर्मस्त्यक्तव्यः, तथा सत्युभयोरेव तुल्यता स्यात्। अथ तत्कर्म सार्थकं कर्तव्यमिति स्वोद्यमः, तत्राप्युच्यते। स्वेनैव दोषेण हतः। पुनः किमर्थं हन्यत इति। न हि तत्कर्मणा प्रेरितत्वं स्वस्य युक्तम्। तत्कर्म स्वयमेव अन्यं प्रेरयेत्। अतः कर्मणैव हतः, तदङ्गत्वे स्वस्य हानिरिति। भिन्नतया स्वयं चेन्मारयेत्, तदा पिष्टपेषणमेव भवेदिति, किं हन्यत इति प्रश्नार्थं आक्षेपार्थो वा। पिष्ट्वापि वेदे प्रैष उक्तः। अणूनि कुरुतादिति, तस्य प्रयोजनं मेध्यत्वायेति श्रुतावेवोक्तम्। तथा अयमपि पवित्रो भवतु, मोक्षं वा प्राप्नोत्विति प्रश्नार्थो भवति। एवमेवेति चेत्, तत्राह किं हन्यत इति। न हन्तव्य एव, किन्तु त्याज्यः। दुष्टं हि न संस्क्रियते, अयं तु दुष्ट एवेति न संस्कारमर्हतीति भावः ॥३६॥

व्याख्यार्थ—मारने का अपराध करने वाला भी सम्बन्धी साक्षात् मारने के योग्य नहीं है, यदि मारा जायगा तो बन्धुपन का सम्बन्ध न रहेगा, वध करने वाला शत्रु ही होता है, जो अयोग्य कर्म करता है, वह अयोग्य ही होता है, यदि कहो कि जैसे अपना धर्म है, कि उसको न मारना चाहिए वैसे उसका भी धर्म है, अतिक्रम नहीं करना चाहिए यों यदि वह अपने धर्म का पालन नहीं करता है तो दूसरा अपने धर्म का पालन कैसे करे? यदि यों कहो तो, इसका उत्तर है, कि वह मारने योग्य नहीं है. किन्तु उसको छोड़ देना चाहिए क्योंकि वास्तविकता का विचार किया जाय तो उसने अपने धर्म का त्याग किया तो क्या? हम भी अपना धर्म छोड़ देवें, यों करने से दोनों समान हो जावेंगे वह कर्म सार्थक करना चाहिए इसलिए अपना उद्यम है, इस पर मैं कहता हूँ कि, वह अपने ही अपराध से मरा हुआ है उसको फिर मारने से क्या? वा किस लिए मारा जाय? उसके कर्म से प्रेरित हो, अपने को उस प्रकार करना अपने को योग्य नहीं है, उसका कर्म स्वयं दूसरे को प्रेरणा करेगा, अतः कर्म ने ही उसको मार दिया है, यदि हम उसके अंग बने, तो अपनी ही हानि है. भिन्नपणे से यदि स्वयं मारे, तब पिष्ट पेषण[1] ही होगा, इसलिए क्यों मारा जावे? इस प्रकार कहना प्रश्न के वा आक्षेप के लिए है, पीस कर भी उसको वेद में "पैष" कहा है, अणु किए जावें, यों करने का प्रयोजन है, कि वह यज्ञ के लिए योग्य पवित्र हो, इस प्रकार श्रुति में कहा गया है, वैसे यह भी पवित्र हो, वा मोक्ष को प्राप्त होवे इस प्रकार प्रश्नार्थ होता है, यदि यों ही है, तो भी क्यों मारा जाता है? अर्थात् इसको नहीं मारना चाहिए, किन्तु छोड़ देना चाहिए, क्योंकि

१ – पीसे हुए को पीसना।

जो दुष्ट है, वह संस्कार करने योग्य नहीं है, संस्कार करने से भी वह पवित्र वा श्रेष्ठ हो कर सुधरेगा नहीं ॥३९॥

आभास—एवं शास्त्रार्थत: स न वध्यो भवतीति निरूप्य, लोकन्यायेनापि न वध्यत इति निरूपयति क्षत्रियाणामयं धर्म इति द्वाभ्याम् ।

आभासार्थ—यों शास्त्र के अर्थ अनुसार वह मारने योग्य नहीं है यह निरूपण कर अब लोक न्याय से भी वह मारा नहीं जा सकता है, यह "क्षत्रियाणामय" दो श्लोकों में निरूपण करते हैं।

श्लोक—क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः ।
भ्रातापि भ्रातरं हन्याद्येन घोरं तमस्ततः ॥४०॥

श्लोकार्थ—भाई भी भाई को मारे यह क्षत्रियों का घोर धर्म प्रजापति ने बनाया है जिससे घोर अज्ञानान्धकार ही होता है ॥४०॥

सुबोधिनी—ननु यो मारयितुमायाति, स मार्यत इति, 'जिघांसन्तं जिघांसीया' दिति लाल वेदाभ्यां हननं तस्य युक्तम्, तत्कथं निषिध्यत इति चेत्, तत्रोच्यते, किं हत इति हन्यते, अयुक्तं करोतीति वा । तत्र नाद्यः । अभावात् । प्रकृते असम्भवाच्च । अयुक्तता तु नास्तीत्याह । क्षत्रियाणामयं घोरात्मको धर्मः प्रजापतिनैव विनिर्मितः । त्रिविधा हि धर्माः, शान्तो घोरो विमूढश्चेति । तत्र शान्तो ब्राह्मणेषु स्थापितः । घोरः क्षत्रियेषु । विमूढो वैश्यशूद्रयोः । अतः अयं परिदृश्यमानः तीक्ष्णशस्त्राणि गृहीत्वा स्वप्रवृत्ति प्रदर्शयन्निवाह । तत्र न सम्बन्धापेक्षेत्याह भ्रातापि भ्रातरं हन्यादिति । नन्वेवं सत्ययं धर्म एव चेत्, तर्हि कथं घोरः स्यात्, तत्राह येन घोरं तम इति । ततो घोरमेव तमो भवति । अज्ञानमत्र तमः, तदपि भयानकम् । एवं कर्मणा दैत्यत्व भवतीत्यर्थः ।

व्याख्यार्थ—जो मारने के लिए आता है वह मारा जाता है, जैसा कि कहा है "जिघांसन्तं जिघांसीयात्" इसलिए लोक तथा वेद के अनुसार उसको मारना ही योग्य है, तब आप निषेध कैसे करते हैं? इसका उत्तर देते हैं, कि क्या (जिसने) नाश किया वह मारा जावे? अथवा अनुचित करता है, इसलिए मारा जावे, इनमें पहला तो है ही नहीं, क्योंकि मारने का अभाव ही है उसने किसी को अब तक मारा नहीं और चालू प्रसंग में मारे वह असम्भव हैं, मारने में अयोग्यता तो नहीं है, क्योंकि क्षत्रियों का यह घोर धर्म प्रजापति ने बनाया है।

धर्म तीन प्रकार के हैं १-शान्त, २-घोर और ३-विमूढ, उनमें से शान्त धर्म ब्राह्मणों में स्थापित किया है, घोर धर्म क्षत्रियों में, विमूढ धर्म वैश्य और शूद्रों में स्थापित किया है, अतः यह प्रकट देखने में आने वाला तीक्ष्ण शस्त्र ग्रहण कर अपनी प्रवृत्ति दिखा रहा है, वहाँ सम्बन्ध की अपेक्षा नहीं है, ऐसी दशा में "भ्राताऽपि भ्रातरं हन्यात्" भाई भी भाई का बध करे, यदि इस प्रकार किया हुआ कर्म भी यदि धर्म हो, तो उसको "घोर" कैसे कहा जाता है, जिस कर्म से घोर अज्ञान अन्धकार हो वह भी भयानक होवे तो उस कर्म से दैत्यपन होता है, अर्थात् जो ऐसा घोर कर्म करता है वह दैत्य बन जाता है ॥४०॥

आभास--ननु सत्यं यदि युद्धमेव कुर्यात्, तदा अशस्त्रं विरथं कृत्वा तं शत्रुस्त्यजेत्, अयं त्वसभ्यं बहु वदतीति मुखरत्वान्मारणीय एवेति चेत्, तत्राह राज्यस्येति । तेषामसभ्यवचनमपि प्रजापतिविनिर्मितमेव । तत्र साधारण्येन षट् हेतून् निर्दिशति । राज्यं ।

आभासार्थ—आपका यह कहना सत्य है कि यदि युद्ध भी करे तो उसको शस्त्र रहित और रथ विहीन कर छोड़ देना चाहिए अर्थात् मारना नहीं चाहिए, किन्तु यह तो बहुत असभ्य वचन कहता है इसलिए इस बकवादी अप्रिय कहने वाले को तो मारना ही चाहिए, इस प्रकार कृष्ण के विचार जान बलरामजी "राज्यस्य" श्लोक में इसका निराकरण करते हैं। उनके इस प्रकार के असभ्य वचन भी प्रजापति के ही रचे हुए हैं, उसमें साधारणता से छः हेतुओं को बताकर समझाते हैं।

श्लोक—राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः ।
मानिनोऽन्यस्य वा हेतोः श्रीमदान्धाः क्षिपन्ति हि ॥४१॥

श्लोकार्थ—राज्य, भूमि, धन, स्त्री, मान अथवा अन्य को हेतु बनाकर लक्ष्मी के मद से अन्धे बने हुए अभिमानी दूसरों का अपमान करते हैं किन्तु उसका वध अथवा वध के समान मुण्डन आदि नहीं कराते हो अतः तुमने इसका (रुक्मि का) मुंडन किया वह उचित नहीं किया है यों बलरामजी ने कृष्ण को उपालम्भ दिया ॥४१॥

सुबोधिनी—चेत्कस्यचित्केनचिद्धृतं तदा स क्षत्रियः । अन्यथायं न मारयिष्यतीति । राज्ये च गते केवलं जीवनमयुक्तमिति मरणार्थं शत्रून् क्षिपन्ति । श्रीमदान्धा अपि क्षिपन्ति । पूर्वं श्रिया जातो यो मदः तेन अन्धाः विवेकरहिताः, अतः क्षेपो युक्त एव । एवं भूमेः राज्यैकदेशस्य वा । वित्तस्य धनस्य । स्त्रियोर्थे मानस्य वार्थे तेजसो वार्थे । एवं षण्णामर्थे क्षिपन्ति । तत्रापि ये

मानिनः। अनुक्तसर्वहेतुसमुच्चयार्थमाह अन्यस्य वा हेतोरिति। युक्तश्चायमर्थः। अतोऽस्य क्षेपोऽपि युक्त एवेति न हननमुचितमिति भावः ॥१॥

व्याख्यार्थ—किसी ने किसी का राज्य ले लिया तो वह क्षत्रिय है, नहीं तो यह न मरवाएगा, राज्य जाने पर जो जीवन है वह अयोग्य है अतः मरने के लिए शत्रुओं को दूर फेंक देते हैं, लक्ष्मी के मद से जो अन्धे बने हैं वे भी फेंक देते हैं अर्थात् वे उनको पूछते ही नहीं है, कारण कि लक्ष्मी से उत्पन्न मद से अन्धे यानि विवेक हीन हो गए हैं अतः वे फेकें, तो उनकी दृष्टि में यह कार्य योग्य ही है इस प्रकार, राज्य के एक भाग में भूमि, धन, स्त्री और मान तथा तेज के लिए भी फेंक देते हैं, अर्थात् उनसे सर्व प्रकार का सम्बन्ध तोड़ देते है, इस प्रकार इन छ के अथवा कोई वैसे दूसरे हेतु के कारण जो सम्मान वाले हैं, वे यों करते हैं वह योग्य ही है अतः इनसे व्यवहारिक सम्बन्ध तोड़ देना ही योग्य है न कि मारना उचित है, कहने का यह भाव है ॥४१॥

आभास—ननु न हत एव मयाप्ययम्, किमित्युपालम्भः क्रियत इति चेत्, तत्राह तवेयं विषमा बुद्धिरिति।

आभासार्थ—मैंने भी इसको मारा नहीं है, फिर आप उपालम्भ क्यों दे रहे हो ? यदि यों कहो, तो इसका उत्तर है "तवेयं विषमाबुद्धिः" श्लोक में कहते हैं।

श्लोक—तवेयं विषमा बुद्धिः सर्वभूतेषु दुर्हृदाम्।
यन्मन्यसे सदाभद्रं सुहृद्रां भद्रमक्षयम् ॥४२॥

श्लोकार्थ—दुष्ट हृदय वालों की सर्व भूतों में ज्यों विषम बुद्धि होती है त्यों तुम्हारी यह बुद्धि विषम है, जो सुहृदों के अक्षय मुण्डन को वधानुकल्प नहीं समझ केवल निरूपण ही मानते हो ॥४२॥

सुबोधिनी—अयं न हत इति या बुद्धिः, सा तव विषमा, न समा। यदि नापकृतः स्यात्, तदा समा स्यात्। यदि वा वधं कुर्याः, तथापि लोकन्यायेन समा स्यात्। यत्तु सुहृदां भद्रमभद्रं मन्यसे, तत्राप्यक्षय तदभद्रं न दिनमात्रेणापगच्छति, किन्तु यावज्जीवं तिष्ठति। नन्वस्त्येव लोके विषमा बुद्धिः, को दोष इति चेत् तत्राह। सर्वभूतेषु दुर्हृदामेव विषमा बुद्धिर्भवति, न तु तव, न वा सुहृदाम्। येषां हि चित्ते कापट्यम्, तेषामेते प्रकाराः, नतु शुद्धचित्तानामित्यर्थः।

सर्वभूतेषु वा मध्ये दुर्हृदामभद्रं मन्यस इति । असुरद्विडिति वाक्यात् । दुर्हृदां वा सर्वभूतेषु लोमादिष्ववयवेषु अभद्रं मन्यस इति । भद्रं क्षौरं वा विपरीतलक्षणया अभद्रमेव । भूतानां मध्ये दुर्हृदां भद्रम्, सुहृदामभद्रम्, एतादृशमपि मुण्डनम्, तत्राप्यक्षयं त्वं मन्यस इति तव विषमा बुद्धिः । अथवा । दुर्हृदामभद्रं सुहृदां भद्रं सदा मन्यस इति । एतत्तव ब्रह्मणः अयुक्तम्, विषमा बुद्धिरित्यर्थः ॥४२॥

व्याख्यार्थ—यह मारा नहीं गया है ऐसी जो तुम्हारी बुद्धि है वह असमान है, जो अपकार आपने न किया होता, अर्थात् मुण्डन न किया होता, तो समान होती यदि वध भी कर दिया होता, तो भी लोक न्याय से (बुद्धि समान कही जाती जो कि तुम, सुहृदों के मुण्डन को केवल विरूप होना ही मानते हो, किन्तु वह मुण्डन भी वैसा नहीं है कि वे बाल फिर निकल जाएंगे जिससे विरूपता नष्ट हो जावेगी, किन्तु वह जीवन पर्यन्त रहने वाला और सदा अशोभा-कर है जिससे यह वध ही है, यदि तुम कहो कि लोक में तो बुद्धि विषम करनी ही पड़ती है इसमें कौनसा दोष है ? इसके उत्तर में बलरामजी कहते हैं कि, सर्वभूतों में दुष्ट हृदय वालों की ही विषम बुद्धि होती है, न तुम्हारी होनी चाहिए और न शुद्ध हृदय वालों की ही, जिनके चित्त में कपट रहता है उनके ये ढंग हैं, न कि, शुद्ध चित्त वालों के ? कहने का आशय यह ही है । तुम असुरों के शत्रु हो इस वचनानुसार सर्व प्राणियों में जो दुष्ट चित्त वाले हैं, उनका तो मुण्डन न होकर वध होना ही योग्य है, यों मानते हो, अथवा दुष्टों के केश आदि अवयवों को ही वध मानते हो, भूतों में जो दुष्ट हैं, उनका तो मुण्डन और जो सुहृद हैं उनका मुण्डन भी नहीं । किन्तु तुमने तो ऐसा मुण्डन किया है वह तो अक्षय, (जीवन पर्यन्त) रहने वाला है, इसलिए तुम्हारी बुद्धि असमान है अथवा दुष्टों का वध, शुद्ध हृदय वालों का सदा मुण्डन मानते हो, यों करना भी आप ब्रह्म को योग्य नहीं है क्योंकि इस प्रकार की बुद्धि विषम कही जाती है ॥४२॥

आभास—एवं चतुर्भि; तत्सन्तोषार्थं भगवदुपालम्भनमुक्त्वा, तावताप्यपरितुष्यमाणां ज्ञानेन बोधयति मात्ममोह इति सप्तभिः । भगवान् सधर्मोऽस्या बोधं कर्तुं शक्त इति ।

आभासार्थ—इस प्रकार चार श्लोकों से रुक्मिणी के सन्तोष के लिए भगवान् को उलाहना दिया, उससे भी उसको प्रसन्नता न हुई अतः ज्ञानोपदेश से "आत्ममोह" श्लोक से सात श्लोकों में समजाते हैं, धर्म सहित भगवान् इसको ज्ञान कराने में समर्थ है ।

कारिका—**स्वरूपाज्ञाननानात्वे देहादीनां च शत्रुता ।**
दोषत्रयं निरूप्यादौ आत्मधर्मनिरूपणम् ॥१॥

स्वप्रकाशोऽयमात्मा हि असङ्गश्च निरूप्यते ।
जन्मादिदोषास्त्वन्यस्य अतस्तैर्नैव दुष्यति ॥२॥
असंसर्गाग्रहो भ्रान्तः दृष्टान्तैर्विनिरूप्यते ।
ततोपसंहृतिर्युक्ता ज्ञानेनाज्ञाननुत्तये ॥३॥

कारिकार्थ—अपने आत्म स्वरूप का ज्ञान जब नहीं रहता है, तब नानात्वदृष्टि से देहादि की शत्रुता होती है, जिससे तीन दोष उत्पन्न होते हैं उनका आदि मे निरूपण कर पश्चात् आत्मा के धर्म का निरूपण करते हैं ।१।

यह आत्मा स्वयं प्रकाश स्वरूप है और असंग है यों निरूपण किया जाता है, जन्म आदि दोष आत्मा के नहीं हैं, किन्तु दूसरे के (देह के) हैं, अतः उन से आत्मा दूषित नहीं होती है ।२।

असंसर्ग का आग्रह दृष्टान्तों से भ्रान्त निरूपण किया है, ज्ञान से अज्ञान की निवृत्ति के लिए उपसंहार योग्य है ।३।

सुबोधिनी—'तरति शोकमात्मवि'दिति श्रुतेः शोकतरणं ज्ञानेनैव भवतीति ज्ञानमुपदिशति । अत्र ज्ञानं देहाद्व्यतिरिक्तात्मज्ञानम्, तावतैव देहाद्यध्यासे जातो मोहः अपगच्छति । ततस्तन्निराकरणार्थं तत्सामग्रीं प्रतिपादयति आत्ममोह इति ।

व्याख्यार्थ—"तरति शोकमात्मवित्"[1] इस श्रुति के अनुसार ज्ञान से ही शोक को तैरता है, इसलिए ज्ञान का उपदेश करते हैं यहाँ ज्ञान का तात्पर्य है देह से अतिरिक्त आत्मा का ज्ञान, ऐसे ज्ञान से ही देह आदि अध्यास से उत्पन्न मोह नाश होता है इस कारण से उस मोह के निराकरण के लिए उसकी सामग्री का "आत्ममोहो", श्लोक में प्रतिपाद करते है ।

श्लोक—आत्ममोहो नृणामेष कल्प्यते देवमायया ।
सुहृद्दुर्हृदुदासीन इति देहात्ममानिनाम् ॥४३॥

1—आत्मज्ञानी शोक को पार करता है,

श्लोकार्थ—मनुष्यों को यह जो देहादि में मोह होता है, वह देव की माया से बनता है, देह में जिनकी आत्म बुद्धि हो जाती है उनकी सुहृद दुहृंद और उदासीन इस प्रकार को भेद बुद्धि होती है ॥४३॥

सुबोधिनी—आत्मनोऽयं मोहः। अज्ञानानन्तरं दोषे आविर्भूते या मूर्च्छा स मोह इति व्यवह्रियते। तथात्रापि आत्मनः अज्ञाने शरीराहंभावे च प्रादुर्भूते सुहृद्दुर्हृदित्यादिबुद्धिर्बोधमपि न विषयीकरोतीति मोहो भवति। स च पश्वादिषु तथा नास्तीति नृणामित्युक्तम्। देवादीनां तथात्वेऽपि व्यवहाराभावान्नोक्तम्। एष इति प्रदर्शनम्। देवस्य भगवतो माययेति मोहकारणं माया निरूपिता। अन्यथा प्रत्यक्षादिषु श्रुत्यादिषु च प्रमाणेषु विद्यमानेषु प्रत्यहमेतस्य वृद्धिर्न स्यात्। देवानां माया नृणां दुस्तरा भवतीति, यथा नृणां माया पशूनाम्। अतो देवपदम्। सुतरामेव पुरुषोत्तममाया सर्वेषामेव दुस्तरा। मायायास्त्रिगुणत्वात् मोहेऽपि त्रिगुणतामाह सुहृद्दुर्हृदुदासीन इति। उदासीनः सात्त्विकः, सुहृद्राजसः। मायया यदा मोहः, तदा सर्वत्र चेन्निर्निमित्तं व्यर्थमेव ज्ञान स्यादिति निमित्त एवैतदित्याह इति देहात्ममानिनामिति। अमुना प्रकारेण देहमेवात्मानं मन्यन्ते, यदा मायया अन्येन वा देहात्मबुद्धिर्दृढा भवति, तदैते दोषाः सम्भवन्ति। ततस्तेषामुपकारापकाराभ्यां इदानीमनुभूयमानो मोहः प्रादुर्भवतीति देहात्मभावो मुख्यतया निवार्य इत्यर्थः ॥४३॥

व्याख्यार्थ—आत्मा का यह मोह है, अज्ञान के बाद जब दोष उत्पन्न होता है, तब जो अज्ञानता होती है वह मोह नाम से व्यवहार में अर्थात् कहने में आती है, वैसे यहाँ भी आत्म स्वरूप के अज्ञान होने पर, जो शरीर में अहंभाव उत्पन्न होता है, उससे यह मित्र है अच्छा हैं, यह शत्रु है दुष्ट है, और यह उदासीन है, ऐसी भेद बुद्धि हो जाती है,वह बुद्धि ज्ञान को अपना विषय नहीं कर सकती है अर्थात् भेद मिटा नहीं सकती है इसलिए मोह होता है, वह पशु आदि में वैसे नहीं होता है, अतः मनुष्यों को होता है. इसलिए "नृणां" पद दिया है देवादिकों में वैसा होने पर भी, देव नहीं कहा जिसका कारण यह है कि वे व्यवहार में यहाँ नहीं आते हैं, "एष" पद देकर सामने प्रत्यक्ष है, यह दिखाया है, मोह क्यों होता है, जिसका कारण बताते हैं, कि यह देव की ही माया है, जो मनुष्यों में मोह उत्पन्न करती है, यदि यह मोह, माया उत्पन्न करने वाली न होती तो श्रुति आदि प्रत्यक्ष इतने प्रमाण शास्त्रों के विद्यमान होते हुए, इस मोह की वृद्धि न होनी चाहिए, किन्तु वृद्धि होती ही रहती है, इससे यह माया ही मूल कारण है, एवं यह देवमाया मनुष्य पार नहीं कर सकता है क्योंकि दुस्तर है, जैसे मनुष्यों की माया को पशु पार नहीं कर सकते हैं इस कारण से 'देव' पद दिया है, सुतराम, पुरुषोत्तम की माया तो देवों को भी दुस्तर है, माया तीन गुणों वाली है इसलिए मोह भी तीन गुणों वाला हुआ है, जैसे कि सुहृत्, दुर्हृत् और उदासीन, उदासीन सात्विक है, सुहृत् राजस है,

और दुर्हृद् तामस है। माया से जब मोह पैदा होता है, तव सर्वत्र बिना किसी निमित्त के, जो ज्ञान होता है, वह व्यर्थ ही हो जाता है, इसलिए निमित्त बताते हैं, कि माया से, वा अन्य से जो देह को आत्मरूप मानते हैं, और उससे जब देह में आत्म बुद्धि दृढ़ हो जाती है, तब ये दोष उत्पन्न होते हैं, उससे उनके उपकार अथवा अपकार से अब अनुभव किया हुआ मोह उत्पन्न होता है इसलिए देह में जो आत्म भाव पैदा हुआ है उसको ही मुख्यतः मिटाना चाहिए ।।४३।।

आभास—ननु देहात्मभावाभावेऽपि कथमेतद्घटते । यावता परिच्छिन्न आत्मेति करणत्वेनापि स्वीक्रियमाणे देहे उदासीनादिभेदा भवन्त्येव । अतो देहव्यतिरिक्तात्मज्ञानं व्यर्थमिति चेत्, तत्राह एक एवेति ।

आभासार्थ—देह में आत्म भाव न हो, तो भी यह कहना कैसे घटित हो सकेगा, जब तक परिच्छिन्न आत्मा है, इसलिए करणपन से देह को स्वीकार किया जाए, तो भी उदासीन आदि भेद तो रहेंगे ही, अतः देह से पृथक् आत्म ज्ञान व्यर्थ है, यदि यों कहते हो, तो इसका समाधान यह है जो "एक एव" श्लोक में कहा जाता है।

श्लोक— एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् ।
नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ।।४४।।

श्लोकार्थ—सर्व देहधारियों की आत्मा एक ही है, वह 'पर', अर्थात् सबको नियम में रहने वालों है, तो भी अज्ञानी उसको अनेक समझते हैं, जैसे एक चन्द्र को जल के हिलने से और आकाश को घट और मठ में होने से अनेक समझते हैं ।।४४।।

सुबोधिनी—सर्वेषु, देहेषु आत्मा एक एव, यतः परो नियन्ता, अन्यथा देहेन परिच्छिन्नः देहाधीनः स्यात् । अनुभूयते च देहे स्वातन्त्र्यम्, देहान्तरे स्वातन्त्र्याभावास्तु तत्रानुसन्धनाभावात् । एवमखण्डाद्वैतभाने सर्वत्रात्मबुद्धिः । अथवा । आत्मशब्देन भगवा नुच्यते । तदाभासा एव जीवा इति पर एक एव । एतद्भगवति विद्यमाने निरूप णमसमञ्जसमिति विरम्यते । युक्तश्चायमर्थः । सर्वदेहेष्वेक एवात्मेति । यतोऽयमात्मा । अतति व्याप्नोतीति । अन्यथा आत्मत्वं भज्येत । अणुपरिमाणत्वे देहमपि न व्याप्येत । प्रकाशवत् गुणव्याप्तावपि चैतन्यलक्षणस्य गुणस्य सङ्कोचविकासावङ्गीकर्तव्यौ । तत्रापि नियामको देह एवेति धर्मिण एव नियामकोऽस्तु, किं धर्मनियामकत्वस्वीकारेण । यथेदं जगत् ब्रह्माण्डेनैकतामामद्यते, अन्यथा तस्यैकत्वनिर्देशो न स्यात्, तथा आत्मनिर्देशोऽपि । यथैकमेव सुवर्णं मृद्वा नानाप्रकारेण कृतिसमवेतं सद्भासते, एवमात्मापि

देहादिवैलक्षण्यात् देवतिर्यङ्मनुष्यादिभावमापद्यत इति न कोऽपि दोषः। सर्वेषामपि देहिनामिति। यतः सर्वेऽपि देहिनः, 'दिह उपचय' इति उपचयादिमन्तः। अतो वृद्धिह्रासावात्मनः परिच्छेदेनोपपद्येत इति व्यापकत्वे अङ्गीक्रियमाणे एकेनैव चरितार्थतेति नानात्वं व्यर्थम्। 'नानात्मानो व्यवस्थात' इति स्मृतिस्तु धर्ममर्यादार्थं नानात्मत्वं स्वीकर्तव्यमिति दोषगुणव्यवस्थया इव व्यवस्थानिरूपिका। यथा पञ्चमहाभूतानि। एकश्चात्मा सर्वसङ्घातेषु तुल्यः, तथापि कश्चिच्चाण्डालः, कश्चिद्ब्राह्मण इति धर्मव्यवहारार्थमेव विभागः कल्पितः। सामग्र्यामधर्मो धर्मो वा प्रविष्टः तथा सम्पादयतीत्यपि पक्षे धर्माधर्मयोरेव नियामकं वाक्यादतिरिक्तं विषये नास्तीति व्यवस्थार्थमेव तत्कल्पना वक्तुं युक्ता। उत्क्रमादयस्तु न्यायमतेऽपि न सन्ति। भगवन्मते तु भगवत इव तस्यापि गमनागमने संभविष्यतः। तत्रापिश्वरपदप्रयोगात्। 'शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वर' इति वाक्याद्ब्रह्मवादेऽप्ययमेव सिद्धान्तः। तस्मात्सर्वत्रैक एवात्मेति युक्तम्। तर्हि कथं भेदप्रतीतिरिति चेत् तत्राह नानेव गृह्यते मूढैरिति। अत्यन्ताकुशलैर्नाना गृह्यते। तैरपि कचिन्नानात्वं नानुभूयते, पुत्रादिषु अवयवेषु च वैलक्षण्ये भासमानेऽपि। अन्यथैको देह इति न स्यात्। अत उक्तमिवेति। तत्र स्पष्टप्रतीत्यर्थं साकारनिराकारौ दृष्टान्तयति। यथा ज्योतिरिति साकारे। यथा नभ इति निराकारे। तार्णः पार्णः। घटाकाशो मठाकाश इति ।।४४।।

व्याख्यार्थ—सब देहों में आत्मा[1] एक ही है, क्योंकि वह 'पर' है अर्थात् नियन्ता है, यदि वैसे न हो देह से परिच्छिन्न हो, तो देह के आधीन बनजावे, देह में रहते हुए भी आत्मा स्वतन्त्र है, यह अनुभव किया जाता है, देहान्तर में स्वतन्त्रता का अभाव तो, वहाँ अनुसन्धान के अभाव से दीखता है, इस प्रकार जब अखण्ड अद्वैत का भान होता है, तब सर्वत्र आत्मबुद्धि होती है अथवा आत्म शब्द से भगवान् कहा जाता है, जीव उसके आभास ही हैं, 'पर' एक ही है, भगवान् के विद्यमान होते हुए इसका निरूपण करना युक्ति युक्त नहीं है, इसलिए, कहते नहीं, यह अर्थ योग्य है, कि सर्व देहों में जो आत्मा भगवान् है वह एक हो है क्योंकि वह आत्मा यानि व्यापक है, यदि सर्वत्र एक न होवे, तो आत्मापन नष्ट हो जावे। यदि आत्मा भगवान् को अणु-परिमाण माना जावे, तो देह में भी व्याप्त होकर न रह सके, प्रकाश को तरह गुणों की व्याप्ति होने पर, चैतन्य लक्षण वाले गुण का सिकुड़ना ओर बढ़ना अंगोकार करना चाहिए, उसमें भी नियामक देह ही है, इससिए धर्म्मी ही नियामक है, धर्म का नियामकपन स्वीकार करने से क्या फल होगा ? जैसे यह जगत् ब्रह्माण्ड पद से एक ही समझा जाता है, यदि एक न समझा जाए, तो उसका एकपने से निर्देश न होवे, वैसे

१—जीव व्यापक है यह स्मार्तवाद है उसको लेकर यहाँ कहा है, उपनिषद्-वाद के अनुसार जीव अणुवाद है वह यहाँ नहीं कहा है कारण कि रुक्मी असुर है वह उपनिषद्-वाद सुनने के योग्य नहीं है,

आत्मा का उपदेश भी समझना चाहिए। जैसे सुवर्ण अथवा मृत्तिका अनेक प्रकार की आकृति में होते हुए भी, एक ही दीखती है, इसी प्रकार आत्मा भी देह आदि की विलक्षणता से, देव, पशु, पक्षी, मनुष्य आदि भाव को ग्रहण करते हैं, यों होते हुए भी कोई आत्मा में दोष नहीं, सर्व देह धारी उपचय (बृद्धि, ह्रास) आदि वाले हैं, अतः वृद्धि वा ह्रास आत्मा में परिच्छेद से बनता है इसलिए आत्मा का व्यापकत्व मानने से एक से ही चरितार्थता हो जाती है जिससे नानापन मानना व्यर्थ है, "नानात्मानोव्यवस्थातः" यह स्मृतिवाक्य धर्म मर्यादा के लिए है, उसके लिए ही नानात्व स्वीकार करना चाहिए, जिससे लोक में गुण और दोष को व्यवस्था हो सके अतः इस तरह यह व्यवस्था का निरूपण करने वाली है, जैसे पंच महाभूत और एक आत्मा सब देहों में समान है, यों होते हुए भी, कोई चाण्डाल है, और कोई ब्राह्मण है, ये विभाग कर्म, धर्म के व्यवहार चलाने के लिए ही बनाए हैं, सामग्री अर्थात् वस्तुओं में अधर्म वा धर्म का प्रवेश हुआ है, इस प्रकार शास्त्र सम्पादन करता है, अतः अशुद्ध वा शुद्ध एवं इससे अपवित्रता पवित्र होगी, वा पाप पुण्य होगा इस विषय में व्यवस्था के लिए शास्त्र वाक्य के प्रमाण सिवाय अन्य कुछ नहीं है, इसलिए यह समस्त कल्पना व्यवस्था के लिए है, वह योग्य ही है उपक्रम आदि तो न्यायामत में भी नहीं है। भगवन्मत में तो भगवान् की तरह उसके भी गमन आगमन होंगे, क्योंकि वहाँ भी इसलिए ईश्वरपद का प्रयोग किया है, जैसे कि "शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः" इस वाक्य से ब्रह्मवाद में भी यह ही सिद्धान्त है, इससे सर्वत्र एक ही आत्मा है यह मानना ही उचित है, यदि कहो कि जब सर्वत्र एक ही परमात्मा है तो फिर भेद की प्रतीति क्यों होती है ? इसके उत्तर में कहते हैं, कि "नानेवगृह्यते मूढेः" जो निपट बे-समझ हैं वे एक को नाना की तरह देखते वा समझते हैं मूढ भी कहीं नानापन का (तरह २) का अनुभव नहीं करते हैं जैसे पुत्र आदि में और अवयवों में दीर्घ ह्रस्वादि विलक्षणता होते हुए भी उनको नाना नहीं समझते हैं यदि समझें तो देह एक नहीं कही जावे, अतः गोपा यों कहा है, वहाँ स्पष्ट प्रतीति कराने के लिए साकार और निराकार के दो दृष्टान्त देते हैं–जैसे चन्द्र साकार है जिसकी जल में अनेक प्रतीति मात्र होती है तथा आकाश निराकार है जिसकी घट तथा मठ में भेद प्रतीति होती है जिससे कहा जाता है यह घटाकाश है यह मठाकाश है, इस प्रकार की भेद प्रतीति माया से मूढ बने हुए मनुष्यों को होती है, ज्ञानियों को तो सर्वत्र एक ही दीखता है ॥४४॥

आभास—ननु तर्हि देहात्मबुद्धिः कथं गच्छतीत्याशङ्क्य वैलक्षण्यानुसन्धानेनेति आत्म वैलक्षण्यं देहस्य वदन् अपकारित्वमप्याह देह आद्यन्तवानेष इति ।

आभासार्थ—तब देह में जो आत्म बुद्धि हुई है वह कैसे नष्ट होगी ? जिसका उत्तर "देह आद्यन्तवान्" श्लोक में देते हुए कहते हैं कि देह और आत्मा में विलक्षणता का अनुसन्धान करने से और देह का अपकारीपन भी इसमें बताते हैं ।

श्लोक—देह आद्यन्तवानेष द्रव्यप्राणगुणात्मकः ।
आत्मन्यविद्यया क्लृप्तः संसारयति देहिनम् ॥४५॥

श्लोकार्थ—द्रव्य, प्राण, और गुण स्वरूप यह देह आदि अन्त वाली है, अविद्या से आत्मा में उसकी कल्पना की गई है, जिससे वह देह, जीव को संसार में पटके हुए है । ४५।।

सुबोधिनी—आत्मा नित्यः । यो हि देशापरिच्छिन्नः, स सुतरां कालपरिच्छिन्नः,देशापरिच्छेदस्य व्यापकत्वात् । अत आत्मत्वादेव कालापरिच्छेदः सिद्धः । देहस्तु आद्यन्तवानुभयावधियुक्तः, प्रागभावप्रध्वंसाविव व्यावर्तितौ । एष इति परिदृश्यमानः, मृतानामेन्तः मुण्डस्योत्पत्तिरिति प्रदर्शनस्य सार्थकता । अथवा । विद्यमानस्य देहस्य जन्ममरणयोरदृष्टत्वात् स्वव्यतिरिक्तस्यैव प्रत्यक्षसंवादात् श्रुतेः प्रामाण्यं मन्यते यस्तं प्रत्याह एष इति । एवं सनातनत्वासदातनत्वाभ्यां वैलक्षण्यमुक्त्वा गुणातीतत्वसगुणत्वाभ्यां वलक्षण्यमाह द्रव्येति । द्रव्यमधिभूतम्, प्राणा आध्यात्मिकः, गुणा आधिदैविका इति । एत एव देहेन्द्रियदेवतारूपाः, आत्मा स्वरूपं यस्य । किञ्च । आत्मन्यविद्यया क्लृप्त इति । वैलक्षण्यत्रयम् । आत्मा आधारः । आधेयो देहः, सिद्ध आत्मा, स्वतः क्लृप्तो देहः, (विद्यया) अविद्यया चात्मस्थाने कृतः । आत्मा तु स्वत एव प्रवृत्त इति । अनिष्टेष्टजनकत्ववैलक्षण्यमप्याह संसारयति देहिनमिति । स्वस्मिन्नभिमानमात्रे आत्मानं देहः संसारे पातयति । आत्मा तु देहस्य हितमेव वाञ्छतीति । एवं षोढा वैलक्षण्यं निरूपितम् ।।४५।।

व्याख्यार्थ—ब्रह्म नित्य है, जो देश से अपरिच्छिन्न है, वह व्यापक होता है जिससे वह काल से भी अपरिच्छिन्न है, अतः आत्मपन से ही काल से अपरिच्छेद सिद्ध है देह तो आदि और अन्त वाली होने से देश और काल दोनों की अवधियुक्त है अतः देशकाल परिच्छिन्न है, 'प्राग' भाव और 'प्रध्वंसाभाव' की तरह दोनों का निवारण किया "एष" पद का भाव है कि जो सामने दीख रहा है, मर गए हुए देहों का अन्त दीखता है और अवयव रहित देह की गर्भपात होने पर उत्पत्ति दीखती है इसलिए देह सदैव अवयव वाला नहीं है, अतः प्रदर्शन कहने की सार्थकता होती है, अथवा विद्यमान देह के जन्म मरण का अदृष्टपन होने से अपने से पृथक् के ही प्रत्यक्ष संवाद से जो श्रुति का प्रमाण मानते हैं उनको कहता है कि "एष" सामने दीखने वाला सदैव अथवा स्वल्प काल रहने से दोनों में विलक्षणता बताकर अब सगुण और निर्गुण से विलक्षणता कहते हैं द्रव्य अधिभूत, प्राण आध्यात्मिक और गुण आधिदैविक, ये ही देह और इन्द्रियों के देवता रूप हो स्वरूप जिसके हैं, किञ्च आत्मा में अविद्या से कल्पित है, इस प्रकार तीन विलक्षणताएँ है, आत्मा आधार है, देह आधेय है, आत्मा सिद्ध है, देह स्वतः कल्पित है जिसको अविद्या से आत्मा में कल्पना की गई है परमात्मा तो स्वतः ही प्रवृत्त हुए हैं, अनिष्ट और इष्ट करने से भी विलक्षणता बताते हैं, अपने में केवल अभिमान

के कारण देह, आत्मा को, संसार में पटकती है और आत्मा तो देह का हित हो चाहती है, इस प्रकार देह और आत्मा में छ प्रकार से विलक्षणता बताई है इस विलक्षणता के अनुसन्धान करने से देह में हुई आत्म बुद्धि नष्ट हो जाती है ।।४५।।

आभास—किञ्च । 'असङ्गो ह्ययं पुरुष' इति श्रुत्या आत्मनः सङ्गाभावो निरूप्यते । देहस्तु सर्वसङ्गयुक्त इति वैलक्षण्यं निरूपयितुं आत्मन एव धर्मानाह नात्मन इति ।

व्याख्यार्थ—"असंगो ह्ययं पुरुषः" इस श्रुति के अनुसार आत्मा असंग है यह निरूपण हुआ है, देह तो सर्व संग से युक्त है इस विलक्षणता को कहने के लिए आत्मा के ही धर्म "नात्मनः" श्लोक में कहते हैं ।

श्लोक—नात्मनोऽन्येन संयोगो वियोगो वासता सति ।
तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ।।४६।।

श्लोकार्थ—हे सती ! कारण रूप आत्मा के, न तो दूसरे देह आदि के साथ संयोग है और न वियोग है, क्योंकि अध्यात्म अधिभूत और अधिदैवत ये आत्मा के कार्य हैं और आत्मा हो से प्रकाशित होते हैं, जिससे आत्मा से भिन्न नहीं हैं, जुदे होने के सिवाय संयोग वियोग हो नहीं सकते हैं, जैसे चक्षु इन्द्रिय और रूप का प्रकाशक सूर्य है ये दोनों तेजस् है जिससे ये सूर्य के कार्य हैं और सूर्य कारण है इससे सूर्य से भिन्न नहीं है ।।४६।।

सुबोधिनी--अस्यात्मनः अन्येन देहेन संयोगो वा वियोगो वा नास्ति । वियोगो हि संयोगपूर्वक इति संयोगे निषिद्धे अवयवभेदेन संयोगाभावः । संयोगोऽपि तिष्ठत इति सिद्धसाधनतामाशङ्कय उभयं निषेधति, संयोगोऽपि नास्ति । कदाचित्संयोगोऽपि निषिद्धो वियोगेन । ननु संयोगवियोगयोः भावाभावरूपत्वे कथमुभयाभावः, प्राप्तस्यैव नानिषेध इति न नियमः, सम्भावितस्यापि निषेधात्, तत्राह असतेति । असता देहेन आत्मनो न संयोगवियोगौ, यथा रज्जुसर्पयोः । न हि सर्पस्य कोऽप्यंशो रज्जौ भवति । ननु प्रत्यक्षश्रुतिभ्यां देहस्य परिदृष्टत्वात् अनुमानप्रत्यक्षश्रुतिभिः आत्मनोऽपि प्रतीतेः वैलक्षण्यस्य चोक्तत्वात् वियोग एवास्तु, कथमुभयाभाव इति चेत् । ननूक्तमसत्वादिति तदेव प्रमाणसिद्धत्वान्न भविष्यतीत्याशङ्का, तत्र हेतु-

माह तद्धेतुत्वात्तत्प्रसिद्धेरिति । तस्य देहस्य प्रसिद्धेः उत्पत्तेर्ज्ञप्तेर्वा । आत्महेतुत्वादात्मभासैव देहो भासत इति पृथक् स्थित्यभावात् संयोग-वियोगौ न भवतः । पृथक्लब्धसत्ताकावेव संयुक्तौ वियुक्तौ वा भवत इति लोकस्थितिः । अत एवोत्पत्तौ यद्यदधीनम्, तत्र न संयोगः सम्बन्धः । यथा द्रव्यगुणयोः, यथा वा ज्ञप्तौ ज्ञानविषययोः, तथापि उभयोः सत्त्वात्समवायः स्वरूपं वा सम्बन्धोऽङ्गीकृतः । अत्र देहस्यासत्त्वात् अन्यतरस्य निःस्वभावत्वात् रज्जुसर्पवत् न स्वरूपसम्बन्धः । समवायोऽपि निराकरिष्यते । सर्वथापि संयोग-वियोगौ तु न भवतः । प्रकाश्यप्रकाशकयोः सम्बन्धाभावाय दृष्टान्तमाह दृग्रूपाभ्यामिति । नेत्राधिष्ठात्री देवता यः सूर्यः तेन लब्धसत्ताकं चक्षुः विषयं गृह्णाति । न हि तेनापि तयोः संयोगवियोगौ भवतः । एतस्यार्थस्य परिज्ञान-मधिकारिण एव भवतीति । न हि प्रतिबिम्बेन सह दर्पणेन वा मुखस्य कोऽपि सम्बन्धोऽस्ति । सतीति सम्बोधनं उक्तविश्वासाय । अनेन देहा-दिष्वनासक्त्यर्थं वैराग्यमपि सूचितम् । स्वास-क्त्यै तत्सिद्धिः, अन्यथा तदभाव इति ।।४६।।

व्याख्यार्थ—इस आत्मा का देह से संयोग वा वियोग नहीं[1] है, पहले संयोग हो तो अनन्तर वियोग होवे इसलिए संयोग का निषेध किया, क्योंकि अवयव भेद से संयोग का अभाव है, संयोग भी स्थित होनेवाले का होता है, इसलिए सिद्ध की साधनता से शंका कर दोनों का निषेध करते हैं, संयोग भी नहीं है और वियोग भी नहीं है कदाचित् सयोग भी वियोग से निषिद्ध किया है, जब संयोग भावरूप है और वियोग अभावरूप है तब दोनों का अभाव कैसे बन सकेगा ? प्राप्त का अनिषेध नहीं, वैसा नियम नहीं है, हो सकने हारी बात के भी निषेध से भी इस पर कहते हैं कि,देह असत् है इसलिए वैसी देह से सत् आत्मा का संयोग वियोग नहीं हो सकता है, जैसे रज्जु और सर्प का संयोग वियोग नहीं हो सकता है सर्प का कोई भी अंश रज्जु में नहीं होता है, यदि कहो कि प्रत्यक्ष और श्रुति से देह को देखने से तथा अनुमान प्रत्यक्ष तथा श्रुति में आत्मा की भी प्रतीति होने से, एवं दोनों में विलक्षणता भी कही है जिससे जब वियोग ही है, तब दोनों का अभाव कैसे ? इसके उत्तर में कहते हैं कि पहले ही कह दिया है, कि देह आदि असत् होने से और वह असत् प्रमाण सिद्ध है, जिससे ऐसी शंका बन नहीं सकती है, उसमें हेतु कहते हैं कि "तद्धेतुत्वात्तत्प्रसिद्धेः" उस देह को उत्पत्ति और ज्ञान प्रसिद्ध हो रहा है, यों होने में आत्मा ही कारण है, आत्मा के प्रकाश से ही देह भास रहा है, इससे उसको पृथक् स्थिति नहीं है, जिससे संयोग वियोग नहीं बनते हैं, जिनको सत्ता पृथक् हो, उन में ही संयोग और वियोग बन सकते हैं, इस प्रकार लोक की स्थिति है, इस कारण से ही जो जो उत्पत्ति के आधीन है वहाँ संयोग सम्बन्ध नहीं होता है, जैसे द्रव्य और गुण में और ज्ञान होने में,

---

१—वह अभ्युदसिद्धान्त मायावाद है, जिसका उपदेश बलरामजी ने असुर रुक्मी के कारण किया है, पुराणों में इस प्रकार मायिक सिद्धान्त कहा हैं वह वैराग्य को उत्पन्न करने के लिए कहा है ।

ज्ञान तथा विषय का संयोग नहीं हो सकता है, तो भी दोनों के होने से समवाय और स्वरूप सम्बन्ध माना गया है, यहाँ देह के असत् होने से, दूसरे के स्वभाव रहित होने से रज्जु और सर्प की भाँति स्वरूप सम्बन्ध नहीं है समवाय का भी निराकरण होगा, सर्व प्रकार संयोग और वियोग तो नहीं होते हैं, प्रकाश्य और प्रकाशक के सम्बन्ध का अभाव ही है इसमें दृष्टान्त देते हैं "दृगपाभ्यां" नेत्र का अधिष्ठाता देव सूर्य है, उससे नेत्र सत्ता प्राप्त कर विषय को ग्रहण करते हैं, सूर्य से उन नेत्रों का संयोग वियोग नहीं होता है, इस सदर्थ का पूर्णज्ञान अधिकारी को ही होता है. मुख का दर्पण वा प्रतिबिम्ब से कोई सम्बन्ध नहीं होता है, रुक्मिणीजी को हे सति यह विशेषण इसलिए दिया है कि तूं मेरे कहने पर विश्वास करेगी, क्योंकि तूं पतिव्रता है, इस प्रकार के उपदेश से आदि में आसक्ति न होवे और वैराग्य भी होवे, ऐसी सूचना दी है अपनी आत्मा में आसक्ति से ही देहादि में अनासक्ति तथा संसार से वैराग्य की सिद्धि होती है, जो वह नहीं है, तो देहादि में अनासक्ति और वैराग्य का भी अभाव है ।।४६।।

आभास—ननु जननादयो हि प्रत्यक्षानुमानश्रुतिभिर्जीवस्य प्रतीयन्ते ततश्च सङ्घातस्यैव तथात्वात् देहस्यासत्यत्वे आत्मन एव भविष्यन्तीति संयोगे निराक्रियमाणे असत्त्वहेतुना विपरीतमापतितम्, सर्वे दोषा आत्मन्येव समागता इति चेत्, तत्राह जन्मादयस्त्विति ।

आभासार्थ—प्रत्यक्ष अनुमान और श्रुति से जन्म आदि जोव के ही प्रतीत होते हैं, उससे संघात की भी वैसी प्रतीति होती है, यदि देह को असत् कहोगे तो आत्मा को हो कहोगे, इसलिए संयोग के निराकरण से, असत्व, हेतु से विपरीत ही होगा, अर्थात् सर्व दोष आत्मा में हो आ गए यदि यों कहते हो तो इसका उत्तर "जन्मादय" श्लोक देखिए ।

श्लोक—जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित् ।
कलानामिव नैवेन्दोर्मृतिर्ह्यस्य कुहूरिव ।।४७।।

श्लोकार्थ—जन्य आदि विकार देह के हैं, आत्मा के कभी नहीं, जैसे चन्द्रमा में जो वृद्धि क्षय दोखता है वह कलाओं का है चन्द्रमा का नहीं है, अमावस्या में जो तिरोभाव होता है, वह कला का है किन्तु अज्ञ चन्द्रमा का समझते हैं वैसे ही देह के तिरोभाव से आत्मा का नाश जानते हैं ।।४७।।

सुबोधिनी– तुशब्दः पक्षं व्यावर्तयति। जननादयः देहस्यैव। येन प्रकारेण देहस्य सिद्धिः, तेनैव प्रकारेण जन्मादीनाम्। तेषां च देहसम्बन्धित्वस्य च तत एव सिद्धेः। अत उभयोरसत्त्वात् जन्मादयोऽपि देहस्यैव। योग्यं योग्येन संबध्यत इति। सर्पश्चलतीति समायाति भक्षयतीति च यथा सर्पधर्मा एव, एवं जन्मादयोऽपि देहधर्माः, यतो विक्रिया। नह्यात्मनः सर्वविक्रियारहितस्य विक्रियाः सन्ति। क्वचिदिति। ज्ञानानन्तरं न सन्तीति इष्टमेवेति पक्षं व्यावर्तयति। न हि नायं सर्प इति बोधानन्तरमेव सर्पाभावः। किन्तु प्रतीतदशायामपि। तत्र ज्योतिः शास्त्रसिद्धं दृष्टान्तमाह कलानामिवेति। इन्दोः कलानां पञ्चदशसङ्ख्याकानां एकेन दिनेन एकस्या नाशः नतु चन्द्रस्य। स हि अम्मयः, सूर्यकिरणास्तत्र प्रतिबिम्बन्ते, अपगच्छन्ति चेति कालविदः। ननु सर्वोऽपि चन्द्रः अमावास्यायां क्षीयत इति नवो नवो भवति जायमान इति च कथं कलानां क्षय इति चेत्, तत्राह। अस्य जीवस्य चन्द्रस्य च कुहूरेव मृतिः। ननु कुह्वां तस्यादर्शनकृतमपि मरणम्, तथास्य काल एव मृतिः। स च कालः कदाचित्तं प्रकाशयति देहसम्बन्धेनोद्भावचेनापि, कदाचिन्नेति तस्योत्क्रान्त्यादयो निरूप्यन्ते। नतु वस्तुतस्तस्य मरणम्। मरणे उभयोर्वियोगाद्देहस्य च पृथक् स्थितत्वात् प्रथङ्निराकरणप्रयासः ॥४७॥

व्याख्यार्थ –"तु" शब्द दूसरा पक्ष बतलाता है, जन्म मरण आदि देह के ही हैं, जिस प्रकार देह की सिद्धि होती है वैसे ही जन्म आदि की भी होती है उनका देह से सम्बन्धिपन होने से ही सिद्धि है अतः दोनों के असत् होने से जन्म आदि भी देह के ही हैं, योग्य को योग्य से ही सम्बन्धित किया जाता है, सर्प चलता है अर्थात् जाता है ओर काटता है ये सब जैसे सर्प के ही धर्म हैं, वैसे जन्म आदि भी देह के ही धर्म हैं, क्योंकि विकार वाले हैं, वैसे विकार वाले धर्म, विकार रहित आत्मा के धर्म कभी नहीं होते हैं "क्वचित्" पद का भाव प्रकट करते हुए कहते हैं, कि ज्ञान के बाद ये नहीं है, यों इष्ट ही है इस पक्ष को बदलता है यह सर्प नहीं है इस प्रकार ज्ञान होने के बाद ही सर्प का अभाव होगा, किन्तु प्रतीत दशा में भी, इसमें ज्योतिष शास्त्र सिद्ध दृष्टान्त कहते हैं, "कलानामिव" चन्द्रमा की पन्द्रह कला हैं प्रति दिन एक कला का तिरोधान होता है, न कि चन्द्रमा का, वह तो जलमय है, सूर्य की किरणों का उसमें प्रतिबिम्ब पड़ता है वे किरणें कम होती हैं यों काल को जानने वाले कहते हैं। आप यों कैसे कहते हो कि चन्द्रमा नाश नहीं होता है अमावस्या को सारा चन्द्रमा नाश हो जाता है, फिर वह नवीन होकर उत्पन्न होता है, इस प्रकार होता है फिर आप कैसे कहते हो कि कलाओं का क्षय होता है ? ऐसा कहो, तो उसका उत्तर देते हैं, इस जीव की और चन्द्रमा का अमवस्या ही मृत्यु है, अमावास्या में उसका दर्शन न होना कोई मृत्यु नहीं है उसकी ही मृत्यु है; वह काल कभी उसको प्रकाशित करता है और कभी बड़ा और कभी छोटा कई भेद करता है, तथा कभी नहीं, इस प्रकार उसकी उत्क्रान्ति आदि का निरूपण किया जाता है, न कि वास्तविक उसका मरण है, मरण में दोनों का वियोग होता है और देह तो पृथक् स्थित होने से पृथक् के निराकरण के लिए यह प्रयास है ॥४७॥

आभास—ननु मिथ्याभूतेन सह कदाचित्सम्बन्धो भवति । यथा रज्जुसर्पेण, देहेन तु सम्बन्धः आभूतसंप्लवमिति दृष्टान्तवैषम्यात् देहस्य सत्यत्वं आत्मनो वा सम्बन्धित्वं भवत्विति चेत्, तत्राह यथा शयान इति ।

आभासार्थ—मिथ्या पदार्थ से सम्बन्ध तो किसी समय होता है, जैसे रज्जु का सर्प से, आत्मा का तो देह से पूर्व से ही सम्बन्ध चला आ रहा है इसलिए विषम दृष्टान्त होने से देह सत्य होनी चाहिए और उससे आत्मा का सम्बन्ध भी मानना चाहिए, यदि यों कहते हो तो इस का उत्तर "यथा शयान" श्लोक है ।

श्लोक—यथा शयान आत्मानं विषयान् फलमेव च ।

अनुभुङ्क्तेऽप्यसत्यर्थे तथाप्नोत्यबुधो भवम् ॥४८॥

श्लोकार्थ-जैसे सोया हुआ पुरुष, पदार्थ आदि नहीं होते हुए भी भोक्ता बनता है और विषयों का फल सुख भी लेता है, वैसे ही अज्ञान दशा में यह अज्ञ संसार को प्राप्त करता है ॥४८॥

सुबोधिनी—न हि कदाचिदेव भवति यत्तदेव मिथ्या भवतीति नियमोऽस्ति कश्चित्, अपि तु सर्वदैव दृश्यमानमप्यसद्भवति । यथा यदैव शेते, तदैव असत्यप्यर्थे आत्मानं देहं विषयान् स्रक्चन्दनादीन् फलं सुखं चानुभवति। न चैतावता तेषां सत्यता भवति । 'मायामात्र' मिति सूत्रे तथा निर्णयात् । तथैव अबुधः शयान इव भवं संसारं प्राप्नोति, निद्रावदज्ञानमित्यर्थः ॥४८॥

व्याख्यार्थ—जो किसी समय हो, वह मिथ्या है ऐसा कोई नियम नहीं है, किन्तु सर्वदा ही देखने में आने वाला भी असत् होता है, जेसे जब ही शयन करता है तब ही पदार्थ न होते हुए भी, माला चन्दन आदि विषयों के सुख और फल का अनुभव करता है यों होने से वे सत्य नहीं हो जाते हैं "मायामात्रम्" इस सूत्र में निर्णय किया है कि वह केवल माया है वैसे ही अज्ञानी सोए हुए की तरह संसार को प्राप्त होता है निद्रा की तरह अज्ञान है, इस प्रकार अर्थ है ॥४८॥

आभास—अतो अज्ञानेनैव देहप्रतीतेः देहस्य च मिथ्यात्वात् देहसम्बन्ध एव आत्मनः परिच्छेदप्रतीतिः, परिच्छेदे एव च शत्रुमित्रादिप्रतीतिरिति, परम्परया अज्ञानमेव मूलमिति तत्त्वज्ञानेन तन्निराकरणं कर्तव्यमित्याह तस्मादिति :—

आभासार्थ - अतः अज्ञान से ही देह की प्रतीति हो रही है, देह का सम्बन्ध ही आत्मा के परिच्छेद की प्रतीति कराता है, परिच्छेद के कारण ही शत्रु तथा मित्र आदि की प्रतीति हो रही है, यों होने की जड़, परम्परा का अज्ञान है, इसलिए इस अज्ञान का तत्वज्ञान से निराकरण करना चाहिए जिसको "तस्मादिति" श्लोक में कहते हैं।

श्लोक—**तस्मादज्ञानजं शोकमात्मशोषविमोहनम् ।**
तत्वज्ञानेन निर्हृत्य स्वस्था भव शुचिस्मिते ॥४६॥

श्लोकार्थ—हे पवित्र मन्द हासवाली ! इस कारण से अज्ञान से उत्पन्न आत्मा को शोष और मोह देने वाले शोक को तत्व ज्ञान से त्याग कर शान्त हो ॥४६॥

सुबोधिनी शोकस्तु विषमबुद्धिजन्य इति अज्ञानकृत एव। शोकस्य परित्यागाय दोषद्वयमाह। आत्मनोऽन्तःकरणस्य शोषो विमोहनं च यस्मादिति । ततः अत्यपकारित्वात्तदज्ञानं तत्वज्ञानेन निर्हृत्य स्वस्था भवेत्युपदेशः, प्रार्थना वा। शुचिस्मित इति। सहज एव तव प्रसाद इति कृत्रिमनिराकरणं नात्यन्तं क्लेशेन कर्तव्यमिति सूचितम् ॥४६॥

व्याख्यार्थ—विषम बुद्धि से शोक उत्पन्न होता है, इसलिए वह अज्ञानकृत ही है, शोक को क्यों छोड़ा जाय ? उसका उत्तर है, कि शोक से दो प्रकार की हानि होती है एक-अन्तःकरण का सूखना वा क्षय तथा भ्रम में पड़ना बहुत अपकारी होने से, इस अज्ञान को तत्वज्ञान से मिटाकर शान्त हो, इस प्रकार उपदेश वा प्रार्थना की गई है, "शुचिस्मिते" आप पवित्र सुन्दर हास वाली होने से, आपका सहज ही अनुग्रह है, इस प्रकार इस कृत्रिम अज्ञान का निराकरण अत्यन्त क्लेश से नहीं करना चाहिए, यों भी सूचित किया ॥४६॥

आभास—एवमुपदिष्टज्ञानं भगवत्सान्निध्यात्फलितमित्याह एवं भगवतेति ।

आभासार्थ—इस प्रकार उपदेश किया हुआ ज्ञान, भगवत्सन्निधि होने से सफल हुआ, जिसका वर्णन "एवं भगवता" श्लोक से श्री शुकदेव जी कहते हैं।

श्रीशुक उवाच

श्लोक—एवं भगवता तन्वी रामेण प्रतिबोधिता ।
वैमनस्यं परित्यज्य मनो बुद्धया समादधे ॥५०॥

श्लोकार्थ—श्री शुकदेवजी ने कहा कि भगवान् राम ने जब रुक्मिणी को इस प्रकार समझाया तब रुक्मिणी ने मन-मुटाव त्यागकर विक्षेपवाले मन को ज्ञान से स्थिर कर लिया

सुबोधिनी—ननु भगवत्सिद्धान्तं परित्यज्य ज्ञानसिद्धान्तः किमिति बोधितः, तत्राह तन्वीति । भगवानिति च । न हि भगवान् विरुद्धे स्वसिद्धान्तं कथयति । मुक्तानामेव तत्राधिकारात् । इयं च तन्वी विषयपरा । रामश्च साधनपरः । अतो हेतुत्रयस्यापि तथात्वात् ज्ञानेनैव प्रतिबोधिता । ज्ञानस्य च प्रयोजनं तस्यां वैमनस्यपरित्यागमात्रं जातम्, भगवति या दोषबुद्धिः स्थिता, सा गता । ततः विक्षिप्तं मनः बुद्धया समाहितमपि कृतवती । एको भगवद्विषयको दोषः । अपरो विक्षेपेण तस्या एव दुःखदः । उभयनिवृत्तिर्ज्ञानफलम् ।।५०।।

व्याख्यार्थ—भगवदीय सिद्धान्त को छोड़, ज्ञान सिद्धान्त का ज्ञान राम ने क्यों दिया ? जिसके उत्तर में कहा है, कि यह तन्वी है अर्थात् विषय परायण है और राम साधन परायण हैं । जो भगवान् के परायण न हो कर, विषय परायण होता है, उसको भगवान् अपना सिद्धान्त नहीं कहते हैं, क्योंकि उस सिद्धान्त के अधिकारी मुक्त ही हैं, अतः इन तीन कारणों से, इसको ज्ञान से ही समझाया है, ज्ञान का प्रयोजन व फल उसका मन मुटाव मिट जाना हुआ, और भगवान् में जो दोष बुद्धि थी वह भी नष्ट हुई, पश्चात् विक्षेप वाले मन को, ज्ञान से शुद्ध किया अर्थात् विक्षेप आदि नष्ट हो गए उसको भगवान् में जो दोष बुद्धि थी वह और दूसरा विक्षेप, ये दो ही दुःख देने वाले थे, उन दोनों की निवृत्ति ज्ञान का फल है ।।५०।।

आभास—एवंरुक्मिण्याः समाधानमुक्त्वा रुक्मिणः परित्याग एव उभयेषां सुखदो भवतीति तत्परित्यागमाह प्राणावशेष इति ।

आभासार्थ—इस प्रकार रुक्मिणी का समाधान कह कर अब रुक्मी का त्याग ही दोनों के लिए सुखकारी है, इसलिए "प्राणावशेष" श्लोक से उसके परित्याग को कहते हैं ।

श्लोक—प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः ।
स्मरन्विरूपकरणं वितथात्ममनोरथः ।।५१।।

श्लोकार्थ—जिसकी सेना और प्रभाव को शत्रुओं ने नाश कर दिया है वैसा रुक्मी वहाँ से प्राण बचाकर आया है उसको तो वह भूल गया है किन्तु आपने जो विरूप किया है वह उसको याद कर रहा है, और अपनी प्रतिज्ञा को विफल समझ रहा है ।।५१।।

सुबोधिनी—बलभद्रेण मोचनेऽप्यसहायात् अन्येन मारणं संभवतीति द्विड्भिरुत्सृष्ट उक्तः । हतं बलं प्रभा च यस्य । द्विड्भिरेव । तस्यान्यद्विस्मृतम्, विरूपकरणं तु स्मरति । जातेऽपि

विरूपे यदि स्वाभिलषितः कश्चित्सिध्येत्, तदा न तथा खिन्नो भवेत् । किन्तु वितथः आत्मनो मनोरथो यस्य । तथापि स्वप्रतिज्ञां नान्यथा कृतवान् । भगवता हि तस्य भगिनी परिगृहीतेति ।।५१।।

व्याख्यार्थ—बलरामजी इसको छोड़ देने को तो कहते हैं, किन्तु अकेला होगा कोई इसका सहायक न होगा, तो दूसरे इसको मार डालेंगे ? इस शंका का निवारण करते हैं, कि शत्रुओं ने इसकी सेना और प्रभाव को नष्ट करने के बाद इसको छोड़ दिया है, जिससे इसको अन्य मारेंगे यह भय नहीं रहा है, इसने और सब भुला दिया है किन्तु विरूप होना तो अब तक स्मरण कर रहा है, जिससे खेद युक्त है, यदि विरूप होने पर कार्य सिद्ध हो जाता तो खिन्न न होता किन्तु अब तो जिस कार्य के लिए आया था वह भी जिसका सिद्ध न हुआ अतः अपनी प्रतिज्ञा को त्यागा नहीं है भगवान् ने इसकी बहिन का हरण किया है जिसको वह भगवान् से छुड़ा नहीं सकता है अतः स्वदेश कुण्डिनपुर को लौटना इसके लिए अशक्य हो रहा है ।।५१।।

आभास—अत एव कुण्डिनपुरं परित्यज्य अन्यत्रैव स्थित इत्याह अहत्वेति ।

आभासार्थ—इस कारण से ही कुण्डिनपुर न जाकर दूसरे स्थान पर स्थित हुआ, जिसका वर्णन "अहत्वा" श्लोक में किया हुआ है ।

श्लोक—अहत्वा दुर्मतिः कृष्णमप्रत्यूह्य यवीयसीम् ।
चक्रे भोजकटं नाम निवासाय महत्पुरम् ।
कुण्डिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रुषा ।।५२।।

श्लोकार्थ—उसकी प्रतिज्ञा थी कृष्ण को मारे बिना और छोटी बहिन को लाए बिना कुण्डिनपुर में प्रवेश न करूँगा, यह पूर्ण न होने पर भोजकट महान् नगर बनवाकर क्रोध से पूर्ण रुक्म वहां रहने लगा ।।५२।।

सुबोधिनी—यतोऽयं दुर्मतिः, अतस्तत्रैवावसत्, यत्र मुण्डितः । भोजा हि मृतकर्पटग्राहकाः । जात्यपकर्षे भोजाद्यवन इति यवनात्पूर्वं निरूपितः । तस्य कट इति मरणपर्यन्तं तत्रैव स्थास्यामीति तस्य ग्रामस्य नाम भोजकटमिति कृतवान् । यद्यपि न कोऽपि पुरुषार्थः नह्यसत्प्रतिज्ञाया अपालने कश्चन दोषोऽस्ति, तथापि भ्रातृत्वाद्रोषेण तत्रैव स्थितः ।।५२।।

व्याख्यार्थ—वह वहाँ ही रहने लगा, जहाँ मुण्डन हुआ और भोजकट नगर बसाया था क्योंकि दुर्मति है, भोज जाती वह है, जो मृतकों के कपड़े लेते हैं जाति का अपकर्ष दिखाने के लिए यवन से पहले कहा है, कि भोज से यवन हुए हैं, मरण पर्यन्त यहाँ रहूँगा, इसलिए इस नगर का नाम भोज कट धरा है हालांकि, यों करने से कोई पुरुषार्थ नहीं है, तथा झूठी प्रतिज्ञा का पालन नहीं करने में कोई दोष नहीं है, तो भी भाईपने से क्रोध आने से वहाँ हो रह गया ।।५२।।

आभास—ततो भगवतः कृत्यमाह भगवानिति ।

आभासार्थ—इसके बाद भगवान् ने जो किया वह "भगवान् भीष्मक" श्लोक में कहते हैं ।

श्लोक—भगवान्भीष्मकसुतामेवं निर्जित्य भूमिपान ।
पुरमानीय विधिवदुपयेमे कुरूद्वह ।।५३।।

श्लोकार्थ—हे कुरूद्वह ! भगवान् ने इस प्रकार राजाओं को जीत कर भीष्मक की कन्या को अपने पुर में लाकर विधि पूर्वक उससे विवाह किया ।।५३

सुबोधिनी—यदा सर्वथा निर्दुष्टा सर्वैस्त्यक्तममत्वा, तदापि भगवान् वीर्यशुल्केन विवाहं कर्तुम्, एवं प्रकारेण भूमिपान् निर्जित्य, गान्धर्वन्यायेन तामगृहीत्वा, उपनयनवत् विवाहस्यापि संस्कारत्वात् सर्वसम्मत्यर्थं स्वपुरीमानीय उपयेमे, विधानपूर्वकं विवाहं कृतवान् । क्षत्रियाः प्रायेणैवं न कुर्वन्तीति भगवानपि न कृतवानेव । किन्तु सद्बुद्ध्यर्थं वदतीति शङ्का स्यात्, तत्परिहरति संबोधनेन कुरूद्वहेति ।।५३।।

व्याख्यार्थ—भगवान् ने देखा कि यह सर्व प्रकार से निर्दोष है और मुझे ही वरण करना चाहती है, राजा लोग यों करना नहीं चाहते हैं, तब अपना वीर्य (पराक्रम) रूप शुल्क देकर विवाह करना योग्य समझ, आए हुए भूपतियों को जीत लिया और रुक्मिणी को ग्रहण किया किन्तु, गन्धर्व नीति से उसको ग्रहण न कर जैसे बालक का द्विजत्व सिद्ध के लिए यज्ञोपवीत संस्कार है, वैसे ही कन्या के लिए विवाह संस्कार है, अतः सर्व सम्मति से अपनी पुरी में लाकर विधि पूर्वक विवाह किया, क्षत्रिय तो बहुत करके यों नहीं करते हैं, भगवान् ने भी नहीं किया है, केवल सद्-बुद्धि के लिए कहा है, इस प्रकार की शंका मिटाने के लिए राजा को "कुरूद्वह" विशेषण दिया है जिसका आशय है कि आप कुरु कुल में उत्पन्न हुए हो अतः विश्वास करो कि भगवान् ने विधिवत् विवाह किया है ।।५३।।

आभास—सर्वेषां सम्मत्या विवाहः कृत इत्यत्र निदर्शनार्थं महोत्सवमाह तदा महोत्सव इति ।

आभासार्थ—सर्व सम्मति से जो विवाह किया उसके प्रदर्शन के लिए "तदा महोत्सवो" श्लोक में यहाँ वह वर्णन करते है ।

श्लोक—तदा महोत्सवो नृणां यदुपुर्यां गृहे गृहे ।
अभूदनन्यभावानां कृष्णे यदुपतौ नृप ॥५४॥

श्लोकार्थ—हे नृप ! यादवों के पति कृष्ण में, अनन्य भाव वाले, मनुष्यों के हरेक घर में उस समय यदुपुरी में महान् उत्सव हुआ ॥५४॥

सुबोधिनी—नृणामिति न केवलं बन्धूनाम्, अपि तु सर्वेषामेवेत्याह । यदुपुर्यां द्वारकायाम्, तत्र न कोऽपि विसम्मत इत्यर्थः । यादवानामपि वैमनस्यं परस्परं संभवतीति तदर्थमाह अनन्यभावानामिति । ननु यादवा उद्धताः, कथमनन्यभावा जाता इत्याशङ्क्याह कृष्णे यदुपताविति । यदा यादवानां भगवान्पतिर्जातः, तदा ते तथा जाता इत्यर्थः । नृपेति सम्बोधनं विश्वासार्थम् । यथा भवान् जात इति ॥५४॥

व्याख्यार्थ—श्लोक में "नृणां" पद का भाव यह है, कि केवल बान्धवों के घरों में उत्सव नहीं हुआ, किन्तु समस्त जनता के घरों में महान् उत्सव हुआ, इसलिए उसको पुष्ट करने के लिए "यदुपुर्या" पद दिया है अर्थात् सारी यदुपुरी में महान् उत्सव हुआ, तात्पर्य है कि सारी नगरी में कोई भी उत्सव के विपरीत नहीं था, यह कैसे सम्भव है, जब कि यादवों का परस्पर वैमनस्य होना सम्भव है, इसके उत्तर में कहते हैं, कि परस्पर वैमनस्य भले हो, किन्तु उन सब का कृष्ण में अनन्य भाव था क्योंकि श्रीकृष्ण यादवों के पति हैं, हालांकि, यादव स्वभाव से उद्धत होते हैं, तो भी अपने पति होने से श्रीकृष्ण में अनन्य भाव वाले हैं जब भगवान् यादवों के पति हुए तब वे वैसे अर्थात् अनन्यभाव वाले बने, नृपः यह सम्बोधन विश्वास के लिए दिया है, जैसे आप हुए हैं ॥५४॥

आभास—भगवता पारिबर्हमस्मिन्विवाहे न प्राप्तमिति, तदभावे विवाहशोभा च न तथेति तदर्थमाह नरा नार्यः प्रमुदिता इति ।

आभासार्थ - प्रत्येक विवाह में वर को दहेज मिलता है यहाँ तो भगवान् को दहेज न मिलने से विवाह में शोभा न हुई होगी ? इसके उत्तर में यह श्लोक "नरा नार्यः" कहते हैं जिससे विवाह की शोभा विशेष हुई।

श्लोक—**नरा नार्यः प्रमुदिताः प्रमृष्टमणिकुण्डलाः ।
पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ॥५५॥**

श्लोकार्थ—नगरी के नर तथा नारियों ने प्रसन्न होकर और उज्ज्वल मणियों के कुण्डलों को धारण कर, सुन्दर बस्त्रादि से अलंकृत कर बधु के लिए अनेक उपहार दिए ॥५५॥

सुबोधिनी—स्वयमलङ्कृताः पूर्णाः वरयोश्चित्रवाससोः अलङ्कृतयोरपि पारिबर्हमुपाजह्रुः । ननु नियमाभावत् किमिति तथा कृतवन्त इति चेत्, तत्राह वरयोरिति । वरयोस्तथा कर्तव्यमेवेति । यथैव दाक्षिणात्याचारः ॥५५॥

व्याख्यार्थ—नगरी के नर तथा नारियाँ पूर्ण रीति से अलंकृत होकर, इसी प्रकार सुन्दर वस्त्र आदि से समलंकृत जो बर वधु, उनको भेट दी, नगर वासियों के भेट देने का कोई नियम नहीं है, तो नियम विरुद्ध इन्होंने वैसा क्यों किया ? जिसके उत्तर में कहते हैं, कि "वरयोः" वधु वर को उपहार देना ही चाहिए, इसलिए दिया, जैसे ही दक्षिणा का शिष्टाचार है ॥५५॥

आभास—विवाह एव प्रथममुपस्थित इति, अकस्माच्च भगवानागत इति विशेषतस्तदर्थमलङ्करणाभावेऽपि स्वभावत एवालङ्कृतेत्याह सा वृष्णिपुरीति ।

आभासार्थ—पहले ही विवाह की तैयारी हो रही थी अचानक भगवान् भी पधार गए इसलिए विशेष प्रकार से उनके वास्ते नगरी को अलंकृत न करने पर भी वह स्वभाव से ही अलंकृत थी जिसका वर्णन "सा वृष्णि" श्लोक में करते हैं।

श्लोक—**सा वृष्णिपुर्युत्तभितेन्द्रकेतुभिर्विचित्रमाल्याम्बररत्नतोरणैः ।
बभौ प्रतिद्वार्युपक्लृप्तमङ्गलैरापूर्णकुम्भागुरुधूपदीपकैः ॥५६॥**

श्लोकार्थ—उस समय वह द्वारका ऊँचे इन्द्रध्वज, विचित्र मालाएं, वस्त्र, रत्न और तोरणों से शोभित थी और प्रत्येक द्वार पर मांगलिक साजों से सजी हुई थी,

जैसे कि जल से भरे हुए घड़े, अगर, धूप व दीपकों की जगमग से सुशोभित हो रही थी ॥५६॥

सुबोधिनी—सा द्वारका उत्तभितैः ऊर्ध्वं स्थापितैरिन्द्रादप्युच्चैः स्वर्गपर्यन्त गतैः केतुभिः ध्वजचिह्नैरन्यैश्च बभौ । अथवा । इन्द्रकेतुः पारिजातः, सुधर्मादिश्च, अन्ये च कल्पवृक्षाः । विचित्राणि माल्यानि अम्बराणि रत्नमयानि तोरणानि च स्वभावत एव । विशेषतोऽपि प्रतिद्वारि उपक्लृप्तानि मङ्गलानि । आपूर्णाः कुम्भाः अगुरुधूपाः दीपाश्च । एवमुपरि मध्ये अधश्च निवासस्थानानां शोभा निरूपिता ॥५६॥

व्याख्यार्थ—वह द्वारका स्वर्ग पर्यन्त गई हुई उच्च ध्वजाओं से सुशोभित हो रही थी, अथवा इन्द्र केतु अर्थात् पारिजात और सुधर्म आदि वृक्ष एवं अन्य कल्प वृक्ष उनसे सुशोभित थी विचित्र पुष्प, वस्त्र और रत्नमय तोरणों से स्वभाव से ही शोभा पा रही थी और यह विशेषता भी हो रही थी कि प्रत्येक द्वार पर मंगल साज सजाए गए थे जैसे कि जल से भरे हुए घड़े, अगर के धूप तथा दीप जल रहे थे, इस प्रकार ऊपर, मध्य और नीचे के निवास स्थानों की शोभा का निरूपण किया ॥५६॥

आभास—मार्गाणामाह सिक्तमार्गा इति ।

आभासार्थ—अब "सिक्तमार्गा" इन श्लोकों से मार्गों का वर्णन करते हैं ।

श्लोक—सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजाम् ।
गजैर्द्वास्सु परामृष्टरम्भापूगोपशोभिता ॥५७॥
कुरुसृञ्जयकैकेयविदर्भयदुकुन्तयः ।
मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावताम् ॥५८॥

श्लोकार्थ—बुलाए हुए प्रिय राजाओं के हस्तियों के मद से, उत्पन्न जल के गिर जाने से, मार्ग सिंचित हो रहे थे, द्वारों पर जो सुपारियाँ और केले के वृक्ष लगाए थे उनसे नगरी की शोभा विशेष हो रही थी हर्ष के मारे चारों ओर दौड़ते फिरते जो द्वारकावासी, उनके मध्य में कुरु, सृंजय, कैकेय, विदर्भ, यदु तथा कुन्ति इन देशों के राजा भी परस्पर आनन्दित हो फिर रहे थे ॥५८॥

सुबोधिनी—आहूता ये प्रेष्ठाः प्रियतमा राजानः तेषां मदच्युद्भिः गजगण्डनिःसृतमदैरेव सिक्तमार्गा जाता । अतो विशेषतः सम्मार्जनादौ नावकाशो जात इत्यर्थः । द्वारि तु कृतमित्याह द्वाःस्विति । परामृष्टाः परितः स्थापिताः ये रम्भादयः तैरुपशोभिता । जाते (ति) विवाहे

पश्चादानीय कृतमिति परामर्शः । षड्विद्या अपि क्षत्रिया अन्योन्यवैरं विहाय स्वभावतो द्वेषयुक्ता अपि रुक्मिण्या सहिते भगवति मिथो मुमुदिरे । कौरवा दुर्योधनादयः, सृञ्जयाः पाण्डवाः, पाञ्चाला वा धृष्टद्युम्नादयः । ते ह्युभये अन्योन्यवैरिणः । कैकेया विदर्भाश्च । तथा यादवाः कुन्तयश्च । ते त्रिविधा अपि परस्परविरोधिनः परस्परमेव मुमुदिरे । किञ्च । संभ्रमात्परिधावतां सम्बन्धिनोऽपि जाताः । उत्सवसंभृतिकरणार्थं तदीयाः सर्वे एव व्यापृता जाता इत्यर्थः ॥५८॥

व्याख्यार्थ—बुलाए हुए प्रियतम भूपतियों के हस्तियों के गण्ड स्थल से निःसृत मदजल से पुरी के मार्ग सिंचित हो गए थे, अतः उनको विशेष स्वच्छ करने का अवसर ही न मिला । द्वारों पर जो सजावट की, उसका वर्णन करते हैं,चारों तरफ जो केले के खम्भ, उनसे पुरी सुशोभित थी,विवाह हो जाने पर फिर आकर विधि पूर्वक विवाह किया, इस प्रकार सबका विचार था, छ प्रकार के क्षत्रिय जिनका परस्पर स्वभाव से ही द्वेष चला आता है, वे भी आपसी वैर का त्याग कर रुक्मिणी सहित भगवान् के दर्शन कर आनन्द मग्न हो गए, दुर्योधन आदि कौरव, पाण्डव, पांचाल अथवा धृष्टद्युम्न आदि वे दोनों परस्पर शत्रु हैं, कैकेय और विदर्भ, वैसे यादव और कुन्ति वे तीनों भी आपस में शत्रु हैं, किन्तु इस समय परस्पर प्रसन्न हो उत्सव मनाने लगे, और आदर से फिरते हुए परस्पर, सम्बन्धी बन गए, उत्सव का पूर्ण पोषण करने के लिए वे सब ही उसमें संलग्न हो गए ॥५८॥

आभास—न केवलं यदुपुर्यामेव सम्भ्रमः, किन्तु सर्वत्रैव लोके संभमो जात इत्याह रुक्मिण्या हरणं श्रुत्वेति ।

व्याख्यार्थ—केवल यदुपुरी में ही सम्भ्रम नहीं हुआ किन्तु लोक में सर्व स्थानों पर यह सम्भ्रम हुआ जिसका वर्णन "रुक्मिण्या" श्लोक में करते हैं ।

श्लोक—रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः ।
राजानो राजकन्याश्च बभूवुर्विस्मिता भृशम् ॥५९॥

श्लोकार्थ—जहाँ तहां से भगवान् के रुक्मिणी का आश्चर्य से किए हुए हरण सुनकर राजा और राज कन्याएँ बहुत अचम्भे में पड़ गए ॥५९॥

सुबोधिनी—आश्चर्यहरणं भगवत्कृतं श्रुत्वा इतस्ततो गीयमानम्, सर्वत्र श्रुतत्वात् असम्भावनारहितम् । राजानो विस्मिता जाताः, कथमेवं हृतमिति । राजकन्याश्च विस्मिताः । अस्मानपि नेष्यतीति ॥५९॥

व्याख्यार्थ—भगवान् ने आश्चर्यजनक जो रुक्मिणी का हरण किया था, उसको जहाँ तहाँ गाया हुआ सुनकर, राजा लोग आश्चर्य चकित हो गए और कहने लगे कि इस प्रकार कैसे हरण कर आए ? राजाओं की कन्याएँ भी अचम्भे में पड़ गईं, कि यों हम को भी हरण करेंगे, यह हरण की कथा सब स्थानों में सुनने से असम्भावना भी मिट गई ॥५९॥

आभास—एवं विशिष्टानां परमोत्सवमुक्त्वा साधारणानामपि परमोत्सवमाह द्वारकायामिति ।

आभासार्थ—इस प्रकार विशेष पुरुषों का महोत्सव कहकर साधारण जनता का महोत्सव "द्वारकायां" श्लोक से कहते हैं ।

श्लोक—द्वारकायाममूद्राजन् महामोदः पुरौकसाम् ।
रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रियः पतिम् ॥६०॥

श्लोकार्थ—हे राजन् द्वारका के साधारण नगर वासियों को महान् हर्ष हुआ क्योंकि लक्ष्मीपति श्रीकृष्ण के लक्ष्मी रूपी रुक्मिणी के साथ दर्शन हुए ॥६०॥

सुबोधिनी—पुरौकसः साधारणाः नगरवासिनः नगरव्यापार एव निमग्नः । तेषामपि महान्मोदो जातः । यद्यपि तेषां विवेको नास्ति, तथापि वस्तुसामर्थ्यादेव ते तथा जाताः । तदाह । रुक्मिण्या रमया लक्ष्म्या उपेतं सहितं कृष्णम्, स्त्रीणामेव हितार्थे अवतीर्णम्, श्रियः पतिं दृष्ट्वेति नित्यं हरिः श्रीसहितः । आविर्भावस्तु केवलस्यैवेति पुरवासिनां नित्यं स्त्रीप्रधानानां तथा मोदो न भवेत् । अधुना तु पूर्णशक्तिरेकत्रैव जातेति महानेव मोदः संतोषो जातः ॥६०॥

व्याख्यार्थ—नगर में रहने वाले जो साधारण जन धन्धे रोजगार में ही लगे रहते हैं, उनको भी महान् हर्ष हुआ, हाँलाकि उनको विवेक नहीं है तो भी वस्तु की सामर्थ्य से ही आनन्द हुआ, वह वस्तु सामर्थ्य का वर्णन करते हैं, स्त्रियों के हित के लिए अवतार धारण करने वाले, लक्ष्मी के पति श्रीकृष्ण के लक्ष्मीरूपिणी रुक्मिणी के साथ दर्शन हुए यों तो भगवान् सदैव लक्ष्मी के साथ विराजते हैं किन्तु जब अवतार लेते हैं तब आप अकेले ही प्रकट दर्शन देते हैं वैसे अकेले स्वरूप के दर्शन पुरवासियों को आनन्द होवे, क्योंकि वे नित्य स्त्री प्रधान हैं, अर्थात् वे सदैव स्त्रियों को साथ ही रखते हैं जिससे स्त्रियों का ही आदर करते हैं, अतः भगवान् को भी स्त्री सहित देख कर हो प्रसन्नचित्त हुए अब तो इस स्वरूप में पूर्ण शक्ति इकठ्ठी हुई है इसलिए बड़ा ही मोद यानि सन्तोष उत्पन्न हुआ है ॥६०॥

इति श्रीमद्भागवत महापुराण दशम स्कन्ध, उत्तरार्ध के ५१ वें अध्याय की श्रीमद्वल्लभाचार्य चरण कृत श्रीसुबोधिनी 'संस्कृत टीका' के राजस साधन अवान्तर प्रकरण, का पांचवाँ अध्याय, हिन्दी अनुवाद सहित संपूर्ण ।

राग सोरठ

स्याम जब रुकमिनी हरि सिधाए।
साल्व, दंतवक्र वारानसी कौ नृप, चढ़ै दल साजि मनो अभ्र छाए ।।
सुबोधिनी—सर्वासां त्रिभिर्विचारः, रुक्मिण्याः पञ्चभिः । साधारणीनां विचारे हेतुं वक्तुं प्रथमतो मोहमाह । अन्तःपुरे यावन्तो जनाः, सुतरां स्त्रियः तं प्रद्युम्नं भगवत्सदृशं दृष्ट्वा, कृष्णं मत्वा, प्रथमतः ह्रीताः लज्जिताः सत्यः कृष्णस्य स्त्रियो निलिल्युः । ता हि स्वच्छन्दं क्रीडमानाः स्थिताः अतो भगवान् दृष्टवानिति लज्जा । भगवत्समानतां वक्तुं विशेषणान्याह **जलदश्याममि**त्यादिना । भगवान् षड्गुणसहितः, स्वयमयमपि सप्तधा समान इति । श्रीवत्सकौस्तुभौ विना अन्यस्योपलक्षणं वर्णनम् । जलदश्याममिति रूपतुल्यता आकृतिस्तु पुत्रत्वादेव समाना भवति । पीतपट्टाम्बरमिति परिच्छदतुल्यता । **प्रलम्बबाहु**मिति स्त्रीणां सम्यक् ज्ञातावयवतुल्यता । **ताम्राक्ष**मिति अनौचित्यात् क्रुद्ध इव स ज्ञातः । इदं वैलक्षण्यमग्रे वक्ष्यति । **सुस्मितमि**ति । तासां भाव्यो धर्मः । **रुचिरमानन**मिति सर्वोत्कृष्टशोभा । अलङ्कृतं मुखाम्भोजं यस्य । नीलैर्वक्रैरलकादिभिः, आदिशब्देन कुण्डलकिरीटादिभिः, किंबहुना भगवदीया सर्वा सामग्री ग्राह्या । मुखं हि सर्वेषां भेदजनकम् । तदेव तुल्यं जातमिति भ्रमो युक्तः । यत्र क्वचिल्लीना इति निलीय दर्शनं सम्भवतीति निरूपितम् । ततो जिज्ञासायां भगवतः किञ्चिदाधिक्यं श्रीवत्सादिकं च दृष्ट्वा ईषद्वैलक्षण्येन साक्षाद्भगवानयं न भवतीति निश्चित्य, तत्तुल्यत्वेन तदीयत्वं च निश्चित्य, पुत्र एवायं भविष्यतीति प्रमुदिताः सत्यः स्त्रीरत्नसहितं तं द्रष्टुं सर्वा एव योषितः समागताः । शुचि स्मितं यासामिति तासां भावान्तरं निवारितम्॥२७-२९॥

व्याख्यार्थ —सकल स्त्रियों का विचार तीन श्लोकों से और रुक्मिणी का पांच श्लोकों से कहते हैं- साधारण स्त्रियों के विचार में हेतु को कहने के लिये प्रथम मोह को कहते है, अन्तःपुर में जितने जन हैं, बहुत कर स्त्रियां, वे, उस प्रद्युम्न को भगवान् के समान देखकर कृष्ण मानने लगी जिससे पहले लज्जित हो के छिपने लगी, क्योंकि वे उस समय स्वच्छन्द क्रीड़ा कर रही थीं, जिस क्रीड़ा को

अचानक आकर भगवान् कृष्ण ने देख लिया, इसलिये लज्जित हो गई, वह भगवान् जैसा ही है इसकी पुष्टि में उसके विशेषण कहे जाते हैं, जैसे भगवान् षड्गुण सहित हैं, वैसे यह स्वयं भी सातों प्रकार समान दीखता है, श्रीवत्स तथा कौस्तुभ मणि के सिवाय अन्य उपलक्षणों का वर्णन करते हैं, १-मेघ के समान श्याम वर्ण है जिससे रूप की समानता बताई आकृति तो पुत्र होने से समान होती है २-पीला पीताम्बर धारण किया था जिससे वस्त्रों से समानता हुई ३-लम्बी भुजाएं थी, जिससे स्त्रियों के अच्छी तरह अवयव के ज्ञान होने की समानता कही ४-अरुण नेत्र है क्योंकि अयोग्य कार्य होने से वह क्रुद्ध है यह जताया, वह विलक्षणता आगे स्फुट कहेंगे ५-सुन्दर मुसक्यान है यह स्त्रियों को प्रसन्न करने वाला धर्म है ६-मनोहर मुखवाला कहने से उसकी शोभा सबसे विशेष है यह दिखाया है. नीले रंग की टेढी अलकों तथा किरीट कुण्डलों से अलकृत मुखाम्भोज है, विशेष क्या कहें, भगवान् की सर्व सामग्री से सुसज्जित है। मुख तो समस्तों के चित्तका भेदन करने वाला है वह भी भगवत्समान था इसलिये यह भ्रम हुआ, कि कृष्ण है, वह भ्रम योग्य ही है, जहां कहां जो कुछ होता है वह लीला ही है इसलिये छिपकर देखने लगी, यों बन सकता है इसका निरूपण किया है, अनन्तर पूर्णतया जानने की ईच्छा होने से फिर ध्यान पूर्वक देखने लगी, तब ज्ञान हुआ कि भगवान् के स्वरूप में श्रीवत्स आदि चिन्ह विशेष है, वे इसमें नहीं है इस प्रकार थोड़ी विलक्षणता से समझ लिया कि यह साक्षात् भगवान् नहीं है, यों निश्चय कर उनके समान हैं जिससे उनका सम्बन्धी है ऐसा विश्वास कर यह भगवान् का पुत्र होगा, यों जानकर प्रसन्न हुई, हर्षित होती हुई स्त्रीरत्नसहित उसको देखने के लिये, सब स्त्रियां उसके पास आई, उस समय पवित्र मुसक्यान वालियां सब थी, क्योंकि पहले जो कृष्ण होने से पतिभाव था वह बदल कर अब दूसरा भाव अर्थात् पुत्र भाव हो गया है। २७,२८,२९॥

आभास—तत्र रुक्मिण्यपि समागता, तासां तस्याश्च पूर्वोक्ता धर्मास्तुल्याः। विशेष वक्तुं प्रक्रियान्तरमारभते अथेति।

आभासार्थ- वहां रुक्मिणी भी आ गई, उनका और रुक्मिणी के पहले कहे हुए धर्म समान है, अब उसके विशेष धर्म कहने के लिये दूसरी प्रक्रिया 'अथ' से प्रारम्भ करते हैं।

श्लोक—**अथ तत्रासितापाङ्गी वैदर्भी वल्गुभाषिणी।**
अस्मरत्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ॥३०॥

श्लोकार्थ—स्नेह से झर रहे स्तनों वाली, मधुर भाषिणी, श्यामकटाक्षवाली रुक्मिणी को खोये हुए पुत्र का स्मरण हो आया ॥३०॥

सुबोधिनी—भगवत्पुत्रो भवतीति सम्भावनया सिद्धम्। तासां त्वस्मत्पुत्रो न भवतीति निश्चयः। अस्यास्तु सन्देह इति भिन्नः प्रक्रमः। ननु पुत्रत्वे निर्धारिते पश्चात्स्वस्याः अन्यस्या वेति विचारो युक्त इत्याशङ्क्य, भगवत्पुत्रत्वं निर्धारयितुं एक-हेलया स्वस्या अपि प्रथमतः सादृश्यं ज्ञातवती-त्याह। तत्र स्त्रीसमूहे असितापाङ्गी शोभनदर्शना, असिते कृष्णे वा अपाङ्गौ यस्या इति, तेन ज्ञान-दृष्टिरस्याः अन्यापेक्षया विलक्षणेति इयमेव सादृ-श्येन पुत्रं स्मृतवती, यतो वैदर्भी अत्यन्तं भक्ता।

अन्तःकरणदेहयोः उत्तमत्वमुक्त्वा मध्ये वाचोऽप्युत्तमतामाह । अन्यथा कायवाङ्मनसां एकमतुल्यं स्यादिति । वल्गु भाषत इति वल्गुभाषिणी। साहश्येन संस्कार उद्बुद्ध इति स्वसुतं नष्टमस्मरत् । यद्यप्यत्यन्तशिशोः स्थूलस्यापि नावयवादिसाधारण्यम्, तथापि तस्याः त्रिविधोऽप्युत्कर्ष उक्त इति ताहशस्यैव वृद्धावयं भावो भवतीति निश्चित्य स्वसुतं नष्टमस्मरत् । स्नेहेन स्नुतौ पयोधरौ यस्या इति । आधिभौतिकस्य देहस्य आधिदैविकस्यापि तत्सम्पादकस्य संवादो निरूपितः ॥३०॥

व्याख्यार्थ—भगवान् का यह पुत्र है ऐसा सम्भावना से सिद्ध है, रुक्मिणी के सिवाय अन्यों को तो यह निश्चय हो गया था कि हमारा पुत्र नहीं है, इसको तो सन्देह हुआ, इसलिये यह क्रम अलग है यह भगवान् का पुत्र है ऐसा निर्णय होने के अनन्तर ही, अपना है या दूसरी का है जिसका विचार करना उचित है ? इस प्रकार संशय होने पर पुत्रत्व के निर्धार करने के लिये यकटक ध्यान करने से उसमें पहले अपनी सहशता जानने लगी, उस स्त्री समूह में सुन्दर थी अथवा कृष्णकटाक्षों वाली होने से इसकी ज्ञान दृष्टि अन्यों से विलक्षण है इसलिये इसके ही समानता के कारण पुत्र की स्मृति आ गई कि मेरा नष्ट हुआ पुत्र यही है, ऐसा स्मरण हो आने का कारण यह है, कि वंदर्भी परभक्त है, इस प्रकार अन्तःकरण और देह की उत्तमता कहकर मध्य में वाणी की भी उत्तमता बताते हैं, यदि तीनों की उत्तमता न कही जाय, तो उनमें समानता न होवे, मधुर भाषण करने वाली है, इस प्रकार तीनों की उत्तमता से एकता होने पर ही संस्कार जागृत हो गया, जिससे अपने खोये हुए पुत्र का स्मरण होने लगा, यद्यपि छोटे बालक और बड़े के स्थूल अवयवों में साधारण समानता नहीं दोखती है, तो भी उसके त्रिविध उतकर्ष के कारण वह समझ गई कि यह वही बालक हैं, बड़े होने से इस प्रकार हुआ है यह निश्चय कर नष्ट हुए पुत्र की स्मृति होने लगी जिससे स्नेह बढने के कारण स्तनों से दूध बहने लगा, आधिभौतिक देह को आधिदैविक देह बनाने वाले संवाद का निरूपण किया ॥३०॥

आभास—एतदोयाश्चत्वारो धर्मा निरूप्यन्ते । आन्तर एको, बाह्यास्त्रयः । आदौ परिदृश्यमानं सम्भावयति **को न्वयमिति** ।

आभासार्थ - इसके चार धर्म निरूपण किये जाते है, एक आन्तर और तीन वाहर के, पहले प्रकट देखने में आने वाले का वर्णन 'को न्वयं' श्लोक से करते हैं ।

श्लोक—**को न्वयं नरवैडूर्यः कस्य वा कमलेक्षणः ।**
धृतः कया वा जठरे केयं लब्धा त्वनेन वा ॥३१॥

श्लोकार्थ—कमल तुल्य नेत्रवाला, पुरुषों में श्रेष्ठ यह कौन है ? अथवा किसका है ? इसको किसने अपने कुक्षि में धारण किया है ? और इसने यह कौन स्त्री प्राप्त की है ? ॥३१॥

सुबोधिनी—नु इति वितर्के। अयं कः, देवादिषु मध्ये क इत्यर्थः। वैडूर्यमणिः श्यामपीतो भवति। अयं नीलमेघश्यामोऽपि तया सहितस्तत्कान्त्या वैडूर्यतुल्यो जातः। वैडूर्यमणिश्चेत्, नराकारः सहज एवोत्पन्नो भवेत्। सोऽपि चेतनो भवेत् तदा प्रद्युम्नतुल्यः स्यादिति मत्वाह **नरवैडूर्य** इति। ननु कस्यचिद्वंशे एतादृशा एवोत्पद्यन्ते यथा देशविशेषे पाषाणा हीरकरूपा भवन्ति, तस्मान्नाश्चर्यमिति चेत्, तत्राह **कस्य वेति**। को वा एतादृशः यस्यायं पुत्रो भवेत्। कमलेक्षणत्वान्न स्थावरस्य। स्त्रिया अपि भावोऽस्मिन् दृश्यत इति न स्थावराज्जातः। नापि मानसः, नापि केवलात् पुरुषात्। अतः का वा तादृशपुरुषयोग्येति तां भावयति **कया वा जठरे धृत इति**। अस्तु वा इयं भार्या एतद्योग्या, कथमनेनोपलब्धेत्याह **केयं लब्धेति**। अनेनापि इयं का लब्धा। वेत्यानादरे। रुक्मिणीहृदये सा न सम्यग्भातीति। पूर्वजन्मसम्बन्धिनीति ॥३१॥

व्याख्यार्थ—'नु' पद संदेह अर्थ में है यह देव आदि में कौन है ? वैडूर्यमणि श्यामपीत होती हैं यह नील मेघवत् श्याम होते हुए भी मणि के संसर्ग से वैडूर्य मणि के संसर्ग से वैडूर्यमणि के समान हो गया है, यदि वैडूर्यमणि सम हो तो पुरुषाकार इसका सहज ही उत्पन्न होना चाहिये, वह चेतन भी होना चाहिये अतः यह प्रद्युम्न के बराबर है यों समझ कर कहा कि 'न वैडुर्य' ऐसे नर जहाँ-तहाँ उत्पन्न नहीं होते है किन्तु किसी वंश में ही वैसे उत्पन्न होते हैं जैसे विशेष देश में हीरकरूप पाषाण पैदा होते हैं, इसी से कोई आश्चर्य नहीं है कि यह किसी ऐसे विशेष वंश में उद्भूत हुआ है यदि यों है तो किसके यहां उत्पन्न हुआ है? वह वंश कौन सा है? जिसमें यह पुत्ररूप से प्रकट हुआ है, उस वंश में भी वह कौन सा पिता है जिसका यह पुत्र होके आया है। किसी स्थावर का भी नहीं है क्योंकि कमलनेत्र है, और यह भी दीख रहा है, कि इसमें स्त्री भाव भी है अर्थात् केवल स्त्री वा पुरुष से उत्पन्न नहीं हुआ और न केवल मन से प्रकट हुआ है ? ऐसे सुयोग को गर्भ में धारण करने वाली माता कौन है ? जिसने अपनी कुक्षि में इसको धारण किया ? अस्तु, इसके योग्य यह भार्या इसने कैसे प्राप्त की है ? अथवा 'वा' शब्द से अनादर प्रकट करती हुई कहती है कि यह इसने कैसी स्त्री प्राप्त की है ? रुक्मिणी के हृदय में वह अच्छी नहीं जचती है, कारण कि वह पूर्व जन्म की सम्बन्धिनी है इसका ज्ञान रुक्मिणी को नहीं है ऐसा प्रतीत होता है ॥३१॥

आभास—एतद्दर्शनेन स्वपुत्रस्मरणात् सादृश्यमेव स्मारकमिति सादृश्यमुपपादयति।

आभासार्थ—इसके देखने से पुत्र का स्मरण हो गया उस स्मृति का कारण सादृश्य है जिसका प्रतिपादन करती है।

श्लोक—मम चाप्यात्मजो नष्टो नीतो यः सूतिकागृहात्।
एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ॥३२॥

श्लोकार्थ—मेरा पुत्र भी नष्ट हो गया था, जिसको कोई सूतिका गृह से हरण कर ले गया था, यदि वह कहीं जीता होगा तो उसकी इतनी ही आयु है और रूप भी ऐसा ही है ॥३२॥

सुबोधिनी—मम चापीति । यथा कस्याश्चिदयं पुत्रः, एवं ममापि पुत्र एतादृशो भवतीति । **आत्मज** इति गर्भाज्जातः । भिन्नतया विद्यमानं चारुदेष्णमन्यं वा तुल्यतया निरूपयतीत्याशङ्क्य व्यावर्तयति **नष्ट** इति । तर्हि मृतस्य कथं तुल्यतेत्याशङ्क्याह **नीत** इति । अयं नाशः अदर्शनार्थः । सूतिकागृहादित्यनिर्देश एव केनचिन्नीतः । तर्हि कथं रक्षसा घातकेनान्येन वा नीतः । तुल्यो भविष्यतीति चेत्, तत्राह **यदि जीवति कुत्रचिदिति** । तदा एतत्तुल्यं वयो रूपं च यस्य तादृशो भवेत् । एतावता स्वपुत्रस्य सम्भावनजीवितस्य एतत्तुल्यता निरूपिता ॥३२॥

व्याख्यार्थ—जैसे यह किसी का भी खोया हुआ पुत्र यहां आ गया है वैसे मेरा भी खोया हुआ पुत्र कहीं होगा ? 'आत्मज' शब्द से यह बताया कि वह मेरे गर्भ से उत्पन्न पुत्र नष्ट हो गया है पृथक्रूप से विद्यमान इसकी सुन्दरता वा अन्यगुणों से तुल्यता निरूपण करती हुई कहती है कि वह मर नहीं गया किन्तु खो गया था, वह भी जब उसके दस दिन भी नहीं बीते थे तब सूतिका गृह से कोई हरण कर गया था, राक्षस वा किसी दूसरा घातक लेगया होगा तो वह मार दिया गया होगा वा उनके पास होगा अतः इसकी उसके साथ समानता कैसे होगी? यदि यों कहो तो मेरा कहना है कि यदि वह, कदाचित् जीवित है, तो इसके समान ही उसकी आयु है तथा रूप भी ऐसा ही है, यों कहकर यह बताया है, कि जिसके जीने की सम्भावना है वैसे अपने मेरे पुत्र की इससे समानता है ॥३२॥

आभास—अतः परं भेदं निराकृत्य स एवायं भवितुं युक्त इति विशेषं निरूपयति द्वाभ्याम् ।

आभासार्थ—इसके बाद यह वह नहीं है, वैसे भेद को दूर कर दो श्लोकों से विशेषणरूप से निरूपण करती है कि वह ही यह होने के योग्य है ।

श्लोक—**कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः ।**
आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ॥३३॥
स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः ।
अमुष्मिन्प्रीतिरधिका वामः स्फुरति मे भुजः ॥३४॥

श्लोकार्थ—इसने भगवान् के समान आकार, अवयव, चाल, स्वर, हास और दृष्टि कैसे प्राप्त की है ? कदाचित् वही बालक तो यह नहीं है ? जिसको मैंने गर्भ में धारण किया था; क्योंकि इसमें मेरा प्रेम अधिक हो रहा है, इसीलिए मेरी वाम भुजा भी फड़क रही हैं ॥३३-३४॥

सुबोधिनी - **कथं त्वनेनेति** । अस्तु वा अयमुत्तमः । तथापि शार्ङ्गधन्वनः सारूप्यं तदपुत्रत्वे कथमनेन संप्राप्तम् । **शार्ङ्गधन्वन** इत्यनेन ज्याघाताः भगवतो निरूपिताः । ते अस्मिन्नपि दृश्यन्त इति कायवाङ्मनोभिस्तुल्य इति । समानान् षड्धर्मानाह **आकृत्या अवयवैः गत्येति** । अवयवा-

वयविकार्याणि तुल्यानि निरूपितानि । स्वरो वाचिकः, हासावलोकनं मानसं भावसूचकमिति । एतत्तु भेदे न घटत इति स एवायं वा भविष्यतीति संभावयति । नूनं निश्चयेन ; यो भगवत्पुत्रः, तत्रापि यो मया गर्भे धृतः । ननु भगवाननेकपत्नीक इति द्वीपान्तरे देशान्तरे वा भगवतः सकाशात्कस्यांचिज्जातो भवतु, ततः सर्वमुपपद्यत इति, कथं त्वया जठरे धृतो भविष्यतीत्याशङ्क्याह **वामः स्फुरति मे भुज** इति । वामभुजस्फुरणमत्यन्तप्रियस्य समालिङ्गनं सूचयति । येन परमानन्दो भवति, तादृशः पुत्र एव ।।३३ ३४।।

व्याख्यार्थ—भले यह उत्तम हो, तो भी यदि यह भगवान् का पुत्र नहीं है तो इसने उनकी सरूपता कैसे प्राप्त की ? 'शार्ङ्गधन्वन्' भगवान् के नाम कहने से यह बताया कि जैसे भगवान् की आकृति में धनुष की रस्सी के घात है वैसे इसके आकार में भी प्रतीत होते हैं यों कहने से बताया कि यह काया, वाणी और मन से भगवान् के समान है. भगवान् के समान ६ धर्मों का वर्णन करती है, आकृति, अवयव और गति समान हैं, अवयव और अवयवि के कार्य तुल्य निरूपण किये हैं, स्वर, वाचिक है और हास से देखना मन के भावों का सूचक है, यह तो भेद होने पर नहीं बन सकता है, इसलिये वह ही यह है. जो भगवान् क पुत्र मैंने गर्भ में धारण किया था ऐसी निश्चय से सम्भावना है. यह तुम्हारा कहना कैसे निश्चित सत्य माना जाय, जब कि भगवान् की अनेक स्त्रियां है किसी दूसरे द्वीप वा देश में भगवान् द्वारा किसी स्त्री से उत्पन्न हुआ होवे ? यों मान लेने से सबकुछ बन सकता है तो तुमने गर्भ में इसको धारण किया यह माना जाय जिसके उत्तर में कहती है 'वाम स्फुरति मे भुजः' मेरी वाम भुजा फड़क रही है स्त्री का वाम भुजास्फुरण, अत्यन्त प्रिय के समालिगन का सूचना देता है, जिससे परम आनन्द होता है. वैसा होने से यह मेरा पुत्र हो है ।३३-३४।।

आभास—एवं तस्मिन् स्वपुत्रत्वं निश्चित्यापि सम्यक् लोकतोऽपरिज्ञाने तथा व्यवहारः कर्तुं न शक्यत इति संदिहाना इव स्थिता । ततो भगवान् निश्चयार्थं सर्वैः सह समागत इति वदति **एवमिति** ।

आभासार्थ—इस प्रकार यह मेरा ही है पुत्र यह निश्चय करके भी लोक को अब पूर्ण परिज्ञान नहीं हुआ है अतः उससे पुत्र व्यवहार नहीं किया जा सकता है इस प्रकार संदेह करती हुई के समान खड़ी ही रही अनन्तर भगवान् इसका निश्चय कराने के लिये समस्तों के साथ पधारे यह 'एव' श्लोक से कहा जाता है ।

श्लोक—एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः ।
देवक्यानकदुन्दुभ्यामुत्तमश्लोक आगमत् ।।३५।।

श्लोकार्थ—इस प्रकार रुक्मिणी के विचार करते हुए, देवकी और वसुदेवजी के साथ उत्तमकीर्ति भगवान् श्रीकृष्णचन्द्र आए ।।३५।।

सुबोधिनी—यतोऽयं देवकीसुतः भक्तहितकारी, सुतरां स्त्रीणाम्, रुक्मिणी च भक्ता, सा च मीमांसमाना क्लेशेनैवं स्थिता। अतस्तद्दुःखनिराकरणार्थं पुत्रत्वेन स्वीकारे पित्रादयः प्रयोजका इति देवक्या आनकदुन्दुभिना च सहितः समागतः। यतोऽयमुत्तमश्लोकः। अन्यथा वाच्यता भवेदिति। अत्र भीतिरतितं अक्षरच्युतकालङ्कारं बोधयति। यथा राक्षो रक्ताक्ष इति। अयं च पुत्रः च्युत एव स्थानात्पुनः प्राप्त इति सूचयितु आ सर्वं सह अगमत् ॥३५॥

व्याख्यार्थ—क्यों पधारे? जिसका परिज्ञान कराने आचार्य श्री कहते हैं कि देवकी के पुत्र भक्त हितकारी हैं, सुतराम् स्त्रीभक्तों का, रुक्मिणी भक्त है वह तो अब तक विचार करती हुई क्लेश से स्थित थी, अतः उसके दुःख का निवारण करने के लिये यदि उसको पुत्र समझ स्वीकार किया जावे तो भी उसमें पिता-माता आदि की आज्ञा ही प्रेरक है, अतः भगवान् अकेले न पधारकर देवकी और वसुदेव को भी पधरा कर आये, क्योंकि यह उत्तम श्लोक है, यों न किया जाय तो निन्दा होती, भय से अक्षर न लिखे जाने पर उसको 'अक्षरच्युतकालंकार कहकर समझाया जाता है जैसे राक्षसों को रक्ताक्ष कहा जाता है, और यह पुत्र भी स्थान से च्युत ही हुआ और फिर प्राप्त हुआ है, यों सूचित करने के लिये 'आगमत्' पद में आ' उपसर्ग और 'अगमत्'गम धातु का भूतकाल में लकार है जिसका अर्थ है सब के साथ आये ।॥३५॥

आभास—आगत्यापि स्वयं कथने बहिर्मुखाः लोभं संपादयेयुरिति तूष्णीं स्थित इत्याह **विज्ञातार्थोपीति**।

आभासार्थ—भगवान् आकर भी कुछ बोले नहीं चुप होकर खड़े रहे, क्योंकि भगवान् ने समझा कि यदि मैं स्वयं बोलूंगा तो बहिर्मुख लोग कहेंगे कि भगवान् पुत्र लोभ कर रहे हैं नारद के मुख से सारी कथा विज्ञातार्थोऽपि'श्लोक के द्वारा कहलाई।

श्लोक— **विज्ञातार्थोऽपि भगवांस्तूष्णीमास जनार्दनः।**
नारदोऽकथयत्सर्वं शम्बराहरणादिकम् ॥३६॥

श्लोकार्थ—आप सब जानते थे तो भी चुप होकर बैठ गए। तब नारद ने, शम्बर ने बालक का हरण किया, वहाँ से लेकर यहाँ लौटकर जैसे आया, वह सर्व वृत्तान्त कह सुनाया ॥३६॥

सुबोधिनी—ज्ञाने भगवानिति हेतुः। तूष्णींभावे **जनार्दन** इति। सहि जनानामविद्यामर्दयतीति। निन्दायां तु तेषामविद्या न गमिष्यतीति। तदा भगवदिच्छया नारदः समागत्योक्तवानित्याह **नारदोऽकथयत्सर्वमिति**। स्वकृतमेवेति दोषपरिहारोऽप्यनेन कृतः। शम्बरस्य आहरणमारभ्य समागमनपर्यन्तं सर्वमुक्तवान् ॥३६॥

व्याख्यार्थ—ज्ञान में भगवान् हेतु हैं और मौन धारण में जनार्दन, वह मनुष्यों की अविद्या को नाश करने वाले हैं, निन्दा करने पर तो उनकी अविद्या नष्ट नहीं होगी तब भगवान् की इच्छा से

नारद ने आकर सर्व समाचार कहा, अपना किया हुआ ही कहा, यों कहते हुए अपने दोष का भी नारद ने परिहार किया अर्थात् अपना दोष मिटा दिया, शम्बर ने बालक का अपहरण किया वहां से लेकर यहां वह बालक स्त्री समेत आकर पहुँचा यह समस्त वृतान्त कहकर सुना दिया ।।३६।।

आभास—नारदवाक्यं हि सर्वेषामेव संमतम्, ततः सर्वैरङ्गीकर्तव्यमिति सापत्न्यात् कृष्णस्त्रियो रुक्मिणीव्यतिरिक्ताः प्रथममङ्गीकृतवत्य इत्याह **तच्छ्रुत्वेति ।**

आभासार्थ – नारद का कहना सबको पसन्द आया, जिससे सबको अङ्गीकार योग्य है इसलिये पहले रुक्मिणी की जो सोतिन, श्रीकृष्ण की अन्य स्त्रियां थीं उन्होंने इस कहने को स्वीकार किया जिसका वर्णन 'तच्छ्रुत्वा' श्लोक में करते है ।

श्लोक—तच्छ्रुत्वा महदाश्चर्यं कृष्णान्तःपुरयोषितः ।
अभ्यनन्दन्बहूनब्दान्नष्टं मृतमिवागतम् ।।३७।।

श्लोकार्थ— यह बड़े आश्चर्य की बात सुन, भगवान् के अन्तःपुर की स्त्रियां बहुत वर्षों के बाद मानो मर कर पीछा आया हो, वैसे प्रद्युम्न को आया हुआ मान बहुत आनन्दित हुईं ।।३४।।

सुबोधिनी - राजस्य एताः । **महदाश्चर्यं** श्रुत्वेति । कथं मत्स्यभक्षितस्य जीवनम्, संपूर्णावयवत्वं च, कथं वा विशसने अक्षतत्वम्, समुद्रप्रक्षेपे वा अमरणमिति । तासामनङ्गीकारे बाधकमाह **कृष्णान्त पुरयोषित** इति । स्वस्याप्येवं पुत्रस्य नयने अन्या अप्यङ्गीकारं न कुर्युरिति भावः । अभ्यनन्दन् । अयं पुत्रो भवति अस्माकमिति । सापत्न्यभावेन दोषदर्शिन्यो न जाताः । किञ्च । परमस्नेहेन अमितः आनन्दयुक्ता अपि जाताः तत्र हेतुः । बहूनब्दान् बहुवर्षपर्यन्तं नष्टमदृष्टमिति । अत्यन्तसंयोगे द्वितीया । न केवलं चिरकालदर्शनमेव तत्र हेतुः, किन्तु मृतश्चेदायाति शीघ्रमेव, तदापि महानान्दो भवतीति, मृतं पश्चात्स्वस्थमागतं यथा सादरं लोका अभिनन्दनं कुर्वन्ति । देहे विद्यमान एव जीवने अभिनन्दनम् । ।।३७।।

व्याख्यार्थ ये राजसी हैं जो नारद से सुना वह बहुत आश्चर्य कारक था, जैसा कि, जिसको मत्स्य ने खाया वह कैसे बच गया ? फिर विशेष अचम्भा तो यह है कि समस्त अवयव ज्यों के त्यों हैं अथवा खड्ग के क्षत होने पर भी अक्षत रहा है, समुद्र में फेंकने पर भी मरे नहीं, वे यदि इसको अङ्गीकार न करें तो इनके लिये यह बाधक था कि श्रीकृष्ण के अन्तःपुर की स्त्रियां थीं, वे विचारने लगी की यदि हमारा पुत्र भी यों हरण हो कर पीछे लौटे तो दूसरी भी उसको अङ्गीकार न करेंगी । अतः वह सोतिन होते हुए भी प्रसन्न हुई, यह हमारा पुत्र है यों कहकर सोतिन के दोषवाले भाव दिखाये नहीं, किन्च परम स्नेह से पूर्णरीति से, आनन्द युक्त होने लगीं वैसे आनन्द होने में कारण बतलाते हैं कि बहुत वर्षों से जो खोया था, वह स्वस्थ अवस्था में आकर मिला है, केवल बहुत दिन से खोया हुआ मिला है यही प्रसन्नता मे कारण नहीं है,किन्तु यदि मर गया हुआ जानने के बाद जल्दी

भी आ जावे तो भी हर्षोल्लास होता है, मर गया और फिर वह स्वस्थ आकर मिले तो उसका लोक आदर सहित अभिनन्दन करते हैं, देह में होते हुवे भी जीवन में अभिनन्दन होता है। ३७।

आभास— सात्त्विकानामभिनन्दनमाह **देवकीति**।

आभासार्थ—"देवकी वसुदेवश्च" श्लोक से सात्विकों का अभिनन्दन कहते हैं।

श्लोक—**देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः।**
दम्पती तौ परिष्वज्य रुक्मिणी च ययुर्मुदम् ॥३८॥

श्लोकार्थ—देवकी, वसुदेव, राम, कृष्ण तथा स्त्रियें और रुक्मिणी; ये सब युगल को पाकर अथवा इससे मिलकर आनन्द को प्राप्त हुए ॥३८॥

सुबोधिनी तथा स्त्रियः सात्त्विक्यः तौ दम्पती मायावती प्रद्युम्नश्च परिष्वज्य पुत्रत्वात् पुत्रवधूत्वाच्च मुदं ययुः। रुक्मिणी चेति भिन्नतया निरूपणं सर्वेषां यावत्सुखं तावदेकस्या एव जातमिति ज्ञापनार्थम् ॥३८॥

व्याख्यार्थ—देवकी, वसुदेव, राम और कृष्ण तथा सतोगुणी स्त्रियां मायावती (रति) और प्रद्युम्न से मिलकर 'आलिंगन कर" प्रसन्न हुऐ, क्योंकि एक पुत्र था दूसरी पुत्र वधु थी, रुक्मिणी का नाम पृथक् लेने का आशय यह है कि जितना आनन्द इन सकलों को हुआ उतना आनन्द एक रुक्मिणी को ही हुआ ॥३८॥

आभास—साधारणानां तामसानां सम्मतिमाह **नष्टं प्रद्युम्नमायातमिति**।

आभासार्थ—वहां जो साधारण तामस गुण वाले स्थित थे उनकी सम्मति 'नष्टं प्रद्युम्न' श्लोक से कहते हैं।

श्लोक—**नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः।**
अहो मृत इवायातो बालो दिष्ट्येति हाब्रुवन् ॥३९॥

श्लोकार्थ—द्वारकावासी खोये हुए प्रद्युम्न का पीछा आना सुनकर कहने लगे कि मानो मर कर पीछा आया हो, वैसे यह बालक भी आ गया है, यह प्रसन्नता का विषय है, बहुत अच्छा हुआ ॥३९॥

सुबोधिनी—तेषां विपरीतभावनाभावाय वचनमाह **अहो मृत इवायात** इति। लौकिकभाषायामश्लीलवचनं न दोषाय। हेत्याश्चर्ये। अहो इति च। गमनागमनयोरुभयत्राश्चर्यमाह ॥३९॥

व्याख्यार्थ—उनको विपरीत भावना नहीं थी इसलिए कहा है कि 'अहो मृत इवायत इति' मानो मरकर फिर जीवित होकर लौटे हैं, लौकिक भाषा में अश्लील वचन कहने का दोष नहीं गिना जाता है, हे और अहो ये दोनों पद आश्चर्य बताते हैं, जाने और आने दोनों कार्य आश्चर्य कारक हैं ॥३९॥

आभास—कामस्य महता प्रयासेन देहग्रहणे फलं जातं नवेति सन्देहं निराकर्तुमाह य वै मुहुरिति ।

आभासार्थ—कामदेव ने बहुत प्रयास के अनन्तर देह ग्रहण की जिसका फल हुवा या नहीं ? इस सन्देह का 'यं वै' श्लोक में निराकरण करते हैं ।

श्लोक—**यं वै मुहुः पितृसरूपनिजेशभावास्त-**
न्मातरो यदभजन् रहरूढभावाः ।
चित्रं न तत्खलु रमास्पदबिम्बबिम्बे
कामे स्मरेऽक्षिविषये किमुतान्यनार्यः ॥४०॥

श्लोकार्थ—श्रीकृष्ण के सदृश प्रद्युम्न का रूप देख, उसमें अपने स्वामी की भावना हो जाने से, उसकी माता रुक्मिणी आदि वे भी उससे प्रेम करने लगीं, यह कोई आश्चर्य की बात नहीं है, लक्ष्मी के निवास स्थान श्रीकृष्ण के पुत्र कामदेव का केवल स्मरण होते ही जब मन चलायमान हो जाता है, तब साक्षात् मूर्तिमान काम-रूप प्रद्युम्न के देखने से उनका मोहित होना कोई बड़ी अचम्भे की बात जब नहीं है, तो अन्य स्त्रियों का तो कहना ही क्या ? ॥४०॥

सुबोधिनी—पितृसरूपतया पितुः समानं यद्रूपं तेन कृत्वा निजेशभावाः, कृष्ण एवायमिति बुद्धियुक्ताः । निजेशः कृष्णः । तस्य मातरोऽपि ऊढभावाः सत्यः तद्दर्शनेन उद्गतकामाः रहः एकान्तमभजन् । निलीना जाताः । एतच्चित्रं न रमाया आस्पदरूपं यद्बिम्बं भगवान् श्रीनिवासः तस्य बिम्बं कार्यं प्रतिबिम्ब इति यावत् । बिम्बवदेव प्रतिबिम्बेऽपि बुद्धिर्भवतीति न कोऽपि दोषः । रमास्पदपदं लक्ष्म्या अपि तत्र अदर्शनार्थम् । तेन लक्ष्मीश्चेत्तत्र, वयं कथं नेति तासां भ्रमे हेतुर्मुख्यो निरूपितः । किञ्च, कामे कामात् सर्वं सम्भवति । किञ्च । स्मरे अक्षविषये सति स्मृत एवानर्थं करोति, किमुत प्रत्यक्षविषयः । यत्र भगवत्स्त्रीणामेवैषा व्यवस्था, तत्रान्यनारीणां कामोद्बोधः किं वक्तव्य इत्यर्थः । एवं कामस्य सर्वलोकेषु प्रतिष्ठितत्वमुक्तम् । स्त्रीषु प्रतिष्ठितः सुखहेतुर्भवति, न तु पुरुषेष्विति तथोक्तम् ॥४०॥

व्याख्यार्थ – प्रद्युम्न का पितृ समान रूप देख कर उसमें अपने पति का भाव हो जाने से, उसकी माताएं भी काम जागृत होने पर, एकान्त में उसका सेवन करने लगी, इसमें कोई आश्चर्य नहीं है, लक्ष्मी के आस्पद भगवान् का ही यह प्रतिबिम्ब है, प्रतिबिम्ब के समान ही बुद्धि होती है इस लिये कोई दोष नहीं है, वह लक्ष्मी का निवास स्थान है यों कहने से यह बताया है कि जब लक्ष्मी वहाँ रहती है तो हम वहाँ क्यों न रहें ? इस प्रकार उनके भ्रम होने में यह मुख्य कारण बताया है, काम होने पर, काम से सर्व होना सम्भव है, जब काम अक्ष विषय होता है तब केवल याद करते ही अनर्थ करता है, तो फिर प्रत्यक्ष होवे तो क्या अनर्थ करेगा वह कहा नहीं जा सकता, जहां उसके दर्शन से भगवान् की स्त्रियों की यह दशा है वहां अन्य स्त्रियों में काम जागृत हो अनर्थ करे इसमें कहना ही क्या है ? इस प्रकार सर्व लोकों में काम की प्रतिष्ठा हुई यों कहा, स्त्रियों में प्रतिष्ठित काम सुखका कारण होता है न कि पुरुषों में स्थित होने से सुख का कारण होता है, यों वैसे कहा है ।।४०।।

इति श्रीमद्भागवत महापुराण दशम-स्कंध (उत्तरार्ध) ५२वें अध्याय की श्रीमद्वल्लभाचार्य-
चरण द्वारा विरचित श्री सुबोधिनी (संस्कृत-टीका) का सात्विक प्रमेय
अवान्तर प्रकरण का छठा अध्याय हिन्दी
अनुवाद सहित सम्पूर्ण ।

इस अध्याय में वर्णित लीला का निम्न पद से अवगाहन करें

राग बिलावल

प्रद्युम्न जन्म सुभ घरी लीन्हौ ।
काम अवतार लियौ बदत यह बात जग, ताहि सम तुल्य नहिं रूप चीन्हौ ।।
पृथी पर असुर संबर भयौ अति प्रबल, तिन उदधि माहिँ, तिहिँ डारि दीन्हौ ।
मच्छ लियौ भच्छि सो मच्छ मछुवी गह्यौ, असुरपति कौँ सु लै भेँट कीन्हौ ।।
मच्छ के उदर तैं बाल परगट भयौ, असुर मायावती हाथ दीन्हौ ।
कह्यो यह काम परिनाम तेरौ पुरुष बचन, नारद सुमिरि रति सु लीन्हौ ।।
भयौ जब तरुन तब नारि तासौं कह्यौ, रुक्मिनी मात हरि तात तेरौ ।
नाम मम रति बिदित बात जानत जगत, काम तुम नाम पुनि पुरुष मेरौ ।।
असुर कौ मारि परिवार कौ देहि सुख, देउँ विद्या तुम्हें मैं बताई ।
बिना विद्या ताहि जीति सकि है नहीं, भेद की बात सब कहि सुनाई ।
प्रद्युम्न सकल विद्या समुझि नारि सौं, असुर सौं जुद्ध मांग्यौ प्रचारी ।
काटि करवार लियौ मारि ताकौं तुरत, सुरनि आकास जै धुनि उचारी ।।
बहुरि आकास मग जाइ द्वारावती, मातु मन मोद अति हीँ बढायौ ।।
भयौ जदुवंस अति रहस मनु जनम भयौ, सूर जन मंगलाचार गायौ ।।

॥ श्रीकृष्णाय नमः ॥

॥ श्री गोपीजनवल्लभाय नमः ॥

॥ श्री वाक्पतिचरणकमलेभ्यो नमः ॥

● श्रीमद्भागवत महापुराण ●

दशम स्कन्ध (उत्तरार्ध)

श्रीमद्वल्लभाचार्य-विरचित **सुबोधिनी टीका** (हिन्दी अनुवाद सहित)

श्रीमद्भागवत-स्कन्धानुसार ५६वाँ अध्याय

श्री सुबोधिनी अनुसार ५३वाँ अध्याय

राजस-साधन-अवान्तर-प्रकरण

"७वाँ अध्याय"

स्यमन्तकमणि की कथा, जाम्बवती और सत्यभामा के साथ श्रीकृष्ण का विवाह

कारिका—सप्तमे कामतः प्रोक्तो विवाहस्तामसः परः ।
सात्त्विकश्च प्रसङ्गेन क्लेशेनोभे निवारिते ॥१॥
क्लेशापनोदनार्थाय चौर्यमत्र निरूप्यते ।
वाचिकं कायिकं चैव कायेन वचनेन च ॥२॥
सम्बन्धी च तथा भक्तः स्वापराधापनुत्तये ।
सत्यभामा जाम्बवती ताभ्यां सम्यक् निरूपिते ॥३॥
गुणा एतास्ततोऽग्रे तु विद्यारूपा निरूपिताः ।
एवमष्टौ महिष्यो हि सात्त्विक्यस्तु ततः पराः ॥४॥
विवाहाः सप्त कामेन कृपया तु सहस्रशः ।
विधितस्त्वेक एवोक्तो द्वयोरत्र निरूप्यते ॥५॥

कारिकार्थ— सातवें अध्याय में जो विवाह कहे हैं, वे काम से किए हुए हैं, उनमें से जाम्बवती का विवाह तामस है और सत्यभामा का सात्त्विक है; इन दोनों के विवाह तामस सात्त्विक कहने से शेष रुक्मिणी का विवाह स्वतः राजस सिद्ध है, यद्यपि रुक्मिणी जाम्बवती को विवाह भगवत्परिग्रह होने से सात्त्विक कहे जा सकते हैं, किन्तु उनको सात्त्विक न कहने का कारण यह है कि वे दोनों भगवान् क्लेशों से लाये हैं, अतः वे सात्त्विक विवाह नहीं है, सत्यभामा को पिता ने लाकर दान कर दी, जिससे उस विवाह में क्लेश न हुआ, जिससे वह सात्त्विक है, इसके विवाह में क्लेश न होने का कारण चौर्य प्रसङ्ग है, जिसका यहाँ वर्णन किया गया हैं, सत्राजित ने वाणी से झूठा कलङ्क लगाकर वाचिक और स्वयं गुफा में जाकर युद्ध किया, जिससे कायिक दोष किया, शतधनु के वचन से उस मिथ्या अभिशाप को मिटाया, ऐसे सत्राजित ने और भक्त जाम्बवान् ने अपने अपराध को मिटाने के लिए दोनों ने आकर सत्यभामा और जाम्बवती भगवान् को अर्पण की, सत्यभामा तथा जाम्बवती के विवाह का कारण वाचिक और कायिक मिथ्याभिशाप था, जिसका निरूपण किया। ये रुक्मिणी, जाम्बवती और सत्यभामा; रजो, तमो और सतोगुण रूप हैं, आगे तो विद्या रूप से इनका निरूपण हुआ है। इस प्रकार आठ महिषियाँ सात्त्विक गुण वालियाँ हैं और सात काम से हैं, कृपा से तो सहस्रों किए हैं,विधि अनुसार तो एक ही कहा है। इस प्रसङ्ग में दोनों का विवाह चौर्य प्रकरण में निरूपण किया है ॥१–५॥

— इति कारिका सम्पूर्ण —

आभास—रुक्मिण्या विवाहं पुत्रसम्पत्तिं चोक्त्वा, निमित्तवशात् सत्यभामाया विवाहमाह **सत्राजित** इति ।

आभासार्थ—रुक्मिणी का विवाह और पुत्र सम्पत्ति को कहकर, कारणवश 'सत्राजितः' श्लोक से सत्यभामा के विवाह का वर्णन शुकदेवजी करते हैं।

श्लोक—श्रीशुक उवाच-**सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः ।**
स्यमन्तकेन मणिना स्वयमुद्यम्य दत्तवान् ॥१॥

श्लोकार्थ—श्री शुकदेवजी कहने लगे कि हे राजन् ! सत्राजित् ने भगवान् का अपराध किया था, उस अपराध का दोष निवृत्त हो, इसलिए सत्राजित् ने स्वयं आकर स्यमन्तकमणि सहित अपनी कन्या भगवान् को अर्पण की ॥१॥

सुबोधिनी— सत्राजित्शब्दः तकारान्तः। अकारान्तोऽपि। सत्रान् रक्षकसहितानपि जयतीत्यर्थे क्विप्। सत्राणां जितं यस्मादिति क्तान्तेन बहुव्रीहौ अदन्तता भवति। एतदधीन एव महतामपि जय इति द्वितीयोर्थः। स्वतनयां स्वयमुद्यम्य दत्तवानिति। अप्रार्थितः अनभिप्रेतश्च। तथापि दाने हेतुः **कृतकिल्बिष** इति। कृतापराधः। तदपराधदूरीकरणार्थं स्यमन्तकेन मणिना सह। यत्कृते अपराधः तदपराधनिमित्तं दण्डार्थे कन्यां च दत्तवान्। संक्षेपकथेयमिति केचित्। वस्तुतस्तु न समाधिभाषा। नह्युदारलीलावतः अपकीर्त्यादिकं समाधिकार्यं भवति। भक्तिसाधकानामेव चरित्राणां वक्तव्यत्वात्। **कृतकिल्बिष** इति। यथाकथञ्चिदपराधोऽपि सम्भवति। अतोऽनभिप्रेतत्वेन कल्पान्तरत्वेन वा अवचनम्। वस्तुतः सत्यभामा सरस्वत्यंशा भूम्यंशा वेति तस्या विवाहार्थं तथोद्योगः भगवतैव कृतः। स्वीकारोऽत्र वक्तव्यो राजसानाम्, तदर्थं स्त्रीप्रकरणे सत्यभामादीनां परिग्रहमात्रमत्र वक्तव्यम् ॥१॥

व्याख्यार्थ – भगवान् ने सत्राजित से कन्या मांगी नहीं थी और न अभिप्रेत ही थी, तो भी सत्राजित ने स्वयं कन्या अर्पण की, जिसका कारण है कि सत्राजित ने भगवान् का अपराध किया था, जिसे मिटाने के लिये स्यमन्तकमणि लाकर दी और अपराध करने के दण्ड रूप में कन्या अर्पण की है, कोई कहते हैं कि यह कथा संक्षेप में कही गई है, वास्तविक रीति से तो यह कथा समाधि-भाषा नहीं है, क्योंकि, उदार लीला करने वालों की अपकीर्ति आदि समाधिभाषा का कार्य नहीं हो सकता है समाधिभाषा में तो भक्ति साधक चरित्र ही वक्तव्य होते हैं, यहां केवल प्रथम श्लोक समाधिभाषा है, विस्तार जो है वह लौकिकी भाषा है, जैसे तैसे कभी अपराध भी होता है, अतः अभिप्रेत न होने से वा कल्पान्तर की कथा होने से नहीं कहा है, वस्तुतः सत्यभामा तो सरस्वती अथवा पृथ्वी की अंश रूपा है, इसलिये उसके विवाह के लिये भगवान् ने ही वैसा उद्योग किया है, यहां राजसों का स्वीकार वक्तव्य है, उसके लिये यहां स्त्री प्रकरण में सत्यभामादि का ही परिग्रह मात्र कहना चाहिये, मात्र पद से यह सूचित किया है कि रुक्मिणी विवाह के प्रसंग में जो विस्तार किया है, वह समाधि भाषा नहीं है, किन्तु लौकिकी भाषा है, इसलिये ही आचार्य श्री ने टीका में मात्र पद दिया है।

आभास—नन्वाकाङ्क्षापूरणाभावात् संक्षेपपरत्वमेव कुतो न भवतीति चेत्। मैवम्। मित्रविन्दाविवाहवद्यावदुक्तेनैव आकाङ्क्षानिवृत्तिसम्भवात्। विशेषं पृच्छति।

आभासार्थ—यदि कहो कि आकांक्षा पूर्ति के अभाव से संक्षेप पर है यों क्यों न कहा जावे तो कहते हैं कि इस प्रकार मत कहो, मित्रविन्दा के विवाह की भाँति सारा कहने से ही आकांक्षा निवृत्ति होती है अतः राजा पूछता है "सत्राजितः" श्लोक से।

श्लोक—राजोवाच—**सत्राजितः किमकरोद्ब्रह्मन्कृष्णस्य किल्बिषम्।**
स्यमन्तकः कुतस्तस्य कस्माद्दत्ता सुता हरेः ॥२॥

श्लोकार्थ—राजा ने कहा-हे ब्रह्मन्! सत्राजित ने कृष्ण का कौन सा अपराध

किया ? स्यमन्तकमरिण उसके पास कहाँ से आई ? उसकी कन्या भगवान् को किस कारण से दी ? ॥२॥

सुबोधिनी—सत्राजित इति । **ब्रह्मन्निति** ज्ञानार्थम् । कृष्णस्य सदानन्दस्य कथं वा कोऽप्यपराधं कुर्यात् । तत्रापि पालकस्य । अपराधनिमित्तः स्यमन्तको वा भगवद्भक्तानां कुतः देवतान्तरभजनात् तथात्वे कथं वा तस्य निरोधे सम्बन्ध इति प्रश्नाभिप्रायः । विरुद्धानामपकारकरणं युक्तम् । तथा सति तेषां सर्वस्वेन सह कन्यादानं चायुक्तम्, तस्मात् कथमयमुभयात्मक इति । कस्माद्धेतोः सुतां दत्तवान् । कन्यापि सूर्यादेव प्राप्ता वरलब्धा, न तु तस्य औरसी, भगवान् नन्दपुत्र इव तस्यापि कन्येति पुराणान्तरव्यवस्था । अत एव यादवानां विवाहदोषो न शङ्कनीयः । अत्रापि 'स्त्रीरत्नं रत्नमेव चे'ति वाक्यात् देवादेव प्राप्तमिति लक्ष्यते । भगवानपि अक्लिष्टकर्मा सगोत्रापक्षे विवाहं न कुर्यात् ॥२॥

व्याख्यार्थ—हे ब्रह्मन् ! संबोधन श्रीशुकदेवजी को इसलिये दिया है कि आप को सबका ज्ञान है, जिससे आप सब कुछ बता सकोगे, सदानन्द स्वरूप तथा पालक कृष्ण का कैसे कोई भी अपराध कर सके ? भगवद्भक्तों का स्यमन्तक अपराध का कारण कैसे हो सकता है ? अन्य देव के भजन से यों होते हुए, फिर उसका निरोध में सम्बन्ध कैसे ? यह प्रश्न करने का अभिप्राय है जो विरोध करते हैं उनका अपकार करना योग्य ही है, यों होने पर उनको सर्वस्व के साथ कन्यादान करना तो उचित नहीं है इस कारण से यहां दोनों बात कैसे ? किस कारण से कन्या दी, वह कन्या सूर्य देव के वर में प्राप्त हुई थी, उसकी ओर से पुत्री न थी जैसे भगवान् नन्द का पुत्र है वैसे यह कन्या इसकी पुत्री थी, अन्य पुराण का यह निर्णय है, इस कारण से इससे विवाह करने में यादवों को दोष नहीं हैं, भागवत में भी स्त्री रत्न, रत्न ही है इस वाक्य से, देव से ही प्राप्त हुई जानी जाती है भगवान् भी अक्लिष्ट कर्मा हैं, जिससे सगोत्र का विवाह नहीं कर सकते ॥२॥

आभास—विस्तरेण वक्तुं कथामारभते **आसीदिति** ।

आभासार्थ—विस्तार से कहने के लिये 'आसीत्सत्राजितः' श्लोक से कथा प्रारम्भ करते हैं ।

श्लोक—श्रीशुक उवाच-**आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा ।**
प्रीतस्तस्मै मरिण प्रादात्सूर्यस्तुष्टः स्यमन्तकम् ॥३॥

श्लोकार्थ—श्री शुकदेवजी ने कहा—सत्राजित भक्त का सूर्य स्वामी होते हुए भी परम मित्र था, जिससे सूर्य ने प्रसन्न होकर उसको स्यमन्तक मरिण दी थी ॥३॥

सुबोधिनी—स्वतन्त्रकथेयमित्यप्यासीदित्यनेन सूचितम् । सत्राजित आसीदिति भिन्नं वाक्यम् । तस्य महत्त्वं ख्यापयितुमाह । सूर्योऽपि भक्तस्य परमः सखा आसीदिति । भक्तस्य सख्यं शीघ्रं प्रयच्छतीति सूर्यस्य स्वभावो वर्णितः । अनेन सूर्यः परमदयालुः, अल्पेऽपि भजने बहु प्रयच्छतीति

निरूपितम् । ततो यज्जातं तदाह **प्रीतस्तस्मै मणिं प्रादादिति** । मणिः स्यमन्तकः । कुत्रत्यो मणिरित्याकाङ्क्षायामाह **सूर्य** इति । स हि मणिं सूते । सर्वमेव सूर्यात्प्रभूतमिति तस्य मणिमात्रप्रसवे न दूषणम् । तदर्थमेव मणिरुत्पादित इति लक्ष्यते । यतः **प्रीतः**, तस्य भक्त्या संतुष्टः, स्यमन्तकमुत्पादितवान् । उत्पाद्यापि ततोऽपि प्रीतः प्रकर्षेणादात् । तस्मिन् सामर्थ्यं स्थापयित्वा प्रदात् । प्रकर्षेणैव दानात् भोगार्थं भोगसाधनसम्पादनार्थं च तज्जातमिति लक्ष्यते ॥३॥

व्याख्यार्थ – "आसीत्" पद से यह भी बताया है कि वह स्वतन्त्रक था है, "सत्राजित था" यह पृथक् वाक्य है उसका महत्व प्रकट दिखाने के लिये कहा है कि, सूर्य देव स्वामी होते हुए भी भक्त का परम मित्र था,सूर्य का स्वभाव ही ऐसा है,जो भक्त का शीघ्र ही सखा बन जाता है इससे यह सिद्ध हुआ कि सूर्य परम दयालु है, थोड़ा भी भजन करने से बहुत देता है यह निरूपण किया, उसके अनन्तर जो हुआ जिसका वर्णन करते हैं कि सूर्य ने प्रसन्न होकर उसको मणि दी, मणि का नाम स्यमन्तक था, वह मणि सूर्य के पास कहां से आई ? इस प्रश्न के उत्तर में कहा है, कि सूर्य स्वयं मणि को उत्पन्न करता है, मणि को उत्पन्न करने में सूर्य के लिये किसी प्रकार का दोष नहीं है, क्योंकि जब सब सूर्य से पैदा हुआ है, तो मणिमात्र उत्पन्न करने में कौनसा दूषण उसको लगता है, यों जाना जाता है यह मणि इसके लिये पैदा की है क्योंकि इस पर भक्ति से प्रसन्न हुआ है जिससे मणि को पैदा किया है, न केवल पैदा ही की, किन्तु उससे भी विशेष प्रसन्न हो उसमें अपना सामर्थ्य स्थापित कर प्रसन्नता से मणि इसको दी, प्रसन्न हो के देने से वह मणि भोग और भोगके साधनों का साधक भी हुई यों जाना जाता है ॥३॥

आभास—अतस्तस्य प्रथमतो भोगमाह **स तं बिभ्रदिति** ।

आभासार्थ—इसी कारण से "स तं बिभ्रन्" श्लोक में पहले उसके भोग का वर्णन करते हैं ।

श्लोक—स तं बिभ्रन्मणिं कण्ठे भ्राजमानो यथा रविः ।
प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ॥४॥

श्लोकार्थ—वह सत्राजित कण्ठ में उस मणि को धारण करने से सूर्य के समान प्रकाशमान हो गया और द्वारका में प्रविष्ट हुआ तो उसके तेज से इसको किसी ने नहीं पहचाना ॥४॥

सुबोधिनी – स्वतेजस्तस्मिंस्थापितमिति तद्धारणेन सूर्य एव धृतः । अत एव तत्प्रभावाद्यथा रविः, तथा भ्राजमानो जातः । स चेदन्यत्र तिष्ठेत्, न काप्यनुपपत्तिर्भवेत् । सूर्यश्च रक्षको भवेत् । स पुनस्तद्गृहीत्वा द्वारकास्थितान् भक्तान् वञ्चयन्निव समागतः । ततः सूर्येण उपेक्षित इत्यभिप्रायं वक्तुं तस्य द्वारकाप्रवेशमाह **प्रविष्टो द्वारकामिति**। **राजन्निति** सम्बोधनमन्यविषये अन्यो रक्षां न करोतीति ज्ञापयितुम् । तस्य मनोरथः सिद्ध इत्याह **तेजसा नोपलक्षित इति** ॥४॥

व्याख्यार्थ—सूर्य ने मणि में अपना तेज स्थापित किया था, जिसके धारण करने से मानो

सत्राजित ने सूर्य को धारण किया है,इस कारण उसके प्रभाव से जैसा सूर्य है वैसा ही यह चमकनेलगा। यदि दूसरे स्थान पर मणि धारण करके जाता तो किसी प्रकार हानिनहीं होती क्योंकि वहां सूर्य रक्षा कर सकते, किन्तु वह तो मणि ग्रहण कर, द्वारका में स्थित भगवद्भक्तों को ठगने के लिये आया, जिससे सूर्य ने प्रसन्न हो, इसकी उपेक्षा की, इसकी उपेक्षा की, इस अभिप्राय को प्रकट करने के लिये इसका द्वारका में प्रवेश का वर्णन किया है, राजन् यह सम्बोधन इस बातको जताने के लिये दिया है कि, दूसरों के कार्यों में कोई दूसरा रक्षा नहीं करता है उसका मनोरथ इतना ही था, कि मुझे कोई पहचाना न सके। वह सिद्ध हुआ, मणि के धारण करने से पहचानने में नहीं आया ॥४॥

आभास—तस्य प्रभावः सर्वजनीनो जात इति वक्तुं लोकानां भ्रममाह तं **विलोक्येति** ।

आभासार्थ– उसका प्रभाव सब मनुष्यों पर हुआ, यह बतलाने के लिये लोकों को भ्रम का वर्णन 'तं विलोक्य' श्लोक में करते हैं।

श्लोक—तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः ।
दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यशङ्किताः ॥५॥

श्लोकार्थ—लोक उसको दूर से देखकर, तेज से चकाचौंध दृष्टि हो गए, तब चौपड़ खेल रहे भगवान् के पास कोई आकर कहने लगा कि कदाचित् सूर्य आ रहा है ॥५॥

सुबोधिनी—निकटे ज्ञायेतापि । दूरादेव तत्रापि तेजसा मुष्टदृष्टयः । स्वस्वामिनः स्थाने महान्तोऽपि समायान्तीति संतोषात् भगवत्स्थाने समागताः । भगवानपि अन्यासक्तः नास्य सन्माननं करिष्यति, ततोऽयं अस्मान् विलम्बितः तेजसा पीडयिष्यतीति, सूर्यात् शङ्किताः लौकिकव्यसनरूपे द्यूते अक्षैर्दीव्यते भगवते शशंसुः । शतमक्षान् विजानातीति मध्येऽधिदेवन एव सभ्ये अक्षक्रीडेति विमर्शः । अन्यथा धर्मस्थापनार्थमवतीर्णः कथमक्षक्रीडां कुर्यात् । मुख्यं हि तद्धर्मस्थानमिति । सूर्यस्य समागमनं बाधितं मत्वाह **भगवत** इति ॥५॥

व्याख्यार्थ—निकट हो तो पहचान भी जाय, यह तो दूर थे और वहां से ही तेज के कारण नेत्रों की दृष्टि चकाचोन्ध हो गई अतः पहचान न सके। मन में समाधान किया, कि हमारे स्वामी के स्थान पर महान् आत्माएँ भी आती हैं यों संतोष कर भगवान् के स्थान पर गये, वहां देखा कि भगवान् तो अन्य कार्य में आसक्त हुवे हैं अतः इसका सम्मान अब नहीं करेंगे, इस कारण से वह हम को बहुत समय तक पीड़ा करेगा, क्योंकि मन में शंका होने लगी थी कि यह सूर्य है, अतः लौकिक व्यसन रूप चौपड़ का खेल खेलत हुए भगवान् को कहने लगे, विशेष प्रकार से चौपड़ खेलने वाले राजा लोगों को अधिदेवन के दिन चौपड़ खेल खेलने में कोई दोष नहीं, यों करने से उनको निद्रा भी नहीं आती है यों न होता तो धर्म स्थापन के लिये अवतार लेने वाले चौपड़ कैसे खेले ? चौपड़ के

खेल का स्थान मुख्य अधर्म का स्थान है, "भगवते" पद से यह बताया कि यह आगमन सूर्य का नहीं है, केवल लोगों को आशंका हुई है ।५।।

आभास—सूर्यागमनेन स्वतोपि ज्ञातमहत्त्वा: स्तुत्वा भगवन्तं विज्ञापयन्ति **नारायणे**तित्रिभिः ।

आभासार्थ लोक स्वतः सूर्य के महत्व को जानते हैं अतः सूर्य का आगमन समझकर, भगवान् की पहले स्तुति करते हैं, अनन्तर प्रार्थना करते हैं कि सूर्य देव आ रहा है यह वर्णन "नारायण" इन तीनों श्लोकों से करते है ।

श्लोक—नारायण नमस्तेऽस्तु शङ्खचक्रगदाधर ।
दामोदरारविन्दाक्ष गोविन्द यदुनन्दन ।।६।।
एष आयाति सविता त्वां दिदृक्षुर्जगत्पते ।
मुष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः ।।७।।
नन्वन्विच्छन्ति ते मार्गं त्रिलोक्यां विबुधर्षभाः ।
ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ।।८।।

श्लोकार्थ—हे शङ्ख चक्र गदा धारण करने वाले नारायण ! हे दामोदर ! हे कमल नयन ! हे गोविन्द ! हे यदुनन्दन ! हे जगत् के पति ! यह तेज किरणों वाले, किरणों के समूह से मनुष्यों के नेत्रों की दृष्टि को हरण करते हुए, सूर्य नारायण आपको देखने (मिलने) के लिए आ रहे हैं । हे प्रभु ! त्रिलोकों में जो श्रेष्ठ देवता हैं, वे भी आपके मार्ग को ढूँढ़ने की इच्छा करते हैं, यादवों में गुप्त विराजमान आपको जानकर सूर्य नारायण दर्शन के लिए आज आ रहे हैं ।।६-८।।

सुबोधिनी—नारायणपदं सूर्यान्तर्यामी नारायण इति तस्मिन्नागते अन्तर्यामिप्रेरणव्यतिरेकेण कार्यं न सिध्यतीति विज्ञापनार्थं सूर्यागमनं सम्भवतीति हेतुरुक्तः । अतस्ते नमः । नमस्कारमात्रं वा अस्मत्साध्यमिति । **शङ्खचक्रगदाधरे**ति । शेषशायिनं नारायणं व्यावर्तयति । नारायणत्वं वा स्थापयन्ति । **दामोदरे**ति भक्तकृपालुत्वम्, तादृशस्यात्रागमने हेतुरुक्तः । **अरविन्दाक्षे**ति । समागतस्य तापापनोदनं कार्यमुक्तम् । **गोविन्दे**ति तथाकरणे आवश्यकत्वम् । यतोऽयमिन्द्रो जातः । किञ्च, **यदुनन्दने**ति तदर्थमेवावतीर्णः ।

अत एवात्र बहु कार्यं तवास्तीति स्वत आगमनाभावात् स्वयमागत इत्याहुः **एष आयाती**ति । आगतस्य विज्ञाप्यमस्तीत्याहुः **सविते**ति । प्रसवितायम् । सांप्रतं च भगवान् लीलया च तिष्ठतीति तदनुगुणप्रसवार्थं प्रष्टुमागत इत्यर्थः । प्रश्नस्तु दूतद्वारापि सम्भवतीति विशेषमाहुः **त्वां दिदृ-**

क्षुरिति। स्नेहाभावेऽपि दर्शनमावश्यकमित्यत्र हेतुमाहुः **जगत्पत** इति। स्वस्य निवेदने हेतुं वदन्त आहुः **मुष्णन्गभस्तिचक्रेणेति**। दूरे स्थितस्य गभस्तयोऽल्पीयांसः समायान्ति, निकटे तु गभस्तिचक्रेण पीडयति। **नृणामित्यल्पसत्त्वता**। तद्धयं दोषो निवारणीय इत्याशङ्क्य तस्य स्वाभाविकोऽयमित्याह **नृणां चक्षूंषि तिग्मगुरिति**। ज्ञानप्रदो भगवान् अत्र समागतः। ज्ञानसाधनमेव दूरीकरोतीति प्रतिविधेयः।

ननु तथापि भवन्तोन्तरङ्गाः, तान्निवारयतेति चेत्, तत्राह **नन्वन्विच्छन्तीति**। देवाः समागच्छन्तः कथं वारणीयाः, तत्रापि स्वप्रभुं द्रष्टुम्, तत्रापि विबुधर्षभाः। किञ्च। अद्य यदुषु गूढं ज्ञात्वा समागताः। तत्र यदि कश्चिन्निवारणं कुर्यात्,तदा अनेनैव प्रतार्यत इति तमेव मारयेयुः। ननु तथापि सूर्यो नायास्यति, स हि सर्वदा व्यापृतः, तत्राह **द्रष्टुं वायात्यज** इति। ब्रह्मा वा द्रष्टुमायाति। अवतीर्णस्य रूपान्तरस्वीकरणेनान्यथात्वे पूर्वव्यवहारोऽनुचित इत्याशङ्क्याह **प्रभो** इति। हे सर्वसमर्थ ॥६-८॥

व्याख्यार्थ— आप सूर्यान्तिर्यामी नारायण हैं, उनके आने पर ही कार्य सिद्ध होता है क्योंकि अन्तर्यामी की प्रेरणा के सिवाय कोई भी कार्य सिद्ध नहीं होता है, यों जताने के लिये सूर्य का आगमन बन सकता है, यह हेतु कहा है. अतः आपको नमस्कार है, नमस्कार के सिवाय विशेष तो हम से हो नहीं सकता। शंख,चक्र और गदा को धारण करने वाला विशेषण देने से शेष नारायण से पृथक्ता दिखाई, अथवा नारायणत्व की स्थापना की है, 'दामोदर' नाम से यह बताया है कि आप सदैव भक्त पर कृपा करते हैं, भक्त कृपालुत्वही आपके यहां आने का कारण है, 'कमलनयन' नाम से बताया है, कि आप यहां पधार कर विरही भक्तों के ताप दूर करने का कार्य करते हैं 'गोविन्द' नाम से यह बताया है कि आपको यों करना आवश्यक है कारण कि आप इन्द्र बने हैं, विशेष में आप 'यदुनन्दन' हैं, जिससे आपने इसके लिये ही अवतार लिया है ॥६॥

आपको यहां बहुत कार्य हैं जिससे सूर्य ने समझा, कि आप का आगमन न हो सकेगा अतः स्वयं वह आया है, आये हुवे को कुछ जानने वा पूछकर कार्य करने की इच्छा है इसलिये 'सविता' नाम दिया है, इस समय भगवान् लीला कार्य करने में स्थित हैं अतः उसके अनुकुल कार्य करने आप से पूछने के वास्ते आया है, यदि पूछना है तो दूत द्वारा भी पुछा सकता है, फिर आया क्यों ? इसके उत्तर में कहा है, कि केवल पूछना नहीं है, किन्तु उसको आपके दर्शन की भी इच्छा थी इसलिये भी आया है, स्नेह होने पर भी आपका दर्शन करना आवश्यक है क्योंकि आप जगत् के स्वामी हैं, हम आपको इसलिये निवेदन करते हैं कि यह सूर्य तेज किरणों वाला है जिसके तेज से हमारे नेत्र चकाचौंध हो कर पीड़ित हो रहे हैं, दूर में स्थित की किरणें थोड़ी चकाचौन्ध करती है, हम मनुष्य अल्पबलवाते हैं, जिससे यह पीड़ा सहन नहीं कर सकते हैं, क्योंकि यह इसके लिये स्वाभाविक है, जो मनुष्यों के नेत्रों का अपने तेज रश्मियों से चकाचौन्ध कर पीड़ित करे, यहां ज्ञान देने वाले भगवान् आये हैं, ज्ञान साधनों को दूर फेंक देते हैं अत. इनका समादर स्वागत करिये।

हम क्यों करें, आप भी हमारे अन्तरंग है, आप ही इनका निवारण करो, यदि आपका इस प्रकार कहना हो, तो उसके लिये हमारा निवेदन है, कि देवता आपके यहां मिलने, दर्शन करने वा किसी कार्य के लिये आवे उनको कैसे रोका वा लौटाया जाय ? आप उनके स्वामी है, स्वामी के दर्शन के लिये आते हैं और आने वाले देवों में श्रेष्ट देव आते हैं और विशेषता तो यह है, कि आप यादवों

में गुप्त रूप से पधारे हैं, आज इस गोप्य को जान कर आये हैं, ऐसी स्थिति में कोई उनको रोके, तो वे समझेंगे, कि यह ही हम से प्रवंचना करता है यों समझ, उसको ही मारे, आप ज्यों समझते है कि सूर्य आ रहा है यों नहीं है वह न आवेगा क्योंकि उसको बहुत काम है जिनमें रुका हुआ रहता है, यदि वह नहीं है, तो कदाचित ब्रह्मा दर्शन के लिये आ रहा है, अवतार लेने पर दूसरा रूप धारण होता है, इसलिये उस अन्य रूप में पहलेसा व्यवहार करना उचित नहीं है, यदि यों कहो तो वह बात असमर्थों के लिये है, आप तो 'प्रभु' होने से सर्व समर्थ हैं कोई रूप धारण करे, तो भी वे के वे ही हैं बदलते नहीं हो, अतः श्रेष्ठ देव आते ही रहते हैं ।।६-७-८।।

आभास—तदा भगवान् कर्म न परित्याज्यमिति स्वयं तथैव स्थितः प्रजानां मोहं दूरीकृतवानित्याह **निशम्येति** ।

आभासार्थ- ये वचन उन के सुनकर भी, प्रारम्भ किया हुआ कर्म नहीं छोड़ना चाहिये यों विचार कर आप वैसे ही बैठे रहे, और प्रजाओं के भ्रम को दूर कर दिया जिसका वर्णन 'निशम्य' श्लोक से करते है ।

श्लोक—श्रीशुक उवाच-**निशम्य बालवचनं प्रहस्याम्बुजलोचनः ।**
प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ।।९।।

श्लोकार्थ—श्री शुकदेवजी कहते हैं कि कमल नेत्र भगवान् बालकों जैसे प्रजा के वचन सुनकर हँसे और उनका भ्रम मिटाने के लिए कहने लगे कि यह सत्राजित है, जो मणि से प्रकाशित हो रहा है, सूर्य देव नहीं है ।।९।।

सुबोधिनी—बालानां अज्ञानां वचनम् । ते हि स्वोत्कर्षमेव विचारयन्ति । नतु निमित्तम् । तथैतेऽपि स्वोत्कर्षत्वेन मदुत्कर्षमेव भावयन्ति । ततो यं कञ्चन समागच्छन्तं महत्त्वेन मत्सम्बन्धित्वेन च कल्पयन्ति । तस्मात् स्वोत्कर्षपरान् अज्ञान् दृष्ट्वा प्रहस्य दृष्ट्यैव तेभ्यः सुखं दत्तवानित्याह **अम्बुजलोचन** इति । असौ देवरूपो रविर्न भवति, किन्तु रवेस्तेजो । रविभक्तश्चायं भवति, तेन देवपदं संगच्छते, किन्तु सत्राजिदयम् । कथमेवं जात इति चेत्, तत्राह **मणिना ज्वलन्निति** ।।९।।

व्याख्यार्थ—बाल शब्द यहां अज्ञों[1] के लिये दिया है अर्थात् भगवान् अज्ञों के वचन सुनकर हंसने लगे, क्योंकि ये अपनी बड़ाई का ही विचार करते हैं किन्तु कारण का विचार नहीं करते है, वैसे ये भी अपने उत्कर्ष से मेरे उत्कर्ष की ही भावना करते है, वा मेरा उत्कर्ष ही बताते है इस कारण से जो कोई आता है, उसको मेरे सम्बन्धित्व के कारण महान् समझते हैं, और भगवान् कमल नेत्र हैं जिससे इन मूर्खों को अपने उत्कर्ष के परायण देख, हँस कर, दृष्टि से ही उनको सुख देने

१—नादानों, अनजानों

लगे, एवं कहने लगे कि यह देवरूप सूर्य नहीं है किन्तु सूर्य का तेज है, यह जो आ रहा है वह सूर्य का भक्त सत्राजित है, भक्त होने के कारण देव कहा गया है, वह ऐसे कैसे हो गया ? इस पर कहते हैं कि मणि को कण्ठ में बान्धा है इसलिये ऐसा प्रकाशित हो रहा है ॥९॥

आभास—मणिना तस्य भोगमुक्त्वा अर्थसम्पत्तिमाह **सत्राजित्स्वगृहमिति** ।

आभासार्थ—मणि से प्राप्त (भोग) कह कर 'सत्राजित्स्वगृहं' श्लोक से अर्थ की सम्पत्ति कहते हैं ।

श्लोक—सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमङ्गलम् ।
प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥१०॥

श्लोकार्थ—सत्राजित ने अपने घर में उत्सवार्थ माङ्गलिक कराके प्रवेश किया, अनन्तर देव-मन्दिर में ब्राह्मणों द्वारा मणि की स्थापना कराई ॥१०॥

सुबोधिनी—भगवत्कृपया पूर्वमेव श्रीमत्कृतानि कौतुकानि मङ्गलानि च यत्र । अनेन धर्मकामौ निरूपितौ । एवं स्वतःसिद्धत्रिवर्गं गृहं प्रविश्य तत्र भक्त्यतिशयात् देवसदने देवपूजागृहे दैत्यानां प्रवेशाभावाय विप्रैः सह मन्त्रपूर्वकं मणिं न्यवेशयत् । नितरां स्थापितवान् ॥१०॥

व्याख्यार्थ—भगवान् की कृपा से, पहले ही मांगलिक कार्य हुवे हैं, जिससे धर्म और काम की सिद्धि का होना निरूपण किया, इस प्रकार जिस घर में धर्म अर्थ और काम तीन कार्य सिद्ध हुवे हैं वैसे घर में प्रवेश कर वहां देवों के पूजास्थान में जहां दैत्य प्रवेश नहीं कर सकते है वहां ब्राह्मणों के साथ जाकर मन्त्रोच्चारण पूर्वक मणि की स्थापना की ॥१०॥

आभास—स्थापितस्य फलमाह **दिने दिने** इति ।

आभासार्थ—अब 'दिने दिने' श्लोक में मणि के स्थापन करने से जो फल हुआ उसका वर्णन करते है ।

श्लोक—दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो ।
दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयोऽशुभाः ।
न सन्ति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ॥११॥

श्लोकार्थ—यह मणि प्रति दिन आठ भार अर्थात् ४० मन सुवर्ण देती थी, जहाँ मणि है, वहाँ अकाल, महामारी, अकल्याण, सर्प, आधि, व्याधि और दूसरे अशुभ भी नहीं होते तथा मायावी लोगों का रहना भी नहीं हो सकता ।

सुबोधिनी—पञ्चमणमात्रं भारः, चत्वारिंशद्धरणानि मण उच्यते मानविशेषः। **ते चाष्टौ** चत्वारिंशन्मणान् सुवर्णस्य प्रत्यहं सृजति। सविता हि तस्य मूलम्। अतोऽयमपि प्रसविता। **प्रभो** इति सम्बोधनं तदाकाङ्क्षाभावाय। न केवलमिष्टसाधकत्वम्, किन्त्वनिष्टनिवारकत्वमपीत्याह **दुर्भिक्षेति**। अनावृष्टिकृतं दुर्भिक्षम्। **मारी** शीतलादिदेवाधिष्ठितव्याधिमरणम्। **अरिष्टान्यन्यानि** आधिव्याधिहेतुभूतानि। आधिव्याधयश्च। अशुभाः स्वप्नादयोऽपि। मायिनो राक्षसाः पूतनादयः। यत्रायमभ्यर्चितो मणिस्तिष्ठति, तत्र नैते भवन्तीति मणेर्दृष्टादृष्टसामर्थ्यं निरूपितम्॥११॥

व्याख्यार्थ—चालीस सेर का मन होता है, पांच मन का एक भार वजन होता है; वे आठ भार प्रतिदिन मणि देती थी अर्थात् मणि हरेक दिन ४० मन सोना देती थी, मणियों कैसे कर सकती? इस शंका का समाधान आचार्य श्री करते हैं, कि यह मणि सूर्य से उत्पन्न होने से, इसकी जड़ सूर्य है अतः जैसे सूर्य पैदा कर सकता है वैसे ही यह भी पैदा कर सकती है, भगवान् को 'प्रभु' सम्बोधन देकर यह बताया, कि आप सर्व समर्थ हो आपको ऐसे मणि की इच्छा हो नहीं सकती है। यह मणि केवल इच्छित पदार्थ ही नहीं देती है, किन्तु अनिष्टों का भी निवारण करती है, जैसे कि अनावृष्टि से दुर्भिक्ष होता है उसके निवारण के लिये समयानुसार उचित वर्षा करती है, शीतला आदि देव जिन रोगों के अधिष्टाता हैं उन रोगों से जो मृत्यु आदि होती है उन रोग मृत्यु को होने नहीं देती है, आधि व्याधि के हेतु जो अरिष्ट है उनको नाश करती है, अशुभ स्वप्न आदि तथा पूतना आदि राक्षसों का यहां आना भी नहीं होता है, जहां यह मणि पूजी जाती है वहां ऊपर कहे हुए अनिष्ट होते ही नहीं है यों मणि के दृष्ट तथा अदृष्ट सामर्थ्य का वर्णन किया है॥११॥

आभास—अयोग्ये महान् धर्मो न युक्त इति विचार्य भगवान् अनेन मणिना सत्राजितो नाशो भविष्यतीति, स्वपुरे च नाशो न युक्त इति, देवान्तराणामत्र सामर्थ्याभावात् तत्प्रसादोऽपि व्यर्थ इति, तस्य लोकद्वयेष्टसिद्ध्यर्थं यावद्द्रव्यं तत उत्पद्यते, तावद्ग्रामादिद्वारा तस्मै दापयित्वा, उग्रसेनाय मणिं दापयितुं सत्राजितं प्रति किञ्चिदुक्तवानित्याह **स याचित** इति।

आभासार्थ—जो योग्य न हो उसमें बड़ा धर्म, वा वस्तु का होना योग्य नहीं है, भगवान् ने विचारा कि यह सत्राजित इस मणि के योग्य नहीं है, अतः इस मणि के कारण इसका नाश होगा, अपने नगर में इसका नाश हो यह भी उचित नहीं है, अन्य देवका यहां सामर्थ्य चल नहीं सकता है, उसकी कृपा भी व्यर्थ है, इसलिये इसका दोनों लोकों में हित सिद्ध हो, तदर्थ जितना द्रव्य इससे होता है, उतना ग्राम आदि द्वारा इसको दिला कर, यह मणि उग्रसेन को देने के लिये भगवान् सत्राजित को कुछ 'स याचित' श्लोक से कहने लगे।

श्लोक—**स याचितो मणिं क्वापि यदुराजाय शौरिणा।**
नैवार्थकामुकः प्रादाद्याच्ञाभङ्गमतर्कयत्॥१२॥

श्लोकार्थ—भगवान् ने कुछ समय के लिए मणि को यदुराज उग्रसेन को देने के

वास्ते सत्राजित से मणि मांगो, किन्तु पैसे के लोभी उसने यह मणि नहीं दी और किसी तरह भी भगवान् की याचना का भङ्ग हो, वैसा विचार करने लगा ॥१२॥

सुबोधिनी - **क्वापी**ति । कियत्कालं प्रयच्छ । यावता मृत्युरपगच्छति ततः स्वयमेव ग्राह्यमिति भगवदभिप्रायो बोधितः । ननु तस्यैव मृत्युर्भविष्यतीत्याशङ्क्याह **यदुराजाये**ति । **शौरिणे**ति सामर्थ्यं दापने निरूपितम् । लौकिकपक्षपातश्च । तथापि न दत्तवानित्याह **नैवाथकामुक** इति । स ह्यर्थमेव कामयते सिद्धम्, न तु मृत्युनिराकरणमपि, अतो न प्रादात् । यथैवायं न याचते, तथोपायं च विचारितवान् । सूर्यो वक्तव्यः, तद्द्वारा उपद्रवश्च कारणीयः, ततो न याचिष्यतीति याच्ञाभङ्गं तर्कितवान् ॥१२॥

व्याख्यार्थ—कुछ समय के लिये, यह मणि उग्रसेन जो यादवों का राजा है उस को दे, जब तक तुम्हारा मृत्युकाल टल जावे पश्चात् स्वयं ही ले लेना इस प्रकार भगवान् ने अपना अभिप्राय बताया, यह शंका नहीं करना कि उसकी ही मृत्यु होगी क्योंकि वह शूरकुल में उत्पन्न होने तथा यादवों का राजा होने से उनमें सामर्थ्य है जिससे मणि के द्वारा उनकी मृत्यु न हो सकेगी, अथवा लौकिक पक्षपात के कारण भी भगवान् ने यों कहा है, भगवान् की ऐसी इच्छा होने पर भी, मणि नहीं दी । क्योंकि अर्थ ही सिद्ध करना चाहता है, मृत्यु को टालना नहीं चाहता है । मणि न देने के ये ही कारण हैं, सत्राजित् उस उपाय का विचार करने लगा, जिससे भगवान् मणि की याचना करे नहीं, सूर्य को कहा जाय और उसके द्वारा उपद्रव कराये जावें, यों होने से मांगेंगे नहीं, इस प्रकार याचना भंग कराने का विचार करने लगा ॥१२॥

आभास— एवं दोषद्वयं तस्य निरूपितम् । आज्ञोल्लङ्घनमपकारचिन्तनं चेति । तत्र स्वस्यैवापकारो जातः । आज्ञाभङ्गफलं मृत्युरपि जात इत्यध्यायद्वयेन निरूप्यते । एतादृशोऽपि मणिः भगवद्भावरहितः अनर्थपर्यवसायी जात इति निरूपयन् भगवदाज्ञोल्लङ्घनात् तदीयानां बुद्धिरेव दुष्टा जातेति, पूज्यमपि मणिं सत्राजिन्मात्रपरिधेयं च, भक्तस्यैव भगवद्धर्मा उपकारिण इति सामान्यं तं मणिं ज्ञात्वा प्रसेनोऽपि तत्प्रतिष्ठार्थं तद्भ्राता कण्ठे उन्मुच्य गत वानित्याह **तमेकदे**ति ।

आभासार्थ – इस प्रकार उसके दो दोषों का निरूपण किया १-आज्ञा का उल्लंघन और बुराई हो, ऐसा विचार कर, वहां उसकी ही बुराई हुई, आज्ञा भंग का फल मृत्यु भी हुआ, जिसका दो अध्यायों में निरूपण किया जाता है, यद्यपि मणि, धन सम्पत्ति आदि देने वाली, रोगादि नाशक है, तो भी भगवद्भाव रहित होने से, अनर्थ फल देने वाली हुई । भगवान् की आज्ञा के उल्लंघन से तदीयों की बुद्धि ही दूषित हो गई, पूज्य ने भी मणि केवल सत्राजित के ही धारण करने के लिये दी थी, भगवान् के धर्म, भक्त का ही हित करते हैं, मणि को सामान्य मणि समझ कर उसका भ्राता प्रसेन भी उसकी प्रतिष्ठा के लिये कण्ठ में डाल कर वन में गया, जिसका वर्णन "तमेकदा मणि" श्लोक में करते हैं ।

श्लोक—तमेकदा मणिं कण्ठे प्रतिमुच्य महाप्रभम् ।
प्रसेनो हयमारुह्य मृगयां व्यचरद्वने ।।१३।।

श्लोकार्थ—एक दिन सत्राजित का छोटा भाई प्रसेन बड़ी प्रकाशमान उस मणि को कण्ठ में बाँध घोड़े पर सवार होकर शिकार करने के लिए वन में गया ।।१३।।

सुबोधिनी कण्ठे मणिं प्रतिमुच्य एतत्प्रभया मृगा अन्धा भविष्यन्ति, ततो धर्तव्या इति, महाप्रभं सूर्यवत्प्रकाशमानम्, प्रसेनः प्रकृष्टसेनायुक्तोऽपि एकाकी हयमारुह्य मृगयां कर्तुं व्यचरत् । मृगा यान्त्यस्यामिति मृगनाशिका राजलीला मृगया, तामुद्दिश्य वने व्यचरत् ।।१३।।

व्याख्यार्थ - प्रसेन ने कण्ठ में मणि इसलिये धारण की थी कि इसके तेज से मृग अन्धे हो जायेंगे, तो उनको पकड़ने में सुगमता होगी, यद्यपि प्रसेन के पास बहुत सेना थी, तो भी अकेला ही घोड़े पर चढकर शिकार खेलने के लिये वन में फिरने लगा, शिकार, वह राजलीला है जिसमें मृगनाश किये जाते हैं अर्थात् जिस लीला में मृग नाश के मुख में जाते हैं, इसलिये इसको संस्कृत में 'मृगया' कहते हैं ।।१३।।

आभास—महाप्रभत्वात् असहिष्णुः सिंहः तं हत्वा मणिं नीतवानित्याह प्रसेनमिति ।

आभासार्थ—उसकी महती प्रभा को न सहकर सिंह ने उसको मारकर मणि लेली यह चरित्र "प्रसेनं' श्लोक में कहते हैं ।

श्लोक—प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी ।
गिरिं विशञ्जाम्बवता निहतो मणिमिच्छता ।।१४।।

श्लोकार्थ—एक सिंह वहाँ वन में घोड़े समेत प्रसेन को मारकर मणि ले पर्वत की गुफा में जाता था, तो मणि को चाहने वाले जाम्बवान् ने उसको मार डाला ।।१४।।

सुबोधिनी—अलौकिकेनोपायेन न मृगा हन्तव्याः, भगवांस्तेषु नालौकिकं दत्तवानिति, मृगयैव तदर्थं निर्मिता । तेषां वधं मणिना चिन्तयन् तेनैव स्वमृत्युं प्राप्तवान् । स मणिर्देवरूप इति क्रुद्धो मणिर्यत्रैव स्थितः, तमेव घातयतीति परम्परया बहूनां वध उच्यते । हयसहितं प्रसेनं हत्वा मणिः केसरिणा गृहीतः । सोऽपि निकृष्टस्थाने मणिं नयन् गिरिं विविक्षन् कन्दरां प्रविशन् जाम्बवता निहतः । ननु महान् सः, किमिति सिंहं हतवान् तत्राह मणिमिच्छतेति । अहतः सिंहो मणिं न मुञ्चतीति ।।१४।।

व्याख्यार्थ—मृग अर्थात् सिंह आदि पशु अलौकिक उपाय से मारे नहीं जाते कारण कि भगवान

ने उनको मार डालने की अलौकिक बुद्धि नहीं दी है, उनको मारने का उपाय शिकार ही बनाया है उनका वध मणि से होना ही विचारा हुआ था, उससे ही मृत्यु को प्राप्त हुआ, वह मणि साधारण पत्थर की मणि नहीं थी, किन्तु देव रूप मणि थी, अतः क्रुद्ध हुई मणि जिसके पास जाती है उसका ही वध करवाती हैं, यों परम्परा से बहुतों का वध कहा जा सकता है; घोड़े समेत प्रसेन को मार कर मणि सिंह ने ग्रहण की, वह भी अधम स्थान, पर्वत की गुफा में प्रविष्ट होते ही, जाम्बवान् ने उसे मार डाला, वह सिंह महान् है, उसको क्यों मारा ? इसके उत्तर में कहते हैं कि 'मणि इच्छतः' जाम्बवान् को मणि लेने की इच्छा थी इसलिये उसने सिंह को मारा, यदि मारते नहीं तो जीवित सिंह मणि को छोड़ता नहीं, इसलिये मारने के सिवाय अन्य कोई उपाय मणि लेने का नहीं था ।।१४।।

आभास—तस्य मणेः प्रयोजनमाह **सोऽपि चक्र** इति ।

आभासार्थ—"सोऽपि चक्रे" श्लोक में उस मणि के लेने का प्रयोजन बताते हैं ।

श्लोक—सोऽपि चक्रे कुमारस्य मणिं क्रीडनकं बिले ।
अपश्यन्भ्रातरं भ्राता सत्राजित्पर्यतप्यत ।।१५।।

श्लोकार्थ—उसने भी मणि को लेकर बिल में अपने कुमार का खिलौना बना दिया, वहाँ प्रसेन का भ्राता सत्राजित अपने भ्राता को न देखकर शोक करने लगा ।।१५।।

सुबोधिनी—बिले स्वस्थ नविवरे कुमारस्यातिबालकस्य (स्थाने) क्रीडनकं क्रीडासाधनं चक्रे । एतावदेकेनैव दिनेन निर्वृत्तम् । ततो भ्रातुरन्वेषणार्थं सत्राजिता मनुष्याः प्रस्थापितः । ततो न क्वाप्युपलब्धः । ततो भ्रातृस्नेहात् भ्रातरमपश्यन् सत्राजित्पर्यतप्यत । मणिरपि गतो, भ्रातापि गत इति ।।१५।।

व्याख्यार्थ—जाम्बवान् का छोटा बालक जिस स्थान पर रहता था, उस अपने स्थान के बिल में, मणि को उसने बालक का खिलौना बनाया, इससे यह समझा जाता है, कि यह कार्य एक ही दिन में पूरा हो गया, पश्चात् सत्राजित ने भ्राता की खोज करने के लिये मनुष्य भेजे, उसका कहीं भी पता न लगा, उससे भ्रातृस्नेह के कारण भ्राता को न देखने से, सत्राजित शोकातुर होने लगा, मणि भी गई और भ्राता भी गया इसलिये सन्तप्त हुआ ।।१५।।

आभास—ततः किं जातमिति विचारे भ्रातुरिवास्यापि दुर्बुद्धिरुत्पन्नेत्याह **प्रायः कृष्णेनेति** ।

आभासार्थ—इसके अनन्तर, भ्राता की तरह इसकी बुद्धि भी दुर्बुद्धि हो गई जिसका वर्णन 'प्रायः' श्लोक में करते हैं ।

श्लोक—प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः ।
भ्राता ममेति तच्छ्रुत्वा कर्णे कर्णेऽजपज्जनः ॥१६॥

श्लोकार्थ—गले में मणि बांध वन में गए हुए मेरे भाई को बहुतकर कृष्ण ने मार डाला, यह सुनकर नगर के लोग आपस में कहने लगे कि सत्राजित के भाई को मार कर कृष्ण मणि ले आए हैं ॥१६॥

सुबोधिनी—अयमपि गतः। भगवान् स्वतोऽन्येन वा स्वयमपि मृगयां गतो मारितवानिति। **प्राय** इत्युत्कटा कोटिः। कृष्ण एव समर्थो मणिगुणान् दूरीकर्तुम्। हेतुश्चाप्यस्ति। मणिः पूर्वं याचित इति, वने च मारणे न कोऽपि ज्ञास्यतीति। एवं निश्चित्य भगवति क्लिष्टमारोपितवान्। ननु केनापि नोच्यते, कथं त्वं कल्पयसीत्याशङ्क्याह **भ्राता ममेति**। मम तु प्रिय इत्यहं ब्रवीमि, अन्यः किमर्थं वक्ष्यतीति भावः। तद्गृहे उक्तं भार्यादिस्थाने, पश्चात्कर्णे कर्णे समागतमजपत्। मन्त्रवत् शनैः भगवत्कीर्तिमुक्तवान्। यतो जनः, नह्यल्पेन दोषेण जन्ममरणादिकं प्राप्नोति ॥१६॥

व्याख्यार्थ—सत्राजित ने कहा कि जैसे मेरा भाई वन में गया वैसे यह भी गए। भगवान् स्वतः गये अथवा दूसरों को भी ले गये, वहां जाकर मेरे भाई को स्वयं ने मारा अथवा दूसरों से मरवाया, बहुत कर तो स्वयं ने ही मारा है, यह विशेष कोटि है, क्योंकि कृष्ण ही समर्थ हैं और मणि के गुणों को जानते हैं अथवा उनको दूर भी कर सकते हैं, यों करने में कारण भी हैं, जो पहले मुझ से उग्रसेन के लिये मणि मांगी थी मैंने नहीं दी थी, वन में जाकर मारने से कोई जान न सकेगा, इस प्रकार विचार कर निश्चय किया कि कृष्ण ने ही मारा है और यह दोष कृष्ण पर आरोप किया। यह तो केवल तूं ही कहता है दूसरा कोई भी नहीं कहता। तुम यह कल्पना कैसे करते हो ? इसके उत्तर में कहता है, कि मेरा भाई है, जिससे मुझे प्यारा है, इसलिये मैं कहता हूँ दूसरे को क्या प्रयोजन है जो कहे। यह समस्त वर्णन अपने अन्तःपुर में किया, पश्चात् प्रत्येक कान कान में कहने लगा। मन्त्र की भांति धीरे धीरे भगवत्कीर्ति को कहने लगे क्योंकि मनुष्य हैं वह थोड़े दोष से जन्म मरण आदि को प्राप्त नहीं होता है ॥१६॥

आभास—पूर्णं भगवान् विदितवृत्तान्तोऽपि लोकन्यायेनैव व्यवहरन् स्वयमपि श्रुत्वा आप्तमुखात् तत्प्रतीकारार्थं यत्नं कृतवानित्याह **भगवानिति**।

आभासार्थ—यद्यपि भगवान् ने पहले ही सर्व वृतान्त जान लिया था, तो भी, लौकिक व्यवहार दिखाने से लिये मनुष्यों के मुख से जब स्वयं ने सुना, तब उसके प्रतिकार के लिये यत्न करने लगे, जिसका वर्णन "भगवांस्तदु" श्लोक में करते हैं।

श्लोक—भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनः ।
मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः ॥१७॥

श्लोकार्थ—भगवान् ने अपने को वह कलङ्क लगा सुनकर, उसको मिटाने के लिए अपने साथ कुछ नगर निवासियों को लेकर जहाँ से प्रसेन गया था, उस रास्ते से उसको ढूँढ़ने के लिए गए ॥१७॥

सुबोधिनी—तद्वृत्तान्तं श्रुत्वा आप्तमुखात् अकस्माद्वा उपश्रुत्य। उपश्रुतिः सर्वानेव ज्ञापयति। ततस्तत्प्रतीकारार्थं प्रवृत्त इति वक्तुं निराकरणीयत्वे हेतुमाह **दुर्यशो लिप्तमिति**। दुर्यशस आलिप्तमालेपनं लेपवदुपर्यपि प्रतिभासनम्। **आत्मन** इति। यदि भगवान् न दूरीकुर्यात्, सर्वेषामात्मा स्वयमिति तद्दोषे कस्यापि मुक्तिर्न भवेत्। अतो युक्तमेव तन्निराकरणम्। तल्लोकन्यायेनैव कर्तव्यमिति प्रसेनपदवीं नागरैः पदमार्गाभिज्ञैः तद्गतमार्गमन्वपद्यत। तेनैव मार्गेण स्वयं नागरैः सह गतः। अन्यथा लोकः कृत्रिमं जानीयात् ॥१७॥

व्याख्यार्थ—वह सत्य वृत्तान्त आप्त (सत्य जानने वाले व कहने वाले) पुरुषों से अथवा अचानक सुनकर, उपश्रुति सबको ही जनाती है, इस कारण से उसके प्रतीकार के लिए प्रवृत्त हुए, उसको मिटाने की क्या आवश्यकता थी ? जिसका कारण कहते हैं कि अपयश से लिप्त हो जाने से अर्थात् वैसी निन्दा होने लगी, जो लेप की भाँति सर्वत्र भासमान होने लगी, सारांश यह है कि जहाँ-तहाँ प्रत्येक मनुष्य भगवान् की निन्दा करते हुए कहने लगे कि भगवान् प्रसेन को मारकर मणि ले आए हैं, अतः इस असत्य कलङ्क को मिटाने के लिए यदि भगवान् प्रयत्न न करते तो उस कलङ्क रूप दोष के कारण किसी की भी मुक्ति न हो सकती थी; क्योंकि सबकी आत्मा भगवान् ही है, भगवान् कलङ्क से दोषी हुए तो सब दोषी हुए, अतः उसका निराकरण करना योग्य ही है, वह निराकरण भी अलौकिक रीति से न कर, लौकिक प्रकार से ही करना चाहिए, इसलिए उन नागरिकों को साथ ले गए, जो पद-मार्ग को जानते थे, जिससे उसके जाने के मार्ग को पहचानकर वहाँ पहुँच गए, यों न करते तो लोक कृत्रिम (बनावटी) जानते ॥१७॥

आभास—ततस्तं दृष्टवानित्याह **हतं प्रसेनमिति**।

आभासार्थ—'हत प्रसेन' श्लोक से कहते हैं कि अनन्तर उसको जाकर मरा हुआ देखा।

श्लोक—हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने।
तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः ॥१८॥

श्लोकार्थ—वन में प्रसेन और अश्व को सिंह से मरा हुआ देखा और उस सिंह को मनुष्यों ने पर्वत के ऊपर रीछ के हाथ से मरा हुआ देखा ॥१८॥

सुबोधिनी—केसरिनखानां चिह्नदर्शनात् केसरिणैव हतं ज्ञातवन्तः। ततो मणिरप्यस्मै देय इति, यादवः स्वगोत्रजो मारित इति पदाभिज्ञैरेव केसरिमार्गमन्वगमत्। तं चापि अद्रिपृष्ठे पर्वतोपरि निहतं ददृशुः सर्व एव जनाः। तत्रापि ऋक्षेण ऋक्षपदचिह्नैस्तज्ज्ञानम् ॥१८॥

व्याख्यार्थ - केसरी सिंह के नखों के चिन्ह प्रसेन के देह पर देख समझ लिया कि इसको सिंह ने मारा है, तब जान लिया कि मणि भी इसको मिली है, अपने गोत्र में उत्पन्न प्रसेन यादव मारा गया है, पागियों के साथ ही सिंह के रास्ते से पीछे गए तो वहाँ मनुष्यों ने पर्वत के ऊपर देखा कि इस सिंह को किसी रीछ ने मार डाला है; क्योंकि वहाँ रीछ के पैरों के चिन्ह देखने में आ रहे थे ॥१८॥

आभास— ऋक्षान्वेषणार्थं भगवान् प्रवृत्त इत्याह **ऋक्षराजबिलमिति ।**

आसाभार्थ—'ऋक्षराजबिलं' श्लोक से कहते हैं कि भगवान् रीछ को ढूंढ़ने में प्रवृत्त हुए ।

श्लोक — **ऋक्षराजबिलं भीममन्धेन तमसावृतम् ।**
एको विवेश भगवानवस्थाप्य बहिः प्रजाः ॥१९॥

श्लोकार्थ—रीछों के राजा की गुफा बड़ी भयंकर और अन्धकार से व्याप्त थी, इसलिए प्रजा को बाहिर ही खड़ी रख आप अकेले प्रविष्ट हुए ॥१९॥

सुबोधिनी—यद्यपि भगवान् भक्तार्थमेव तत्र प्रविष्टः, तथापि लोके मण्यर्थं कष्टमपि कृतवानिति ज्ञापयितुं तस्मिन्बिले प्रविष्टः । ननु ऋक्षः प्राकृतः पशुः, भगवांस्तत्र किमर्थं गत इत्याशङ्क्याह राजेति । ऋक्षाणां राजा महानेव भवति । तत्रान्यस्य प्रवेशाभावाय विशिनष्टि **भीममन्धेन तमसावृतमिति ।** अन्तःकरणस्य इन्द्रियाणां च प्रवृत्त्यभावाय विशेषणद्वयम् । अन्धतमः कदापि सूर्यतेजोरहितम् । अनेन मणिनापि तत्र प्रकाशो न कृत इति सूचितम् । अतो भगवान् अन्यान् स्थापयित्वा दयावन्तमिवात्मानं ज्ञापयित्वा । साधारणत्वादसमर्थत्वादनियामकत्वाच्च ताभिर्भगवन्निवारणं न कृतमिति ज्ञापयितुं प्रजापदम् । साधारणास्तु ततो निवृत्ता इति ज्ञापयितुं प्रजानामेवावस्थापनमाह । प्रायश्चित्तमेकेनैव कर्तव्यमिति मर्यादां पालयन्निव भगवानेक एव प्रविष्टः। यादवा अपि भगवदिच्छया अकीर्त्यापि शङ्किता न सङ्गे गताः ॥१९॥

व्याख्यार्थ - यद्यपि भगवान् बिल में भक्त के लिए गये थे, तो भी, लोक में यह जताने के लिये, कि भगवान् ने मणि की प्राप्ति के लिए कष्ट भी किया है । रीछ प्राकृत पशु है, जिसके लिए भगवान् वहाँ क्यों गये? इस शंका का निवारण करते हैं कि वह साधारण पशु नहीं है, किन्तु रीछों का राजा है, राजा महान् ही होता है, दूसरे किसी को क्यों नहीं भेजा ? इसके उत्तर में कहा है कि वहाँ दूसरा कोई जा नहीं सकता था, कारण कि गाढ़ अन्धकार से वह बिल व्याप्त था, जिससे अंतःकरण तथा इन्द्रियों की वहाँ प्रवृति नहीं हो सकती है, घोर अन्धकार है, कारण कि वहाँ कभी भी सूर्य का दर्शन नहीं होता है. जिससे सूर्य के प्रकाश से वह स्थान रहित है इस कारण से मणि ने भी वहाँ प्रकाश नहीं किया, यों सूचित किया, भगवान् अपनी दयालुता प्रकट करते हुए अन्यों को बाहर ही ठहरा कर स्वयं प्रविष्ठ हुए, बाहर ठहरने वालों के लिये "प्रजा" पद देकर यह सूचित किया है कि वह साधारण असमर्थ और अनियामक थी इसलिये भगवान् को ऐसे स्थान पर जाने से रोका नहीं । जो साधारण थे वे तो लौट गये, इसलिये प्रजा को बाहर ही ठहराने का कहा है, किसी दोष हो जाने पर समुदाय

में से प्रायश्चित एक ही करता है यह नियम है, इस नियम के पालनार्थ भगवान् एक ही प्रविष्ट हुए, यादव भी भगवान की इच्छा से अथवा अपकीर्ति से शंकित हो भगवान के साथ प्रविष्ट न हुए ।। १९ ।।

आभास—तत्र प्रविष्टस्य मणिदर्शनमाह **तत्र दृष्ट्वे**ति ।

आभासार्थ—"तत्र दृष्ट्वा" श्लोक से कहते हैं कि वहाँ प्रविष्ट हुए भगवान् ने मणि देखी—

श्लोक—**तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतम् ।**
हर्तुं कृतमतिस्तस्मिन्नवतस्थेऽर्भकान्तिके ।।२०।।

श्लोकार्थ—वहाँ बालक ने मणि को अपना खिलौना किया है, यह देख उसको लेने का विचार कर भगवान् बालक के पास खड़े हो गए ।।२०।।

सुबोधिनी—यद्यपि तत्र नागलोकमणयः अन्येऽपि दिव्याः सन्ति,ततः स्यमन्तकपरिज्ञानं कठिनम्, तथापि स्वत एवोत्तममिति लौकिकेनापि प्रकारेण ज्ञातुं शक्यमिति ज्ञापयितुं **मणिश्रेष्ठमि**त्युक्तम् । तथापि मणिः गुप्त एव स्थाने स्थाप्यत इति भगवान् **लौकिक**प्रकारेण कथं दृष्टवान्, तत्राह **बालक्रीडनकमि**ति । बालस्य क्रीडार्थमुपरि निबद्धमित्यर्थः । पुराणान्तरे तु स्यमन्तकमणिज्ञापकं वाक्यमपि श्रुतवानित्युक्तम् । तत्र धात्री बालं लालयन्ती आह । 'सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः । सुकुमारक मा रोदीस्तव ह्येष स्यमन्तक' इति । अतो लौकिकेनापि प्रकारेण ज्ञात्वा अपकीर्तिनिराकरणार्थमिदं हर्तव्यमिति स्वाभाविकं चैतस्य न भवतीति, उपयोगश्च तथा नास्तीति, बालप्रबोधो वर्णमात्रेणापि भवतीति, पूजाभावात् धनप्रसवो नास्तीति, सुवर्णेनाप्युपयोगाभाव इति, अक्लिष्टकर्मापि पामरा न प्रष्टव्या इति स्वयमेव हर्तुं कृतमतिर्जातः । ततो मत्यैव सर्वा सामग्री अक्लिष्टत्वाय सम्पादितेत्याह आदौ भगवान् अर्भकान्तिके तूष्णीं कियत्कालमवतस्थे, न तु गृहीत्वा ततो निर्गतः । चौर्यादिना जीवत् अपथप्रवृत्तः महानपि भक्तोपि विषयासङ्गात् प्राकृतो जातः । अतस्तत्सम्बन्धात् तदीया अपि प्राकृता एव जाताः ।।२०।।

व्याख्यार्थ—श्लोक में "मणि श्रेष्ठ" पद देने का भावार्थ प्रकट करते हुए आचार्य श्री आज्ञा करते हैं कि यद्यपि वहाँ नागलोक की दूसरी भी अनेक दिव्य मणियाँ थी जिससे स्यमन्तक मणि की पहचान कठिन थी तो भी यह स्वत ही उत्तम थी जिससे लौकिक प्रकार से भी यह पहचानी जा सकती थी इसलिये इसको "मणि श्रेष्ठ" कहा गया है, यों हैं, तो भी ऐसी मणि तो गुप्त स्थानों में रखी जाती है तो भगवान् ने लौकिक रीति से कैसे देख ली ? इसके उत्तर में कहा है, कि "बालक्रीडनकं" बालकों के क्रीड़ा के लिये ऊपर बांध रखी थी, अन्य पुराणों में तो ऐसी कथा है कि जब भगवान् वहाँ पधारे तब धात्री बालक को लालन करती हुई कहती थी "सिंहः प्रसेनमवधीत्, सिंहो जाम्बवता हतः । सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः" सिंह ने प्रसेन को मारा, फिर जाम्बवान् ने सिंह को मार डाला, हे सुन्दर कुमार ! तूं रो मत यह स्यमन्तक तेरी है, ये शब्द सुन कर, लौकिक प्रकार से भी जान लिया अतः अपकीर्ति को निराकरण करने के लिए यह मणि हरण

करनी चाहिये, ऐसा स्वभाव तो इनका नहीं हो सकता है, और उसका उपयोग भी करना नहीं है, बालक को तो शब्द मात्र से प्रसन्न किया जा सकता है,मणि से धन की प्राप्ति तब हो जब उसकी पूजा की जाए, पूजा के अभाव से धन भी उत्पन्न नहीं होता है सुवर्ण से भी उपभोग का अभाव है, आप अक्लिष्टकर्मा हैं इसलिये पामरों से पूछने की आवश्यकता नहीं थी, इसलिये स्वयं ही मणि के हरण का विचार करने लगे, यों विचार करने के बाद परिश्रम न हो इसलिये सर्व सामग्री तैयार करली, पहले भगवान् बालक के पास मौन धारण कर कितने समय खड़े रहे किन्तु वहाँ से मणि लेकर नहीं निकले, चोरी से जीवन बुरे मार्ग पर जाता है, जिससे महान् हो, चाहे भक्त हो, वह विषयों में आसक्त होने से प्राकृत हुवा, अतः उसके सम्बन्ध से तदीय भी प्राकृत हो गये ।। २० ।।

आभास—अतो भगवन्तं दृष्ट्वा सद्बुद्ध्यभावात् विषयाभिनिवेशाच्च विचारमकृत्वापि आक्रोशं कृतवतीत्याह **तमपूर्वमिति** ।

आभासार्थ—भगवान् को देखकर, वह दाई जो बालक की रक्षा कर रही थी उसमें सद्बुद्धि न होने के कारण और इस काम में आग्र होने से बिना विचार आक्रोश[1] करने लगी, जिसका वर्णन "तमपूर्वं" श्लोक में करते है —

श्लोक — **तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् ।**
तच्छ्रुत्वाभ्यद्रवत्क्रुद्धो जाम्बवान्बलिनां वरः ।।२१।।

श्लोकार्थ—दाई ने उस अपूर्व नर को देख डरे हुए के समान चिल्लाया, वह चिल्लाना सुनकर बलवानों में श्रेष्ठ, क्रोधित जाम्बवान् भगवान् के निकट आया ।।२१।।

सुबोधिनी—देवादीनामन्यतरश्चेद्वाक्स्तम्भनादिकमपि कुर्यादिति । तदभावात् भगवतो क्लिष्टकर्मत्वं ज्ञात्वा नरोऽयमिति ज्ञातवती । आकृतिवचनो वा नरशब्दः । स्वस्थस्याप्याक्रोशो भवतीति तद्व्यावृत्त्यर्थं पुत्रं वा मारयिष्यतीति बुद्ध्या जाम्बवानपि महानिति तथा भयाभावात् भीतवत् चुक्रोश । यतो धात्री बालकरक्षापरा । ततोऽन्तःकार्यान्तरव्यापृतोऽपि तद्वाक्यं श्रुत्वा समागत इत्याह **तच्छ्रुत्वेति** । मदायतनेऽपि मण्यर्थं कः समागत इति क्रोधः । **जाम्बवानिति** नाम्ना प्रसिद्धो रामायणे बुद्धिविशेषे, तादृशोऽप्यविचार्य समागतः । तत्र हेतुर्बलाभिमान इति अभिप्रायेणाह **बलिनां वर इति** । बलिभिरपि वरणीय इत्यर्थः ।।२१।।

व्याख्यार्थ—देव आदि में से कोई एक होवे, तो वाणी का स्तम्भन भी करदे, किन्तु भगवान् ने ऐसा किया नहीं, भगवान् का क्लिष्ट कर्म जान कर समझने लगी कि यह कोई मनुष्य है, अथवा यह नर शब्द आकृति के कारण कहा गया है, सुखी भी कभी चिल्लाहट करता हैं यह चिल्लाना वैसा नहीं था, किन्तु यह आया हुआ, पुत्र को मारेगा, इस विचार से यद्यपि जाम्बवान् महान् होने से

---

१ —चिल्लाने लगी

निर्भय था, तो भी डरे हुवे के समान चिल्लाने लगा, कारण कि दाई बालक की रक्षा कर रही थी, यद्यपि स्वयं भीतरी अन्य कार्यों में रुका हुआ था तो भी दाई का वाक्य सुनकर, भगवान् के पास आ गया, वाक्य सुनते ही इसको क्रोध उत्पन्न हुआ क्योंकि यह विचार होने लगा, मेरे घर में रखी हुई मणि को लेने के लिए यह कौन है ? जो मेरे घर के भीतर आ गया है, जाम्बवान् के लिये रामायण में प्रसिद्ध हैं, कि बड़ा बुद्धिमान है, वैसा बुद्धिमान होकर भी, बिना विचार किये आ गया, यों आने का कारण बल का अभिमान था, इसलिये श्लोक में 'बलिनांवर' बलवानों में श्रेष्ठ कहा है, बली भी इसका वरण करते हैं ।। २१ ।।

आभास—एतादृशोऽपि कालादिवशादज्ञो भूत्वा भगवता सह युद्धं कृतवानित्याह **स वा** इति ।

आभासार्थ—ऐसा समझदार होते हुए भी कालादि के वश हो जाने से अज्ञ बन गया जिससे भगवान् के साथ युद्ध करने लगा, जिसका वर्णन 'स वै भगवता' श्लोक में करते हैं—

श्लोक—स वै भगवता तेन युयुधे स्वामिनात्मनः ।
पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित् ।।२२।।

श्लोकार्थ— वह जाम्बवान् निश्चय से, उनके प्रभाव को न समझ प्राकृत मनुष्य मानकर, अपने स्वामी उन भगवान् से युद्ध करने लगा ।।२२।।

सुबोधिनी—स्वयमपि प्रसिद्धः, तथा कुर्वन् लोके अपकीर्तिमपि प्राप्स्यतीति सूचितम् । तत्रापि वै निश्चयेन । शारीरेण जीवस्याराध्यो भगवान् । तत्राप्यात्मनः स्वामिना स्वस्यैवोपास्यरूपेण । तत्कथमित्याकाङ्क्षायामाह **तेनेति** । रघुनाथेन । कृष्ण एव रघुनाथः, तामेव सर्वां सामग्रीं गृहीत्वा समागत इति । स एव लक्ष्मणो बलः । सैव सीता रुक्मिणी । ते वानरा यादवाः, सैवायोध्या द्वारका, सैव सरयूर्गोमतीति । तर्हि कथं युयुधे तत्राह **पुरुषमिति** । प्राकृतं पुरुषं मत्वा प्रकृत्यधिष्ठातारम् न तु पुरुषोत्तमम् । ननु महतः कथमेतादृशमज्ञानमिति चेत्, तत्राह **कुपितो नानुभावविदिति** । दृष्ट्वा क्रोधवशात् अलौकिकत्वं न ज्ञातवान् । पूर्वं तु कृतो गोवर्धन दरेनुभावो न श्रुतः सत्सङ्गाभावात् बिलेशयत्वाच्च । अतोऽनुभावानभिज्ञत्वात् कोपावेशाच्च स्वामित्वेनाज्ञात्वा युयुधे । अक्लिष्टकर्मा च भगवान् । अनुक्त्वैव स्वयं युद्धं कृतवान् । भगवत उत्तरार्धलीलायां प्रकृतिः कालादयश्चासहमाना जाताः । तेषां पीडार्थं, पुरुषं परित्यज्य सप्तविंशति तत्त्वानि, यथा काठिन्यं जहति, तथा मुष्टिप्रहारैः सेवककृतैः चलने पादाविव कोमलानि कृतानीत्येके । चिरकालं मल्लयुद्धाकाङ्क्षया तथा कृतमित्यन्ये । रामावतारे हि तस्मै वरो दत्तो रामेण 'त्वदाराधनं ग्रहीष्यामी'ति । पुनस्तेन विज्ञापनायां कृतायां बलं मदीयं व्यर्थं जायत इति । ततो भगवान् बुद्धिमिदानीं प्रकटीकुरु, बलं पश्चात्प्रकटीकरिष्यसीत्याह । नहि कश्चिज्जीवस्त्वत्पराक्रमं सोढुं शक्त इति । अतस्तत्र स्थापितां ज्ञानशक्तिं पूर्वावतारे गृहीत्वा इदानीं बलशक्तिमपि गृह्णन् पूजां गृहीत्वा तं मुक्तं करिष्यतीति तथा भगवदुद्योगः ॥२२॥

व्याख्यार्थ—जाम्बवान् स्वयं प्रसिद्ध था, अतः इस प्रकार भगवान् से युद्ध करने से अपकीर्ति को प्राप्त होगा, यह सूचित किया, यह सूचना साधारण नहीं है, किन्तु निश्चयपूर्वक है, जीव को भगवान् की आराधना शरीर से करनी चाहिये, उसमें भी अपने स्वामी उपास्य रूप की तो करनी ही चाहिये 'तेन' पद से यह दिखाया है, जाम्बवान् का उपास्य जो रघुनाथ है, वे कृष्ण ही हैं अतः उसी सकल सामग्री को लेकर यहाँ आये हैं जैसे वही लक्ष्मण बलराम है, वही सीता रुक्मिणी है, वे बन्दर यादव हैं, वह ही अयोध्या अब द्वारकापुरी है वह सरयू गोमती है, जब यों है, तब जाम्बवान् अपने उपास्य से कैसे लड़े ? इस पर कहते हैं कि प्रकृति के अधिष्ठाता को प्राकृत समझा, न कि पुरुषोत्तम जाना। वह जाम्बवान् महान् बुद्धिमान है उसको ऐसा अज्ञान कैसे हुआ ? क्रोध ऐसी वस्तु है जो ज्ञानी को अज्ञानी बना देतो है, यह भी क्रूर था, अतः क्रोध के कारण प्रभाव को न जान सका, अलौकिक को पहचान न हो सकी, भगवान् ने जो गोवर्धन धारण कर अपना प्रभाव दिखाया था, वह इसने न देखा और न सुना था क्योंकि एक तो सत्संग का अभाव था, अर्थात् सत्संग नहीं किया था तथा दूसरा बिल में भी रहता था जिससे माहात्म्य जान न सका था अतः माहात्म्य का ज्ञान न होने से, कोप के आवेश से और यह मेरा स्वामी है इस अज्ञान से लड़ाई करने लगा। भगवान् तो अक्लिष्ट कर्मा हैं, अर्थात् भगवान् को किसी भी कार्य करने में परिश्रम तो होता हो नहीं है, इसलिये कुछ न कहकर ही स्वय युद्ध करने लगे। भगवान् की उत्तरार्ध की लीला को प्रकृति[1] तथा काल[2] आदि[3] सहन न कर सके, उनकी[4] पीड़ा के लिए, जैसे पुरुष को छोड़ सत्ताईस तत्व कठिनता का त्याग करते हैं, वैसे ही सेवकों के किये हुवे मुष्टि प्रहारों से चलने में पैरों की तरह कोमल किये, यों कोई एक कहते हैं। दूसरे कहते हैं कि बहुत समय से मल्लयुद्ध लड़ने की चाहना थी इसलिये यों किया। रामावतार में श्री रामचन्द्रजी ने इसको वरदान दिया था, तेरीं सेवा ग्रहण करूँगा तब जाम्बवान् ने फिर प्रार्थना की कि मेरा बल तो व्यर्थ ही चला जायेगा। तब भगवान् राम ने कहा, बुद्धि अब प्रकट कर, अर्थात् बुद्धि से सेवा अब कर, उसको अब स्वीकार करूँगा, शेष बल पीछे प्रकट करना, अर्थात् बल की सेवा की स्वीकृति कृष्णावतार में करूँगा, क्योंकि तेरा ऐसा उत्कृष्ट पराक्रम है, जो कोई भी जीव सहन न कर सकेगा, अतः उसमें स्थापित ज्ञान शक्ति को रामावतार में ग्रहण कर अब बल शक्ति द्वारा पूजा ग्रहण कर उसकी मुक्ति करेंगे इसलिये ही भगवान् का यह उद्यम है ॥ २२ ॥

आभास—ग्रहादिवशाज्जयो न जायत इति कदाचित्तस्य शङ्का स्यात्, अतस्तन्निराकरणार्थं सर्वेष्वेव नक्षत्रेषु युद्धं निरन्तरं कृतवानित्याह द्वन्द्वयुद्धमिति ।

आभासार्थ—ग्रह आदि के वश से जीत नहीं होती है, इसलिये किसी को शंका होती हो, तो

१—प्रकृति शब्द का तात्पर्य है लोक धर्म का अनुसरण करना।

२—सत्ताईस नक्षत्रों को यहाँ काल कहा है।

३—आदि पद से कर्म और स्वभाव समझने चाहिए।

४—भगवान् ने जो सेवक पर मुष्टि प्रहार किये, तत्वों के पीड़ा के लिए युद्ध किया है, जिसका कारण सत्ताईस तत्वों की कठिनता छुड़ाना है।

उसके मिटाने के लिए समस्त नक्षत्रों में निरन्तर युद्ध करने लगे, जिसका वर्णन "द्वन्द्वयुद्धं" श्लोक में कहते हैं—

श्लोक—द्वन्द्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः ।
आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव ॥२३॥

श्लोकार्थ—जीतने की इच्छा वाले उन दोनों को आयुध, पत्थर, वृक्ष, द्रुम और भुजाओं से भारी भयंकर द्वन्द्व लड़ाई वैसे होने लगी, जैसे क्रव्य (माँस) के लिए बाज पक्षियों में आपस में होती है ॥२३॥

सुबोधिनी—उभयोरेव युद्धं द्वन्द्वयुद्धं सम्यक् प्रकारेण, न तु नटवदभिनयमात्रेण । तुमुलमधिकम् । प्रहारे सर्वबलविनियोगस्तुमुलता । उभयोर्विजिगीषत रिति तथा करणे हेतुः । शीघ्रमेव प्रहारेण व्यथितः । युद्धं त्यजत्विति जेतुमिच्छा अज्ञानाज्जाम्बवतः जित एव जानातीति ज्ञापनार्थं भगवतः । तत्र युद्धसाधनान्यनेकान्याह **आयुधेति** । आदौ नानाविधान्यायुधानि । महाशूरत्वात् भगवतेऽपि दत्वा युद्धं करोतीत्येके । यदेवायुधं जाम्बवान् गृह्णाति, तज्जातीयमेव भगवानाविर्भावयतीत्यपरे । यदेव प्रक्षिपति, तदेव गृहीत्वा तेन प्रहरतीति वस्तुस्थितिः । अश्मानस्तु सुलभाः, द्रुमाश्च । सर्वेष्वेव भग्नेषु पश्चाद्दोर्भिः । नन्वस्य युद्धस्य को विषयिरिति चेत्, तत्र दृष्टान्तमाह **क्रव्यार्थे श्येनयोरिवेति** । क्रव्यस्थानीयः स्यमन्तको मणिः, श्येनो वै वयसां बलिष्ठो भवति । यावत्स्यमन्तकप्राप्तिः, तावद्युद्धमित्यर्थः अत्यावश्यकमाग्रहं च जनयतीति क्रव्यतुल्यता । क्रव्यमुत्कृष्टमपक्वं मांसं सर्वथा जीवनार्थमपेक्षितम्, तथा लोकापवादनिराकरणार्थं भगवतोऽपेक्षितम् । तस्यापि भास्वरं जयेन प्राप्तमिति माहात्म्यदपेक्षितम् । क्षुद्रपीडा च श्येनजातीयस्य गोमायोश्च नास्तीति बहूनर्थान् तुल्यान् दृष्ट्वा श्येनौ दृष्टान्तीकृतौ ।२३।

व्याख्यार्थ—दोनों की लड़ाई अच्छे प्रकार से होने लगी । यह लड़ाई नटों की तरह दिखावा मात्र नहीं थी, किन्तु वास्तविक घोर युद्ध था । सारा बल जिस युद्ध में लगाया जावे, उसको तुमुल युद्ध कहा जाता है ऐसी भारी लड़ाई का कारण यह था, कि दोनों चाहते थे, कि हमारी जीत होनी चाहिये, किन्तु भगवान् के प्रहार से शीघ्र दुःखी हो गया, लड़ाई बन्द हो, ऐसी इच्छा जाम्बवान् को होने लगी । तो युद्ध क्यों किया? जीतने की इच्छा से किया । परन्तु वह इच्छा, अज्ञान से उत्पन्न हुई थी । भगवान् ने तो समझ लिया कि मैंने जीत लिया, मेरा सेवक ही मेरे स्वरूप को जान सकता है, अथवा यह भगवान् है यों जताने के लिए कहता है, कि मैंने अज्ञान से जीतने की इच्छा की थी । अब युद्ध बन्द होना चाहिये, भगवान् ने मुझे जीत लिया । उस युद्ध में युद्ध के साधन अनेक थे । पहले तो अनेक प्रकार के आयुध थे, कोई तो यों कहते हैं कि जाम्बवान् बड़ा योद्धा था, इसलिये उसके पास इतने बहुत आयुध थे जो भगवान् को भी स्वयं आयुध देता था और कहता था कि अब लड़ो, दूसरों का कहना है, कि नहीं जैसा शस्त्र जाम्बवान् लेता था वैसा शस्त्र भगवान् प्रकट करते । वास्तव में वस्तुस्थिति ऐसी होती थी, कि जो शस्त्र जाम्बवान् भगवान् पर फेंकता था, उसी को लेकर भगवान् प्रहार करते थे । पत्थर तथा पेड़ तो सुलभ मिल जाते थे, वे सब टूट जाते तब भुजाओं से युद्ध करते

थे। इस युद्ध करने की विधि क्या है ? जिसका उत्तर दृष्टान्त द्वारा दिया है, जैसे माँस के लिये बाज पक्षी लड़ते हैं, वे जब तक माँस अपने को न मिला है, तब तक लड़ते हैं वैसे ही यहाँ जब तक मणि की प्राप्ति न हो जाय, तब तक लड़ते रहना, कच्चा माँस बाज पक्षियों को जीवन के लिये अवश्य अपेक्षित है,वैसे ही भगवान् को अपना कलंक मिटाने के लिये मणि की आवश्यकता अपेक्षित है। कलंक मिटकर सत्यरूप शोभा तब बढ़ेगी, जब यह मणि विजय से प्राप्त की जायेगी। इस प्रकार के मोह के कारण ही भगवान् को मणि अपेक्षित है। बाज जाति और शृगाल को क्षुधा से पीड़ा नहीं होती है अथवा क्षुधा और पीड़ा नहीं होती है। इस प्रकार बहुत अर्थों की समानता देखकर ये नौ दृष्टांत दिया है ॥ २३ ॥

आभास—एवं युद्धस्य कालमाह **आसीत्तदष्टाविंशाहमिति**।

आभासार्थ—"आसीत्तदष्टा" श्लोक से युद्ध कितने दिन चला सो बताते हैं—

श्लोक—आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः।
वज्रनिष्पेषपरुषैरविश्रममहर्निशम् ॥२४॥

श्लोकार्थ—वज्र के प्रहार से भी कठोर मुक्कों से विश्राम लिए बिना दिन-रात अट्ठाईस दिन तक परस्पर दोनों लड़ते रहे ॥२४॥

सुबोधिनी—अष्टाविंशे दिवसे ज्ञानं जातमिति तदपि दिनं फलरूपं युद्धमध्ये गृहीतम्। इतरेतरमुष्टिभिः वज्रनिष्पेषादपि परुषस्तद्युद्धं मध्ये विश्रामरहितम्। अहर्निशमिति ऐहिकावश्यककालकृतोऽपि विश्रामो नास्तीति सूचयति। भगवांस्तावत् प्रहारं करोति, यावत्स करोति, सोऽपि बलरूपो भवतीति वज्रनिष्पेषादपि तत्प्रहारः परुषः। अतस्तुल्यत्वात् न विरमणम्, नाप्येकस्य पराजयः। भक्तत्वाद्भगवतो न मारणीयः। भगवांस्त्वशक्य एव। अत्र काचिद्विरुद्धा कथा। महामायोपस्थानस्याग्रे निरूपितत्वात् तेन विरोधादुपेक्षणीया। कल्पान्तरीयेत्यन्ये समादधुः ततः कालकृतं तस्य बलमिति सप्तविंशात्मके काले अतीते। प्राकृतबलपक्षेऽपि अष्टाविंशतिप्रकारं तद्बलमिति ॥२४॥

व्याख्यार्थ—अट्ठाईसवें दिन, जाम्बवान् को ज्ञान हुआ, कि यह तो मेरे उपास्य स्वरूप हैं, वह दिन भी फलरूप होने से, युद्ध में गिना गया है, वास्तव में उस दिन लड़ाई नहीं हुई है, वज्र के प्रहार से भी कठोर घुँसों से जो इतने दिन लड़ाई बिना विश्राम के दिन रात चली, वह तुमुल भारी लड़ाई हुई, काल ने रात्रि विश्राम के लिये बनाई है, किन्तु वह कालकृत विश्राम भी न लेकर लड़ते रहे, जब तक वह प्रहार करे, उससे पहले भगवान् कर देते, वह भगवान् का प्रहार बलरूप हो जाने से वज्र गिरने से भी कठोर होता था, वे दोनों तुल्य होने से, विश्राम नहीं लेना चाहते थे, यों होते हुवे भी एक का भी पराजय न हो सका जिसका कारण यह था, कि जाम्बवान् भक्त था इसलिये भगवान् उसको मारना नहीं चाहते थे, भगवान् का तो अशक्य हो है, अतः दोनों वैसे ही रहे और लड़ते रहे। इस विषय में एक विरुद्ध कथा हरिवंश में कही गई है कि 'भगवान् ने जब जाम्बवान् के बिल में प्रवेश किया तब वसुदेव आदि लौट कर द्वारका आ गये वहाँ कहने लगे कि कृष्ण मर गये

हैं। यह कथा महामाया के उपस्थान से आगे कही गई है इससे यह विरुद्ध होने से उपेक्षा करने योग्य है दूसरे इस प्रकार समाधान करते हैं कि कथा दूसरे किसी कल्प की है, सप्तविंशात्मक काल पूरे होने पर उसका काल कृत बल भी पूरा हो गया, प्राकृत बल के पक्ष में भी अट्ठाईस प्रकार का उसका बल था ॥ २४ ॥

आभास—यदेव पुरुषप्रकारः समागतः, तदैव तस्य विवेक उत्पन्न इत्याह **कृष्णमुष्टीति** ।

आभासार्थ- प्रकृति काल आदि का प्रकार गया और जब पुरुष प्रकार आया तब ही उसको विवेक आया जिसका वर्णन 'कृष्णमुष्टि" श्लोक में करते हैं—

श्लोक—कृष्णमुष्टिविनिष्पातनिष्पिष्टाङ्गोरुबन्धनः ।

क्षीणसत्त्वः स्विन्नगात्रस्तमाहातीव विस्मितः ॥२५॥

श्लोकार्थ—श्रीकृष्ण के घूँसों के प्रहार से उसके अङ्गों के सब बन्धस्थल शिथिल हो गए और बल शक्ति क्षीण हो गई, शरीर पसीने से भर गया, तब जाम्बवान् अचम्भे में आ उनसे कहने लगा ॥२५॥

सुबोधिनी—तस्य क्षीणेऽपि बले भगवतो बलं न क्षीणमिति । पश्चादल्पप्रहारैरपि निष्पिष्टाङ्गः। अङ्गानां चोरुबन्धनानि यस्य । विशीर्णसर्वावयवो जात इत्यर्थः । हस्तपादादयो भग्नाः । ततः अशक्तः जिज्ञासायां प्रवृत्त इति वक्तुं बाह्याभ्यन्तराशक्तिमाह **क्षीणसत्त्वः स्विन्नगात्र** इति । अन्तःकरणे विवेकधैर्ये क्षीणे, गात्रेषु प्रस्वेदेन शरीरमपि क्षीणम्, निष्पीडितमिवाभूत् । ततो विस्मितो जातः । विचारे क्रियमाणे समागमनादिभिः प्राकृतधर्मैर्जीवत्वे ज्ञाते स्वसमानबलतैव कस्यापि नास्ति । ततोऽधिकबलः कथं जात इत्याश्चर्यम् । भगवत्त्वे वा कथमेवंरूपेणागत इति उभयत्र विरोधादतीव विस्मितो जातः ॥२५॥

व्याख्यार्थ—जाम्बवान् का बल क्षीण हो गया किन्तु भगवान् का बल क्षीण न हुआ, अनन्तर थोड़े भी प्रहार से उसके अंगों के बन्धन ढीले पड़ गये जिससे सर्व अवयव शिथिल हुए, हाथ, पैर टूट गये, पश्चात् अशक्त हो यह कौन है ? इस प्रकार जानने की इच्छा की, बाहर तथा भीतर की शक्ति जाने से निर्बल हो गया, जिससे समग्र शरीर पसीने से व्याप्त हो गया। विवेक-धैर्य सहित अन्तःकरण क्षीण हुआ, अङ्गों में पसीना आ जाने से शरीर भी कमजोर हो गया, वैसी स्थिति आ जाने से विशेष प्रकार से अचम्भे में पड़ गया विचार करने पर देखा कि इससे मिलाप आदि किया है तो यह प्राकृत धर्मों से जीव जाना जाता है, किन्तु कोई भी जीव मेरे समान भी बलवाला नहीं है, यह तो मुझसे भी अधिक बलवाला कैसे हुआ ? यह अचम्भा है, यदि भगवान् है तो इस प्राकृत रूप से कैसे आए ? दोनों परस्पर विरुद्ध देख बहुत ही अचम्भे में पड़ गया ॥२५॥

आभास-ततो विरोधपरिहारे विचार्यमाणे लीलयापि प्राकृतवच्चेष्टा भवतीति निश्चित्य बलस्य प्रत्यक्षसिद्धत्वाच्च भगवानेवायमिति ज्ञात्वा स्वस्य पराजयः नातीव मनःपीडां करोतीति ज्ञापयन् भगवन्तं स्तौति **जान** इति त्रिभिः ।

आभासार्थ—पश्चात् विरोध कैसे मिटे ? इसका विचार करने पर ध्यान में आया कि भगवान् की लीला करने के समय प्राकृतों की भाँति चेष्टा[1] हो सकती है, यह निश्चय कर लिया; क्योंकि उन का विशेष बल तो प्रत्यक्ष देख लिया, अतः यह भगवान् ही है, यों जानकर इससे पराजय होना मन को विशेष पीड़ा नहीं करने वाली है, यों जताते हुए भगवान् की स्तुति 'जाने त्वां' से तीन श्लोकों द्वारा करता है ।

श्लोक—**जाने त्वां सर्व भूतानां प्राण ओजः सहो बलम् ।**
विष्णुं पुराण पुरुषं प्रभविष्णुमधीश्वरम् ।।२६।।
त्वं हि विश्वसृजां स्रष्टा सृज्यानामपि यच्च सत् ।
कालः कलयतामीशः पर आत्मा तथात्मनाम् ।।२७।।
यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादि-
शत्क्षुभितनक्रतिमिङ्गिलोऽब्धिः ।
सेतुः कृतः स्वयशसोज्ज्वलिता च लङ्का
रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ।।२८।।

श्लोकार्थ—मैं आपको जानता हूँ, आप सब प्राणियों के प्राण, ओज, सह और बल हैं तथा विष्णु, पुराण पुरुष, उद्भवकर्त्ता और सर्व के नियन्ता काल रूप भी हैं, आप विश्व की रचना करने वालों के भी सृजन करने वाले हैं, जो रचे हुए सत् पदार्थ हैं, वे भी आप ही हैं, नाश करने वालों के भी काल रूप आप हैं, आत्मा के परमात्मा भी आप हैं । जिनके स्वल्प ही उद्दीपित क्रोध भरे कटाक्षों के पात से समुद्र के नक्र और मगर जब क्षोभित हो गए, तब समुद्र ने मार्ग दिया, अनन्तर समुद्र में पुल बाँधी, अपने यश से लंका को प्रकाशित किया, बाणों से राक्षसों के सिर पृथ्वी पर गिराये, वे रामचन्द्र प्रभु आप हैं ।।२६-२८।।

कारिका—**राजसैः सात्त्विकैश्चैव तामसैस्तन्निभैर्गुणैः ।**
सम्पूर्णैः सहितो विष्णुर्भगवानेव नान्यथा ।।१।।

१- प्रयत्न या कार्य

कारिकार्थ—राजस, सात्त्विक और तामस; इन तीन सम्पूर्ण गुणों के प्रकाश से युक्त यह भगवान् विष्णु ही हैं दूसरा कोई नहीं है ॥१॥

सुबोधिनी—कथं निवृत्त इत्याकाङ्क्षायां ज्ञात्वा निवृत्त इत्याह **जान** इति । ज्ञानमार्गानुसारेणापि ज्ञानं सम्भवतीत्यत आह **त्वामिति** । त्वामहं जाने । तत्र प्रकारानाह **सर्वभूतानां प्राण ओजः सहो बलमिति** । **प्राण** आसन्यः, तस्य कार्यम**ोजः** इन्द्रियशक्तिः । **सहो**ऽन्तकरणस्य । बल शरीरस्य । एवं सर्वप्राणिषु बलात्मा कार्यकारणभेदेन विभक्तवीर्यं आसन्यस्त्वमेव । एवं नरोत्तमत्वमुक्त्वा पुरुषोत्तमत्वमाह **विष्णुमिति** । विष्णुरधिकार्यपि भवतीति तावन्मात्रतां निराकर्तुं विशेषमाह **पुराणपुरुषमिति** । पुरुषोत्तमम् । किञ्च । तादृशोऽपि प्रभविष्णुः लोकमुद्भावयति । प्रकर्षेण भावयति वा । किञ्च । **अधीश्वरं** सर्वनियन्तारं कालरूपम् । पूर्वं क्रियाशक्तिर्निरूपिता चतुर्धा रूपभेदेन । इदानीं ज्ञानशक्तिर्निरूप्यते चतुर्धा, ज्ञानं च चतुर्विधम् । नियामकमेकम्, इष्टसाधनतां ज्ञापयित्वा प्रवर्तकं द्वितीयम्, ततः फलदातृत्वेन स्थितं तृतीयम् ततो निर्वाहकसर्वरूपं चतुर्थम् । तद्विष्णुपदेन प्रत्यवरोहक्रमेण अन्यैः पदैश्च निरूपितम् ॥२६॥

एवं पूर्णक्रियाज्ञानशक्तिमत्त्वेन भगवन्तं निरूप्य तस्य जगज्जन्मादिमोक्षान्तकार्याणि चत्वारि निरूपयति **त्वं हीति** । श्रुतयः सम्मत्यर्थं गृहीताः विश्वसृजां तत्त्वानामपि त्वं स्रष्टा । सृज्यानामपि घटादीनां सत्स्वरूपं भवानेव । अनेन स्थितिरुक्ता। कलयतां कालमहादेवयमादीनामपि त्व काल उपसंहारकर्ता । एवं सृष्टिस्थितिप्रलयानुक्त्वा मोक्षदातृत्वमाह **परमात्मेति** । आत्मनां सर्वेषामेव जीवानां परमात्मा फलरूपः सायुज्यस्थानमिति यावत् । तथात्मनां वा परमात्मत्वेन सेवमानानां परमात्मा मोक्षदाता । अथवा । भगवतः सर्वत्वं वक्तुं सदंशस्योत्पत्त्यादिजनकत्वेन स्वरूप भगवानित्युक्त्वा, चिदंशमपि भगवानेवात्मेति वदन्, आत्मत्वेनैवस्वरूपता सिद्धेति तन्नियामकान्तर्यामिरूपत्वेन भगवन्तं निरूपयति **परेति** ॥२७॥

एव मूलकार्यरूपे निरूप्य य एव रामो मम स्वामी, स एव भगवानिति वक्तुं रामावतारपौरुषमाह **यस्येषदिति** । ईषदुत्कलितः पुष्पप्रायः क्रोधः, तत्रापि ऊर्ध्वं कलिकामात्रं जातः, सोऽपि मनस्येवेत्याह **कटाक्षमोक्षैरिति** । अल्पीयसि क्रोधे मनसि जाते दृष्टिस्तादृशी जाता । सापि न संपूर्णा, किन्तु कटाक्षरूपा, ते च पुनः दृष्ट्यवयवा. मोक्षरूपा इति ज्ञापयितुं कटाक्षाणां मोक्षा निरूपिताः । अल्पजीवाश्चेतनाः तैर्भीता भविष्यन्तीति किं वक्तव्यम् । ततः अब्धिरपि वर्त्म प्रादिशत् । मदुपरि मार्गं कृत्वा गच्छन्त्वित्युक्तवान् । ननु देय एव मार्गः, कथमुपायमुपदिष्टवानित्याह **क्षुभितनक्रतिमिङ्गिल** इति । नक्राणां तिमिङ्गिलानां च क्षोभं दृष्ट्वा तथोक्तवानित्यर्थः । अब्धिश्च आपो धीयन्ते अस्मिन्निति तासां निरन्तरमुत्पत्तिर्बाधिता स्यात् । अतो मर्यादारक्षार्थमपि तथोक्तवान् । अप्स्वभावः भगवत्कृतः । तेनान्यथाकर्तुं न शक्यत इति मार्ग एव कर्तव्य इति भगवानेव प्रार्थितः । अन्तरिक्षेणापि गमनेन गत्वा मारयितुं शक्यम्. तथा सति राक्षसैस्तुल्यता भविष्यतीति अलौकिके कर्तव्ये प्रस्तराणामेव समुद्रे प्लवन निरूपितम्, न वानराणामिति भगवता सेतुः कृत इत्याह । क्रमेण चरित्रत्रयं निरूप्यते । सेतुबन्धो राजसः, दाहः सात्त्विकः, रक्षसां वधश्च शिष्ट इति । जलाग्न्यासन्यानां निमित्तत्वात् सत्त्वादिक्रमो वा । स्वयशसा लङ्का उज्ज्वलितेति । ऊर्ध्वं ज्वलिता ज्वालिता उज्ज्वलीकृता वा अनेनैतत् ज्ञापितम्, रघुनाथेनैव लङ्का प्रकाशितेति । अन्यथा लङ्कां को जानीयात् । नह्यन्यानि राक्षसस्थानानि लोके प्रसिद्धानि । इषुभिः क्षतानि स्वयमेव भूमौ पेतुः । क्षतमात्रेणैव भगवत्सामर्थ्यादेव पतितानि ॥२८॥

व्याख्यार्थ—जाम्बवान् युद्ध से कैसे निवृत्त हुआ ? इसके उत्तर में कहा है कि प्रभु के स्वरूप को जब जान गया; तब निवृत्त हुआ, ज्ञान मार्ग के अनुसार भी ज्ञान होता है। अतः कहता है, मैं आपको जानता हूँ कि आप सकल प्राणियों के आसन्य प्राण हैं, उसका कार्य ओज अर्थात् इन्द्रियों की शक्ति भी आप हैं, अन्तः करण का बल और शरीर का बल भी आप हैं, इस प्रकार सर्व प्राणियों में बलात्मा,कार्य कारण से जिसका वीर्य बांटा हुआ है वह आसन्य आप ही हैं,इस तरह नरों में उत्तम कहकर अब कहता है कि पुरुषोत्तम भी आप है; क्योंकि पुराण पुरुष विष्णु हो, यों तो केवल विष्णु कहने से अधिकारी विष्णु समझा जाता, वैसा होते हुए भी लोक को प्रकट करने वाले तथा प्रकर्ष से भावित करने वाले होने से प्रभु विष्णु भी आप ही हैं, सबको नियम में रखने वाले कालरूप भी आप हैं। पहले रूप भेद से चार प्रकार की क्रिया शक्ति का निरूपण किया अब चार प्रकार से ज्ञान शक्ति निरूपण की जाती है, ज्ञान चार प्रकार का है, एक नियामक, इष्ट की साधनता जताकर प्रवृत्त करने वाला, दूसरा फलदातापन से स्थित तीसरा निर्वाह करने वाला सर्व रूप, चौथा है वह ज्ञान रूप अवरोह क्रम से और अन्य पदों से निरूपित है ॥ २६ ॥

इस प्रकार भगवान् के पूर्ण ज्ञान क्रिया शक्ति वाले स्वरूप का निरूपण कर, अब उनके जगत् के जन्म से लेकर मोक्ष पर्यन्त चारों कार्यों का निरूपण करता है, कि विश्व की रचना करने वाले तत्वों का सृष्टा आप ही हैं, बने हुए कार्यरूप घट आदि का सत् स्वरूप आप ही हैं, यों कहने से स्थिति बताई, नाश करने वाले काल महादेव और यम आदि के भी कालरूप आप ही हैं, इस प्रकार सृष्टि स्थिति प्रलय कर्त्ता स्वरूपों को कहकर, मोक्ष दाता होने से परमात्मा आप ही हैं, अर्थात् समस्त जीवों की परम आत्मा होने से फलरूप आप हैं। सारांश यह है कि सायुज्य स्थान आप हैं, आपकी परमात्मा रूप से सेवा करने वाले जीवों को मोक्ष देने वाले परम आत्मरूप आप मोक्ष दाता हैं अथवा सर्व भगवान् हैं यों कहने के लिये सदंश से उत्पत्ति आदि करने वाले स्वरूप होने से, भी आप भगवान् हैं, चिदंश जीव का आप भगवान् ही आत्मा हैं, यों कहते हुए आत्मापन से ही सबकी स्वरूपता सिद्ध हो गई उनका नियामक अन्तर्यामी रूप भी आप भगवान् हैं यों निरूपण करने के लिये कहता है, कि 'पर'' रूप आप ही हैं, अर्थात् आप से उत्तम वा 'पर' कोई नहीं हैं इस विषय में सम्मति के लिये श्रुतियां ली हैं ॥ २७ ॥

इस प्रकार मूल स्वरूप के कार्यों का रूप वर्णन कर, जो ही राम मेरा स्वामी वही आप है, यों कहने के लिये, रामावतार के पराक्रमों का वर्णन करता है। अल्प ही उभरा हुआ फूल सम क्रोध, वह भी बढा हुआ कली जैसा हो गया। वह भी मन में ही उत्पन्न हो रहा था, थोड़ा भी क्रोध मनमें उत्पन्न होता है, तो दृष्टि भी वैसी हो जाती है। अर्थात् दृष्टि बदल जाती है। जिससे यह ज्ञान होता है, कि इसको क्रोध उत्पन्न हुआ है श्री राम की दृष्टि पूर्ण क्रोध से युक्त न थी, अतः कटाक्ष रूप ही थी, फिर वे दृष्टि के अवयव मोक्ष रूप थे यों जताने के लिये कटाक्षों के मोक्ष का निरूपण किया है। अर्थात् राम ऐसी स्थिति में अपनी दृष्टि के कटाक्षों को समुद्र पर फेंका जिससे डर कर समुद्र ने ही जब मार्ग दे दिया, तो चेतन जीव उनसे डरे उसमें कहना ही क्या है ? समुद्र ने डर से, भगवान् रामजी को कहा, कि यह मार्ग है, मेरे ऊपर मार्ग बनाकर आप निःसंकोच हर्ष से पधारिये। समुद्र को जाने का मार्ग दे देना चाहिये था ? उपाय क्यों बताया ? जिसके उत्तर में कहा है, कि समुद्र ने सोचा कि यदि रास्ता दूंगा, तो मेरे भीतर जो नक्र मगर आदि भंयकर जीव हैं, वे उनको कष्ट देंगे। अतः

मार्ग बता दिया अथवा समुद्र को संस्कृत में "अब्धि" नाम भी दिया है, वह इस लिये दिया है, कि इसमें निरन्तर पानी पैदा होता ही रहता है, यदि वहाँ से रास्ता दिया जाता तो पानी की उत्पत्ति में रुकावट हो जाती, अतः रास्ता न देकर ऊपर पुल बान्धने का उपाय बता दिया जिससे मर्यादा की भी रक्षा की गई इस प्रकार उत्पत्ति होने में जल का स्वभाव भगवान् ने बनाया है, इस तरह अन्य प्रकार से कर नहीं सकते, इसलिए भगवान् को ऊपर मार्ग बनाने की प्राथना की है, अन्तरिक्ष से भी जाकर मारा जा सकता था, इस प्रकार मारने से राक्षसों से समानता हो जाती, इसलित कुछ अलौकिक भी दिखाना इस विचार से पाषाणों को ही समुद्र में स्नान कराते तैराना योग्य ही है। यह निश्चय कर पत्थरों से पुल बनवाई यों निरूपण किया है। यह पुल वानरों ने नहीं किन्तु भगवान ने सिद्ध किया है, भगवान् ने तीन प्रकार मे चरित्र किया है। १-पुल बान्धना यह राजस चरित्र है। २-रावण की पुरी का वा रावण का दाह यह सात्विक चरित्र है, शेष राक्षसों का वध यह तामस चरित्र है, अथवा जलकार्य सत्व, अग्नि कार्य राजस आसन्य कार्य तामस है, इन कार्यों के निमित्त होने से तीन गुणों का क्रम है, श्री राम ने अपने यश से लंका प्रकाशित करदी वा जलाई इससे यह बताया कि रघुनाथ ने ही लका को जगत में प्रसिद्ध किया नहीं तो लंका को कौन पहचानता था। जैसे अन्य राक्षस-स्थान, लोक में प्रसिद्ध नहीं वैसे वह भी नहीं होती, बाणों से क्षत हो राक्षसों के सिर स्वयं पृथ्वी पर गिर जाते, क्षत होते ही गिरने का कारण भगवान् का सामर्थ्य ही है ॥२८॥

आभास—एवं कृते स्तोत्रे भग्नसर्वाङ्गं यथापूर्वं कृत्वा भगवानुवाचेत्याह **इतीति**।

आभासार्थ—जाम्बवान् ने जब इस प्रकार स्तुति की तब भगवान् ने उसके टूटे हुवे अंगों को पहले जैसे सिद्ध कर दिये और उसको "इति" श्लोक से कहने लगे।

श्लोक—इति विज्ञातविज्ञानमृक्षराजानमच्युतः।
व्याजहार महाराज भगवान्देवकीसुतः ॥२९॥

श्लोकार्थ—हे महाराज ! इस प्रकार जिस रीछों के राजा को विशेष ज्ञान हो गया है, उसको देवकी के पुत्र अच्युत भगवान् स्पष्ट कहने लगे ॥२९॥

सुबोधिनी—विशेषेण ज्ञातं विशेषज्ञानं यस्य, स्वभावतोऽपि महान्तमृक्षराजानम्,अच्युतः सर्वतः धर्मा अपि तस्य तथेति। एतत्प्रयोजनमुत्तरश्लोके वक्तव्यम्। तत्कृतपीडाभावाय वा। **व्याजहार** स्पष्टमुक्तवान्। निन्दितत्वात् कदाचित् व्याजेनापि वदेत्। अत एतदुक्तम्। **महाराजेति** संबोधनं सेवकापराधापरिगणनज्ञापनार्थम्। ननु कथं स्पष्टं वचनं कथं वा नाज्ञापितवानित्याह **भगवानिति**। सर्वसमर्थः। तादृशोऽपि देवकीसुतो भक्तकृपालुः। अतो युक्तमेवास्य स्पष्टवचनमिति भावः ॥२९॥

व्याख्यार्थ—जिसको विशेष ज्ञान हुआ है, और जो स्वभाव से भी महान् है, क्योंकि रीछों का राजा है, अतः उस महान् ऋक्षराज को स्पष्ट कहने लगे इस का प्रयोजन उत्तर श्लोक में कहा जावेगा अथवा उसको जो पीड़ा हुई उस पीड़ा को मिटा देने के लिये स्पष्ट कहने लगे, भगवान् जो स्पष्ट कहने

लगे, वह स्पष्ट कहना छल से भी हो सकता है; क्योंकि रीछ ने ऐसे कार्य किये हैं, जो निन्दा के योग्य है, इसका स्पष्टीकरण करते हुवे परीक्षित् को महाराज सम्बोधन देकर, इस शंका का निवारण करते हैं कि सेवक के अपराधों की गणना नहीं की जाती है, आप राजा हैं इस बात को जानते हो हैं, स्पष्ट वचन क्यों कहे? आज्ञा क्यों न दी, इसका उत्तर देते हैं कि आप अच्युत एवं भगवान् हैं, अच्युत होने से सर्व समर्थ हैं अर्थात् आज्ञा करें वा स्पष्ट वचन कहें, उनकी जैसी इच्छा हो त्यों करें किंच देवकी के पुत्र हैं, वह स्वरूप तो भक्तों पर कृपा ही करता है, अतः इनका स्पष्ट वचन कहना उचित ही है ॥२९॥

आभास—वचनात्पूर्णमेव तस्य हितं च कृतवानित्याह **अभिमृश्येति** ।

आसाभार्थ—स्पष्ट कहने से पहले ही उसका कल्याण किया जिसका वर्णन 'अभिमृश्य'' श्लोक में करते हैं—

श्लोक—**अभिमृश्यारविन्दाक्ष. पाणिना शंकरेण तम् ।**
कृपया परया भक्तं मेघगम्भीरया गिरा ॥३०॥

श्लोकार्थ—कमल नेत्र भगवान् ने परम कृपा से उस भक्त पर अपना कल्याण करने वाला हाथ फेरा और मेघ की गरज के समान गम्भीर आनन्द देने वाली वाणी से कहने लगे ॥३०॥

सुबोधिनी—तस्याभिमर्शोऽपि सकृत् कृतो नित्यं तिष्ठति । सामान्यस्यैव वाभिमर्शः सुखकरो भवति तत्क्षणम्, किं वक्तव्यमानन्दमयस्य । तत्रापि यस्मिन् क्षणे स निष्पादितः, ततःप्रभृति तथैवानुवर्तत इति पूर्वावस्थां ततोऽप्यधिकां वा प्राप्तवान् । मानसीं व्यथां दूरीकर्तुमाह **अरविन्दाक्ष** इति । दृष्ट्यैव सर्वसुखदायी । **शंकरेण पाणि-नेति** । तस्मिन्नतिशयाधानमप्युक्तम् । येनाग्रे सद्बुद्धिरप्युत्पद्यत इति । एवं कायेन मनसा च सान्त्वनं कृत्वा वचसापि सान्त्वनमाह **मेघगम्भी-रयेति** । मेघा हि शब्दत एव भाविवृष्टिं सूचयन्तः चिन्तादिसर्वतापहारका भवन्ति । तथाप्यनुचितं कथमुक्तवानित्याशङ्क्याह **कृपया परयेति** । अनेन वा मानसं सान्त्वनम् । तमिति तथा स्तोत्रकर्तारं सान्त्वनोचितम् । त्रिविधसान्त्वनेऽपि हेतुर्भक्त-मिति ॥३०॥

व्याख्यार्थ—उनका इस प्रकार एक बार भी हाथ फिराना नित्य रहता है । सामान्य मनुष्य भी यदि यों हाथ फिरावे तो वह भी उस समय ही देता है, तो आनन्द मय का हस्त फिरे, तो उससे जो सुख होगा, वह कहा नहीं जा सकता है, उसमें भी जिस क्षण में वह कल्याणकारी हस्त धरा उस समय से लेकर, वह सुख वैसा हो बढ़ता रहता है यों उसकी जो पहले अवस्था थी उससे भी अब विशेष सुन्दर अवस्था हो गई अर्थात् भगवान् का शरीर पर हाथ का स्पर्श होने से उसके टूटे हुए अंग तो जुड़ गयें किन्तु पूर्व से सुन्दर भी हो गये थे, न केवल अंग सुन्दर हुए किन्तु मन की व्यथा भी मिट गई क्यों-कि भगवान् अरविंदाक्ष हैं, जैसे कमल से ताप मिटता है, वैसे भगवान् भी अपने कमल समान नेत्रों से भक्त के भीतरी व्यथा, यानि ताप को शान्त कर, सर्व प्रकार सुख देते हैं, कल्याण कर हस्त धरने से आश्रय भी दिया, जिससे आगे सद्बुद्धि भी उत्पन्न होती रहे । इस प्रकार काया तथा मन से सांत्वना

देकर प्रब वचन से भी सान्त्वना करते है। मेघ सम गम्भीर वाणी से सान्त्वना दी। जिसका भावार्थ यह है, कि जैसे मेघ गर्जना कर बताते हैं कि हम वर्षा करेंगे, सुभिक्ष होगा चिन्ता मत करो, यह गर्जना सुन प्रजा का मन का ताप मिट जाता है, वैसे ही भगवान् की वाणी से इसके ताप मिट गये। आज्ञा न कर, स्पष्ट कहा, यह उचित सा नहीं था यों क्यों कहा ? इसका समाधान करने के लिये "परया कृपया" पद दिया हे जिसका आशय है, कि परम कृपा के कारण यों किया है। कृपा से जो किया जाता है, वह उचित ही है उसमें भी यहां परम कृपा है जिसके लिये क्या कहा जाय? इससे मानस सान्त्वना भी कहा समझा जा सकता है, 'तं' शब्द से यह बताया हैं कि जिसने स्तुति की है, उसकी सान्त्वना करना उचित ही है, तीन प्रकार की सान्त्वना कहने का कारण यह है कि वह "भक्त" है ॥ ३० ॥

आभास— वाक्यमाह मणिहेतोरिति।

आभासार्थ—"मणिहेतोः" श्लोक से वह स्पष्ट वाक्य कहते है —

श्लोक—मणिहेतोरिह प्राप्ता वयमृक्षपते बिलम्।
मिथ्याभिशापं प्रमृजन्नात्मनो मणिनामुना ॥३१॥

श्लोकार्थ—हे रीछों के पति ! हम यहाँ बिल में मणि के लिए आए हैं; क्योंकि हम पर जो झूठा कलंक लगाया गया है, वह इस मणि से मिटाया जाएगा ॥३१॥

सुबोधिनी—अत्रागमने मणिरेव हेतुः। मणिं नेतुमागताः। बहुवचनं पूर्वदृष्टसर्वसाहित्यं सूचयति। हेतुशब्दो वा निमित्तवाची। मणिनिमित्तं वयं समागता इत्यर्थः। **ऋक्षपत** इति। ज्ञात्वैवागमनं निरूपितम्। अन्यथा बिले समागमनं न स्यात्। मणेरपि प्रयोजनमाह **मिथ्याभिशापं प्रमृजन्निति**। एतद्विस्तरेणोक्तमिति लक्ष्यते। **मिथ्याभिशापः** अकृतापकीर्तिकीर्तनम्। लोकाः अत एवविद इति। दृष्टिमेव मन्यन्त इति। अमुना मणिना अभिशापं प्रमृजन् इहागत इति सम्बन्धः। यद्यपि अग्रे मिथ्याभिशापापगमः, तथापि क्रिया प्रारब्धेति वर्तमानप्रयोग एव युक्तः। एकवचनं तु मिथ्याभिशाप एकस्यैवेति। **आत्मन** इत्यावश्यकता अन्यथा भक्तोद्धारो न सम्भवतीति भावः ॥३१॥

व्याख्यार्थ—यहाँ आने में मणि कारण है, मणि लेने के लिये हम यहाँ आये हैं बहुवचन इस लिये कहा, कि पहले अपने साथ जो सब आये थे उनकी सूचना दी, हेतु शब्द निमित्त वाची है, अर्थात् मणि के निमित्त हम आये हैं। हे ऋक्षपति! यहां मणि है यह जानकर ही हम यहाँ आये है, यह कारण नहीं होता तो हमारा इस बिल में आना नहीं होता, मणि लेने का भी प्रयोजन बताते हैं। यों भी आप न समझना कि मणि इतना सोना देती है इस लोभ से आये है वह प्रयोजन नहीं हैं, धन आदि की लालसा हमको बिलकुल नहीं है, किन्तु हम पर मणि ले जाने का झूठा कलंक लगाया गया है कि मैंने सत्राजित के भ्राता प्रसेन को मारकर मणि लेली है। इस नहीं किये हुवे कार्य का आरोपण झूठा कलंक लगाया गया है, यह अपकीर्ति सर्वत्र हो रही है लोक तो सत्य को जानते नहीं हैं, देखे हुवे

को प्रमाण मानते हैं, अतः यह मणि ले जा कर सारी कहानी सुना के अपना कलंक मिटाऊंगा, इस लिये ही हमारा आना हुआ है। यद्यपि आगे झूठी निन्दा मिट जाती, तो भी कार्य प्रारम्भ किया है इसलिये वर्तमान प्रयोग करना ही योग्य हैं। एक वचन इसलिये दिया है कि झूठी निन्दा एक की हुई है, "आत्मनः" पद आवश्यक था क्योंकि मेरी ही निन्दा हो रही है, नहीं तो भक्त का उद्धार ही न हो सकता यों भी है ॥ ३१ ॥

आभास—एवं स्वाभिप्राये निरुक्ते कथं देयमिति विचार्य तावन्मात्रे दत्ते स्वस्य सेवकत्वं न सिध्यति, याचितं सर्वं एव प्रयच्छतीति स्वकन्यां च दत्तवानित्याह **इत्युक्त** इति।

आभासार्थ—इस प्रकार जब भगवान् ने अपना अभिप्राय स्पष्ट कह दिया तब जाम्बवान् ने विचार किया कि इनको मणि किस प्रकार दूँ ? केवल मणि देने से तो मेरा सेवकपन सिद्ध न होगा, अतः माँगने वाले को सब ही देना चाहिये यह निश्चय कर, मणि तथा अपनी कन्या भी दी, यह "इत्युक्त" श्लोक में शुकदेवजी वर्णन करते हैं—

श्लोक—श्रीशुक उवाच—इत्युक्तः स्वां दुहितरं कन्यां जाम्बवतीं मुदा।
अर्हणार्थं स मणिना कृष्णायोपजहार ह ॥३२॥

श्लोकार्थ—श्री शुकदेवजी ने कहा—भगवान् ने जब यों कहा, तब जाम्बवान् ने प्रसन्नता से अपनी जाम्बवती कन्या को लाकर कृष्ण के पास स्थापित की और पूजार्थ मणि भी दी ॥३२॥

सुबोधिनी- जाम्बवतः अपत्यं जाम्बवती, अनेन पालिता कन्या न भवतीति सूचितम्। ऋक्षाणां विधानान्तराभावात् दानमेव कृतवान्। सापि ततः पूर्वं कन्या अदत्तैव स्थिता। **मुदेति** भाग्यं जातमिति। भगवानपि पूजितः, कन्यायाः वरोऽपि प्राप्त इति। ततस्तस्या एव कन्यायाः दानसमये अर्हणार्थं मणिमपि दत्तवान्। एतद्द्वयमपि न कुशोदकपूर्वकं प्रादात्, किन्तु **उपजहार** समीपे आनीय स्थापितवानित्यर्थः ॥३२॥

व्याख्यार्थ—जाम्बवान् की सन्तति जाम्बवती इस प्रकार नाम होने से यह कन्या जाम्बवान् की केवल पाली हुई नहीं है, किन्तु उत्पन्न की हुई है। रीछों के लिये कन्या का विवाह कराने का कोई विधान नहीं है। अतः दान ही की, वह कन्या पहले कहीं दी हुई नहीं थी। अप्रसन्न होकर नहीं दी किन्तु देने से प्रसन्न ही हुआ। कारण कि, समझने लगा कि मेरा सौभाग्य है, जिससे कन्या को ऐसा श्रेष्ठ वर मिल गया और मैंने भी भगवान् का पूजन किया। अनन्तर जब कन्या का दान भगवान् को देने लगा तब पूजन के निमित्त मणि भी भगवान् को अर्पण की, ये दोनों हाथ में कुश और जल लेकर भगवान् को नहीं दी थी किन्तु भगवान् के समीप आकर भेंट की भाँति धर दी ॥ ३२ ॥

आभास—एवमन्तःस्थितिमुक्त्वा बहिःस्थितिमाह **अदृष्ट्वा निर्गममिति** त्रिभिः ।

आभासार्थ—इसी भाँति भीतर की दशा को कहकर, अब बाहर की हालत का वर्णन "अदृष्ट्वा" से लेकर तीन श्लोकों से करते है—

श्लोक—अदृष्ट्वा निर्गमं शौरेः प्रविष्टस्य बिलं जनाः ।
प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः ।।३३।।
निशम्य देवकी देवी रुक्मिण्यानकदुन्दुभिः ।
सुहृदो ज्ञातयोऽशोचन्बिलात्कृष्णमनिगतम् ।।३४।।
सत्राजितं शपन्तस्ते दुःखिता द्वारकौकसः ।
उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ।।३५।।

श्लोकार्थ—भगवान् के संग गए हुए मनुष्य गुफा में न जाकर बाहर खड़े थे, भगवान् अकेले ही भीतर गए, संगी मनुष्य भगवान् के लौट आने की प्रतीक्षा में बाहर खड़े रहे। जब १२ दिन तक भगवान् बाहर नही आए, तब दुःखी हो अपने पुर को लौट गए। उन्होंने जाकर भगवान् का बाहर न आने का समाचार सबको सुनाया। वसुदेव, देवकीदेवी, रुक्मिणी, मित्र और बान्धव; कृष्ण का बिल से बाहर न आना सुन शोक करने लगे। वे दुःखी हुए द्वारकावासी सत्राजित को शाप देने लगे, इस प्रकार उसको गाली-गलोच करते हुए कृष्ण की प्राप्ति के लिए महामाया दुर्गा के पास गए ।।३३-३५।।

सुबोधिनी—प्रविष्टो हि तस्मिन्नेव दिवसे समायास्यतीति तत्रत्या बहिःस्थिताः निरन्तराकाङ्क्षया भोजनादिरहिताः द्वादशदिवसपर्यन्तं स्थित्वा द्वादशाङ्गेष्वपि क्षीणेषु जना विवेकरहिताः भगवानपि शौरिरिति विशेषतस्तत्प्रभावानभिज्ञाः दुःखिताः सन्तः द्वादशाहानि प्रतीक्ष्य स्वपुरं ययुः। 'संवत्सरप्रतिमा वै द्वादशरात्रय' इति। ततो येऽपि नागताः, तेऽपि द्वारकायां स्थिताः भगवन्निर्गमाभावं श्रुत्वा दुःखिता जाता इत्याह **निशम्येति**। स्त्रीणामविवेको भूयानिति। तत्रापि पुत्रस्नेहो महानिति देवक्यादिक्रम उक्तः त्रयो मुख्याः। **अन्येऽपि** सुहृदः सम्बन्धिनः ज्ञातयो गोत्रिणश्च बिलादनिर्गतं कृष्णं श्रुत्वा अशोचन्। वस्तुतत्त्वानभिज्ञाः। कृष्णो हि भक्तहितार्थमेवावतीर्णः। कथं विलम्बं कृतवानिति। एवं सर्वेषां शोकं राजसं दुःखमुक्त्वा तामसं सात्त्विकं चाह **सत्राजितं शपन्तस्त** इति। दुरात्मायं सत्राजित्, प्रसेनवन्म्रियतामिति। एवं शापे हेतुः **दुःखिता** इति। दुःखेऽपि विशिष्टो हेतुः **द्वारकौकस** इति। मथुरां परित्यज्य देशप्रान्ते द्वारकायां स्थिताः कृष्णैकशरणाः भगवत्यनागते दुःखिता भवन्तीति युक्तमित्यर्थः। द्वारकावासित्वेन तेषां शापोऽपि सत्राजिति फलिष्यतीति सूचितम्। सात्त्विकं दुःखमाह **उपतस्थुर्महामायामिति**। माया हि

भगवदुद्गमे प्रतिबन्धिका भवति भगवांश्च तस्यै वरं दत्तवान् 'अर्चिष्यन्ती'ति। अतो भगवता दत्तो वरः अवश्यं तेनैव सत्यः कर्तव्य इति देवतान्तरभजनापेक्षया भगवदाविर्भावार्थं दुर्गैवानुसन्धेया ।।३३-३५।।

व्याख्यार्थ– द्वारकावासी जो बाहर खड़े हो गये थे उन्होने सोचा था कि भगवान उसी दिन ही लौट आयेंगे, किन्तु भगवान् जब उस दिन नहीं लौटे तो दूसरे दिन सोचा कि कल नहीं आए तो आज तो आ ही जाए गे यों निरन्तर आकांक्षा करते हुए उनको वहाँ बिना भोजन के बारह दिन बीत गये, इतने दिन निराहार रहने से उनके १२ अंग शिथिल हो गये, जिससे उनका विवेक जाता रहा, भगवान् भी शूरवंश में उत्पन्न हुवे हैं इसलिये उनके स्वभाव को न जान सके थे जिससे दुःखी हो १२ दिन उनकी राह देखकर अनन्तर अपने पुर अर्थात् द्वारका चले गये "संवत्सरप्रतिभावै द्वादश रात्रय" इस वाक्यानुसार १२ रात्रियाँ भोजन के बिना संवत्सर के समान है।

जो साथ नहीं आये थे और द्वारका में ही स्थित थे वे भी भगवान् का बिल से बाहर न आना सुन कर दुःखी हुए, जिसका वर्णन 'निशम्य" श्लोक में हुआ है–

पुरुषों से स्त्रियों में अविवेक विशेष होता है, उसमें भी फिर पुत्र का स्नेह अधिक अविवेक करता है,इसलिये पहले देवकी से प्रारम्भ किया है,सम्बन्ध में तीन मुख्य होते हैं,माता,पिता और स्त्री। दूसरे भी सुहृद, मित्र, सम्बन्धी, ज्ञाति वाले और गोत्र वालों से भी सम्बन्ध होता है, अतः वे सब भी कृष्ण का बिल से बाहर न आना सुन कर शोक करने लगे। शोक करने का कारण यह था, कि वे वस्तु के तत्वों को नहीं समझते थे। श्रीकृष्ण तो भक्तों के हित के लिये ही प्रकटे थे,अतः कैसे विलम्ब किया है?

इस प्रकार सर्व का राजस शोक और दुःख कहकर अब तामस और सात्विक कहते है–

यह सत्राजित दुरात्मा है, जैसे प्रसेन मरा वैसे यह भी मरे तो अच्छा, इस प्रकार शाप देने लगे, शाप देने का कारण है, श्रीकृष्ण के बाहर न आने से दुःखी होना, दुःख में इससे भी विशेष कारण, यह भी था कि द्वारका वासी थे। मथुरा छोड़ कर देश के एक कोने में द्वारका है उसमें जाके रहे थे, वहाँ इनके रक्षक कृष्ण ही है उनके न आने से दुःखी होना उचित ही है। द्वारकावासी होने से, यह भी सूचना दी है, कि इन्होंने जो सत्राजित को शाप दिया है वह सफल होगा। सात्विक दुःख कहते हैं, कि माया ही भगवान् के प्रकट होने में बाधा डालती है, भगवान् ने उसको वर दिया है, कि तूझे सब पूजे गे अतः भगवान् ने जो वर दिया है, वह वर उनको ही सत्य करना है, इसलिए अन्य देव की पूजा की अपेक्षा भगवान् के आविर्भाव के लिए दूर्गा की पूजा करनी चाहिये।। ३३, ३४, ३५ ।।

आभास—एवं भक्तानां त्रिविधं दुःखं दृष्ट्वा स्वयमाविर्भावं कुर्वन्नेव कृतकार्यः अर्धमासव्रते कृत एवयमाविर्भूतः, स्ववाक्यमपि सत्यं कृतवानित्याह **तेषां तु देव्युपस्थानादिति**।

आभासार्थ—इसी तरह भक्तों के तीन प्रकार के दुःख देख कृतकार्य भगवान् अपना आविर्भाव करने लगे, द्वारकावासियों के १५ दिन का व्रत पूर्ण होते ही स्वयं प्रकट हुए, अपना वाक्य भी सत्य किया जिसका वर्णन "तेषां तु" श्लोक में करते है—

श्लोक—**तेषां तु देव्युपस्थानात्प्रत्यादिष्टाशिषासवः ।**
प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन्हरिः ॥३६॥

श्लोकार्थ— देवी के उपस्थान करने से ज्यों देवी ने प्रसन्न हो आशीर्वाद दिया, त्यों ही कार्य सिद्ध कर स्त्री को भी संग ले हरि भगवान् सबको आनन्दित करते हुए प्रकट हो गए ॥३६॥

